भृगूणामधिपं चैव काव्यं राज्येऽभ्यषेचयत् ।
[T_4 om (hapl) line 1]

While after 3^{ab}, $T_{1,2}$ G M_{1-3} read 5^{cd} —^{c}) D_6 T_{1-3} G_{1-4} M_4 पतिं (for तथा).

दैत्यानां दानवानां च प्रह्लादममितौजसम् ॥ ४
वैवस्वतं पितॄणां च यमं राज्येऽभ्यषेचयत् ।
यक्षाणां राक्षसानां च पार्थिवानां तथैव च ॥ ५
सर्वभूतपिशाचानां गिरीशं शूलपाणिनम् ।
शैलानां हिमवन्तं च नदीनामथ सागरम् ॥ ६
गन्धर्वाणामधिपतिं चक्रे चित्ररथं प्रभुः ।
नागानां वासुकिं चक्रे सर्पाणामथ तक्षकम् ॥ ७
वारणानां च राजानमैरावतमथादिशत् ।
उच्चैःश्रवसमश्वानां गरुडं चैव पक्षिणाम् ॥ ८
मृगाणामथ शार्दूलं गोवृषं तु गवामपि ।

---

4 ^{d}) Some Mss प्रह्लादम्. K2 Ñ1 T2 G1 अमितौजसाम् (for °जसम्). — After 4, Ñ2 3 V D3 ins 97*, and D8 99*.

5 ^{a}) K2 4 Ñ2 3 V1 2 B1 D1 5 पितॄणां तु, T3 4 G2 4 M3 च पितॄणां (by transp.). — ^{b}) D4 धर्मं (for यमं). G3 ऽभिषिच्य च (for ऽभ्यषेचयत्). — After 5^{ab}, Ś1 K1 3 Dn D4 ins.:

96* मातॄणां च व्रतानां च मन्त्राणां च तथा गवाम् ।
[K1 transp. तथा and गवाम्.]

— D6 om. 5^{cd}. T1 2 G M1–3 read it after 3^{ab}. — ^{c}) M3 यक्षाणां रक्षसां चैव. — ^{d}) K4 M1–3 गुह्यकानां (for पार्थिवानां). T1 2 G2–5 M4 धनस्य (for तथैव). — B2 3 D8 D6 T1 ins. after 5; K4 Dn D5 after 6; Ñ2 3 V D3 after 4; B1 after 5^{ab}:

97* नारायणं तु साध्यानां रुद्राणां वृषभध्वजम् ।
विप्रचित्तिं तु राजानं दानवानामथादिशत् ॥
[(L. 1) N3 देवाना (for साध्याना). — T1 om. line 2. — (L. 2) D3 उपादिशत् (for अथा°).]

6 D83 om. 6^{ab}. — ^{b}) Some Mss. गिरिशं (for गिरीशं). — K1 D6 ins. after 6; K4 Dn D5 cont. after 97*; Ñ2 after 99*; Ñ3 V B1 2 ins. after 9:

98* गन्धानां मरुतां चैव भूतानामशरीरिणाम् ।
शब्दाकाशवतां चैव वायुं च बलिनां वरम् ॥
[(L. 1) Ñ2 खगानाम् (for भूता°). Ñ3 V1 B2 च शरीरिणाम् (for अश°). — K1 om. line 2. — (L. 2) Ñ3 V1 B1 शब्दाना शब्दवता चैव (hypermetric), B2 शब्दाना शब्दता चापि, Dn Cnp °काशभुवा चैव (for ^{a}). Ñ2 3 V B1 2 Dn बलवता (for च बलिना).]
— While K4 Dn D5 ins. 97* after 6.

7 D3 om. 7–9. — ^{a}) D5 च राजानं (for अधिपतिं). — ^{b}) K2 4 Ñ2 3 V1 3 B D8 D1 4 5 प्रभुम्; K3 Dn M1–3 विभुः; D6 T1 2 4 G M4 तथा, T3 प्रति (for प्रभुः). D2 (*sup. lin.* as in text) चक्रे निजरथप्रभुम्. — V2 om. 7^{cd}. — ^{c}) K1. 4 (*sup. lin.* as in text) D4 G5 चैव (for चक्रे). Ś1 नागानामधिपं शेषं. — ^{d}) Ś1 वासुकिम्; Ñ1 तक्षकः (for °कम्).

8 D3 om. 8 (cf. v. l. 7). — ^{a}) K4 Ñ V1 3 B D8 D2 5 6 T1 2 G1 3 5 M1 2 4 तु (for च). Ś1 राजेन्द्र (for राजानम्). — ^{b}) Ñ2 ऐरावणम् (for °वतम्). K4 [अ]पि वा (for [आ]दिशत्). — ^{d}) T1 2 G1 3 5 M4 [अ]पि (for [ए]व). K2 4 D4 5 गरुत्मन्तं च पक्षिणाम्, K3 Dn °डं च पतत्रिणाम्.

9 D3 om. 9 (cf. v. l. 7). — ^{a}) D2 T2 G1 अपि (for अथ). — ^{b}) K2 D4 वृषभं (for गोवृषं). B1 T1 3 G2 च (for तु). Ñ1 पति, V2 B D8 T2 पतिम् (for अपि). K1 3 Dn गोवृषं च चतुष्पदाम्. — After 9^{ab}, Ñ2 ins. 99*. — ^{c}) T3 4 प्लक्षं तु (for राजानं). — ^{d}) T3 4 राजानं च (for प्लक्षमेव). K1 3 Dn [आ]दिशत्प्रभुं (Dn1 °भुम्) (for [अ]भ्यषेचयत्). — K4 Dn D5 6 ins. after 9; Ñ2 after 9^{ab}; Ñ3 V B1 2 cont. after 98*; D8 1n after 4; D3 after 6:

99* सागराणां नदीनां च मेघानां वर्षणस्य च ।
आदित्यानामधिपतिं पर्जन्यमभिषिक्तवान् ॥
सर्वेषां दंष्ट्रिणां शेषं राजानमभ्यषेचयत् ।
सरीसृपाणां सर्पाणां राजानं चैव तक्षकम् ॥
[(L. 1) Ñ2 नदानां (for नदीना). Ñ2 V2 वर्षितस्य (for वर्षणस्य). — (L. 2) Ñ2 V2 अन्यतम, Ñ3 V1 अवरन (for अधिपतिं). Ñ2 V2 3 पर्जन्यमभ्य(V3 °भि)षेचयत्, D8 °न्यं चाभ्यषेचयत् (for ^{b}). — D6 om. lines 3–4. Ñ3 transp. lines 3 and 4. — (L. 3) V2 दन्तिना (for दंष्ट्रिणा). Ñ2 V3 राजानमभिषेचयत्, Dn1 D8 D3 °नं चा(D3 सो)भ्यषेचयत् (for ^{b}). — V2 3 B2 D5 om. line 4. — (L. 4) K4 Ñ2 Dn D3 5 सर्वेषा (for सर्पाणा).]
— After the above, Ñ2 cont. 98* followed by 7^{ab}.
K1 Ñ2 3 V B1 2 Dn D8 D3 5 6 Bom. and Poona eds. cont.; K1 D2 T1 2 G1–3 5 M4 ins. after 9:

100* सर्वाप्सरोगणानां च कामदेवः कृतः प्रभुः ॥
ऋतूनामथ मासानां दिवसानां तथैव च ।
पक्षाणां च क्षपाणां च मुहूर्ततिथिपर्वणाम् ॥
कलाकाष्ठाप्रमाणानां गतेरयनयोस्तथा ।
गणितस्याथ योगस्य चक्रे संवत्सरं प्रभुम् ॥ [5]
[K1 D3 om. lines 1–2. — (L. 1) D6 सर्वाप्सर- (for °रो-). Ñ2 गन्धर्वाप्सरोगणाना च (hypermetric); Bom. and Poona eds. गन्धर्वाप्सरसा चैव (for ^{a}). K4 Ñ2. 3 V1. 3

वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ॥ ९
एवं विभज्य राज्यानि क्रमेण स पितामहः ।
दिशां पालानथ ततः स्थापयामास भारत ॥ १०
पूर्वस्यां दिशि पुत्रं तु वैराजस्य प्रजापतेः ।
दिशापालं सुधन्वानं राजानं सोऽभ्यषेचयत् ॥ ११
दक्षिणस्यां महात्मानं कर्दमस्य प्रजापतेः ।
पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ॥ १२
पश्चिमस्यां दिशि तथा रजसः पुत्रमच्युतम् ।
केतुमन्तं महात्मानं राजानं सोऽभ्यषेचयत् ॥ १३
तथा हिरण्यलोमानं पर्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्धर्षं राजानं सोऽभ्यषेचयत् ॥ १४
ततेयं पृथिवी सर्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्मेण परिपाल्यते ॥ १५
राजसूयाभिषिक्तश्च पृथुरेभिर्नराधिपैः ।
वेददृष्टेन विधिना राजराज्येन राजभिः ॥ १६
ततो मन्वन्तरेऽतीते चाक्षुषेऽमिततेजसि ।
वैवस्वताय मनवे पृथिवीराज्यमादिशत् ॥ १७
तस्य विस्तरमाख्यास्ये मनोर्वैवस्वतस्य ह । C 280 B I 4 24 P I 4 24

B1 2 D3 5 कामदेव तथा प्रभुम् (for ^{b}) — T1 om (hapl) lines 2–5 — (L 2) K4 D3 ऋक्षाणाम्, D6 मार्गशीर्षौ (for ऋतूनाम्) K4 Dn D3 देवताना, Ds D5 वासराणा (for दिवसाना) — T2 om lines 3–4 G2 om lines 3–5 — (L 3) K4 D5 अयनाना, Ñ2 V1 2 च क्षणाना, V3 च क्षराणा, Dn Ds उभयाना (for च क्षपाणा) D3 ऋतूनामथ पक्षाणा, D6 पक्षाणा स तु जाताना (for ^{a}) M4 -लक्षणाम् (for -पर्व°) D6 तिथिमुहूर्तपर्वणाम् (for ^{b}) — (L 4) D3 -प्रचाराणा, M4 -निमेषाणा (for -प्रमाणाना) — K1 D2 om line 5 — (L 5) D3 गतिरस्य (for गणितस्य) V2 च (for [अ]थ) D6 गणितस्योपयोगस्य (for ^{a}) K4 साख्यायन, D3 शाखायन (for सवत्सरं) D6 T2 G1 3 5 पतिम्, M4 विभुम् (for प्रभुम्)]

10 ^{b}) K1 3 Ñ1 B Dn Ds D3 M1–3 प्र-, D6 T2 G1 3 5 M4 [ए]व (for स) — ^{c}) Ñ1 V3 Ds D3 6 T1 3 4 G1 2 5 M1 3 4 दिशा (for दिशां) D3 अपि (for अथ) D6 T1–3 G M1 3 4 तथा (for तत) K3 दिक्पालानथ तत. (submetric), M2 दिशापालानथो तात

11 ^{a}) Ś1 K1 3 पूर्वं तु, Ñ1 राजेन्द्र (for पुत्रं तु) — ^{b}) G1 वैरणस्य, M1 वैराज्यस्य (for °जस्य) — K3 om (hapl) 11^{cd} — ^{c}) Ś1 K4 V B1 2 Dn D3 4 दिशां (for दिशा-) M1–3 सुधर्माणं (for °न्वानं) — ^{d}) K1 T3 4 G2 4 6 च, V3 om (for सो)

12 K3 transp 12^{ab} and 12^{cd} K1 reads 12 and D4 reads 12^{ab} on marg — ^{a}) Ś1 महाराज (for °त्मानं) — ^{c}) T2 G1 शङ्खप्रद (for °पदं) — After 12, T2 reads 15^{a} repeating it in its proper place

13 Ś1 om 13–15 — ^{a}) K1 3 Ñ3 B Dn D2–6 T1–3 G3–5 M4 पश्चिमायां (for °मस्यां) — ^{c}) M2 ऋतुमन्तं (for केतु°)

14 Ś1 om. 14 (cf v l 13) — ^{a}) Some Mss -रोमाण — ^{b}) T4 कर्दमस्य (for पर्जन्यस्य) — ^{cd}) K3 चैव (for दिशि) K1 3 transp दुर्धर्षं and राजानं K1 3 च (for सो)

15 Ś1 om 15 (cf v l 13) T2 reads 15^{a} for the first time after 12 D6 T3 4 G1–3 5 ins after 15^{a} T2 after the repetition of 15^{a}

101* सशैलवनकानना ।
ससागरा च ससरित्
[(L 2) T3. 4 ससरित्सप्तजलधि]

— ^{b}) Ds M4 सपर्वता, T3 4 सपट्टणा (T4 °ना) (for °त्तना) T2 सप्तद्वीपसपट्टणा — ^{d}) T3 4 M4 धर्मत (for धर्मेण) Ñ2 V2 B D2 प्रति- (for परि-) K1 -कल्पते (for पाल्यते) D3 T2 धर्मेण प्रतिपद्य(T2 °लभ्य)ते

16 ^{a}) Ñ1 V2 B2 3 Dn D2 3 T1 3 4 G2 4 M4 तु; D5 वै (for च) Ś1 K1 3 4 सर्वैश्चैवाभिषिक्तश्च (Ś1 °स्तु), Ds राजसूयेऽभिषिक्तश्च — ^{b}) B3 Ds एतैर्, D2 एव (for एभिर्) Ś1 K1 3 D3 नराधिप (K1 3 °प) (for °धिपैः) — ^{c}) K2 देव-, Ñ1 शास्त्र- (for वेद-) D6 देवसृष्टेन विधिना — ^{d}) K2 4 Ñ2 3 V1 3 D2 5 T3 भारत; M1–3 राजराट् (for राजभि.) Ñ1 V2 B Ds D1 3 T4 राजराज्ये नराधिप (Ñ1 °प), Dn °ज्ये सुराजभि, D4 राजा राज्ये च भारत, D6 T1 2 G M4 राजा रा(D6 G1 3 °जरा)ज्येऽभिषेचित

17 ^{b}) M1 2 चाक्षुषे भरतर्षभ — ^{d}) B D2 3 पृथिव्यां (for °वी), Ś1 K1–3 Dn T3 G4 ब्रह्मा (T3 पृथ्वी) राज्यमथादिशत्, D4 ततो राज्य समा°

18 ^{a}) T2 विस्तारम् (for विस्त°) — ^{b}) K1 T2 G1 M4 हि, K3 V2 B1 G3 M1 2 च; K4 B2 3 Ds वै (for ह) — ^{c}) K4 [आ]नूपूर्व्या, T1 [अ]नुकूलं (for [आ]नुकूल्याद्) K1 3 D4 तथानुपूर्व्याद्राजेन्द्र — ^{d}) M4 पादशुश्रूषणेन च (sic) — D6 reads 18^{ef} twice — ^{e}) N (except Ś1

तवानुकूल्याद्राजेन्द्र यदि शुश्रूषसेऽनघ ।
महद्ध्येतदधिष्ठानं पुराणे परिनिष्ठितम् ॥ १८

जनमेजय उवाच ।

विस्तरेण पृथोर्जन्म वैशंपायन कीर्तय ।
यथा महात्मना तेन दुग्धा चेयं वसुंधरा ॥ १९
यथा च पितृभिर्दुग्धा यथा देवैर्यथर्षिभिः ।
यथा दैत्यैश्च नागैश्च यथा यक्षैर्यथा द्रुमैः ॥ २०
तेषां पात्रविशेषांश्च वैशंपायन कीर्तय ।
वत्सान्क्षीरविशेषांश्च सर्वमेवानुपूर्वशः ॥ २१
यस्मिंश्च कारणे पाणिर्वैनस्य मथितः पुरा ।
क्रुद्धैर्महर्षिभिस्तात कारणं तच्च कीर्तय ॥ २२

वैशंपायन उवाच ।

हन्त ते कथयिष्यामि पृथोर्वैन्यस्य संभवम् ।
एकाग्रः प्रयतश्चैव शुश्रूषुर्जनमेजय ॥ २३
नाशुचेः क्षुद्रमनसो नाशिष्यस्याव्रतस्य वा ।
कीर्तयेयमहं राजन्कृतघ्नस्याहितस्य वा ॥ २४
स्वर्ग्यं यशस्यमायुष्यं धन्यं वेदेन संमितम् ।
रहस्यमृषिभिः प्रोक्तं शृणु राजन्यथातथम् ॥ २५

Ñ1 B3 Ds) om हि D6 (second time) उपाख्यान (for अधिष्ठान) — ^{f}) S1 K Ñ3 V1 2 Dn D1 4 5 T2 4 G1 -कीर्तितम् (for -निष्ठितम्) Ñ2 T1 पुराणं परिकीर्तितम्, G4 °ण परिनिर्मितम् — After 18, N (except Ś1 K3 Ñ1) T G M4 ins

102* पुण्यं यशस्यमायुष्यं स्वर्गवासकरं शुभम् ।

[T3 धन्य (for पुण्य) T1 4 स्वर्ग्यं (for स्वर्ग-) V1 परम्, T2 G1 नृणाम् (for शुभम्)]

— After the above, K1 (marg) ins an addl colophon mentioning Khila and adhy name as अभिषेक सर्ग.

19 G2 om the ref — ^{c}) K3 [अ]नेन (for तेन) — ^{d}) D6 [ए]वं (for [इ]यं)

20 G4 om 20 V2 om (hapl) 20^{bc} — ^{b}) K4 Ñ2 D1 T4 महर्षिभि: (for यथ°). — After 20, all Mss (except Ś1 Ñ1 G4 M1–3) ins :

103* यथा शैलैः पिशाचैश्च गन्धर्वैश्च द्विजोत्तमैः ।
राक्षसैश्च महासत्त्वैर्यथा दुग्धा वसुंधरा ॥

[(L 1) T2 G1 [अ]चले, T3 रक्ष- (for शैल) V2 3 यथा सिद्धैर् (for गन्धर्वैश्च) K1 3 D2 द्विजोत्तम (for °त्तमै) —(L 2) K2 [ए]व तै सर्वैर्, D4 पिशाचैश्च (for महासत्त्वैर्)]

21 ^{a}) Ñ1 2 T1 विशेषाश् (for °षांश्) — Ś1 om 21^{b}. K2 B1 om (hapl) 21^{bc} Ś1 reads 21^{c} after the first occurrence of 21^{d} — ^{c}) K4 Ñ2 3 V1 2 B3 Ds D1 2 वत्सं ; Ñ1 D3 5 T3 4 विधिं, D6 T1 2 G1–3 5 M दोग्धॄन्, G4 दोग्धृ- (for वत्सान्) — Ś1 reads 21^{d} twice — ^{d}) Ś1 (second time) K1. 3 Dn सर्वेषाम्, K2 Ñ2. 3 B Ds D2. 3 दोग्धारं च ; T4 स त्वमेव ; G4 सर्वांश्चैव (for सर्वमेव) K4 D1 (*sup. lin* as in text) -सर्वशः ; D4. 6 -कीर्तय (for -पूर्वशः). Ś1 (first time) दोग्धारं विधिमेव च.

22 ^{a}) V1 यस्माच् (for यस्मिंश्) D1 कारणात् (for °णे) Ñ1 2 V3 B Ds D2 3 5 M1–3 यस्माच्च कारणात्पाणिर् — ^{b}) Some Mss वेणस्य (for वेनस्य) — ^{c}) G3 5 M4 चैव, M1 2 तस्य, M5 तच्च (for तात) — ^{d}) D1 M4 तस्य (for तच्च)

23 ^{a}) V1 2 B2 Ds D2 3 हन्त ते कीर्तयिष्यामि — ^{b}) Some Mss वैण्यस्य (for वैन्यस्य) Ñ1 V2 B1 2 (marg) 3 Ds D3 T1 विस्तरम् (for संभवम्) — Dn2 D5 repeat 23^{cd} after 26 — ^{c}) Ś1 भूत्वा (for चैव) Dn2 D5 (both second time) एकाग्रमानसश्चैव — ^{d}) K Ñ3 B1 Dn1 n2 (first time) D1 3 4 5 (both times) T1 3 4 G3–5 M4 शृणुष्व (for शुश्रूषुर्).

24 ^{a}) T1 3 G4 M3 नाशुचे (for °चेः) Ñ1. 2 नाशुचः क्षुद्रमनसा — ^{b}) Ñ2 D4 5 T4 G1. 4 च (for वा) Ś1 K1 3 Ñ1 B Dn Ds D2 3 6 T2 3 G2 3 5 M4 ना(K1 3 कु)शिष्यायाव्रताय च (Ñ1 B3 D6 T2 G2 3 5 वा), T1 कुशिष्यायाभृतस्य ह — ^{c}) Ñ1 T1 M1–3 वर्तयेयम् (for की°) K2 D1 4 5 T2 G1 इमं, Ñ2 3 V1 3 B Ds D2 6 इदं (for अहं) Ś1 वर्तय त्वं महाराज ; K1 4 T3 4 G3 कीर्तनीयमिदं (T3 G2 °मं) राजन्, D3 कीर्तनीयं महाराज, G4 वक्ता चायं महाराज. — ^{d}) K1 3 Dn D3 T3 च (for वा) Ś1 कृतघ्नस्याव्रतस्य च, V2 B Ds D6 T2 4 G1 2 M4 कृतघ्नायाहिताय वा (V2 Ds2 T2 G1 M4 च)

25 M4 om 25. — ^{a}) K2 D4 पुण्यं (for स्वर्ग्यं) D3 ददाति स्वर्गमायुष्यं — ^{b}) Ś1 पुण्य ; K1 3 T3 धर्म्यं (for धन्य). Ñ2 V2 3 B Ds D1 2 T3 M3 वेदैश्च (for वेदेन) D3 T1 2 4 G1 2 धर्म्यं (D3 पुण्यं) वेदैश्च संमितम्. — Ds om. 25^{cd}. — ^{d}) K4 D5 T2 G1 यथातथा (for °तथम्).

26 ^{a}) T1 [ए]तत् ; G3. 5 [इ]मं (for [ए]नं) Ś1 K1. 3 D3 M1. 2 यश्चेमं कथयेन्नित्यं (M1. 2 °येन्मर्त्यः). — ^{b}) Some

यश्चैनं कीर्तयेन्नित्यं पृथोर्वैन्यस्य संभवम् । ब्राह्मणेभ्यो नमस्कृत्य न स शोचेत्कृताकृतम् ॥ २६

इति श्रीहरिवंशे चतुर्थोऽध्यायः ॥ ४ ॥

५

वैशंपायन उवाच ।

आसीद्धर्मस्य संगोप्ता पूर्वमत्रिसमः प्रभुः ।
अत्रिवंशसमुत्पन्नस्त्वङ्गो नाम प्रजापतिः ॥ १
तस्य पुत्रोऽभवद्वेनो नात्यर्थं धार्मिकोऽभवत् ।
जातो मृत्युसुतायां वै सुनीथायां प्रजापतिः ॥ २
स मातामहदोषेण वेनः कालात्मजात्मजः ।
स्वधर्मं पृष्ठतः कृत्वा कामाल्लोकेष्ववर्तत ॥ ३
मर्यादां स्थापयामास धर्मापेतां स पार्थिवः ।
वेदधर्मानतिक्रम्य सोऽधर्मनिरतोऽभवत् ॥ ४
निःस्वाध्यायवषट्कारा: प्रजास्तस्मिन्प्रजापतौ ।
प्रावर्तन्न पपुः सोमं हुतं यज्ञेषु देवताः ॥ ५
न यष्टव्यं न होतव्यमिति तस्य प्रजापतेः ।
आसीत्प्रतिज्ञा क्रूरेयं विनाशे प्रत्युपस्थिते ॥ ६
अहमीज्यश्च यष्टा च यज्ञश्चेति कुरूद्वह ।
मयि यज्ञो विधातव्यो मयि होतव्यमित्यपि ॥ ७
तमतिक्रान्तमर्यादमाददानमसांप्रतम् । C 299 B 158 P 158

Mss वैण्यस्य (for वैन्यस्य) V_2 B Ds $D_{2\,3}$ विस्तरम् (for संभवम्) — $\tilde{N}_3$ om 26^{cd} — ^{c}) $K_{1\,3}$ $\tilde{N}_2$ $V_{1\,3}$ D_6 S (except T_3) नमस्कृत्वा (for °स्कृत्य.) — ^{d}) D_{1-3} शोचेत (for स शोचेत्) $\tilde{N}_1$ कृताकृते , $M_{1\,2\,4}$ कदाचन (for कृताकृतम्). K_2 न शोचेत कृताकृती — After 26, Dn_2 D_5 repeat 23^{cd}.

Colophon — *Mention of the Epic* $K_{1\,3\,4}$ $\tilde{N}_1$ Ds D_1 T_3 — *Mention of Khila* $\acute{S}_1$ $K_{1\,3}$ $\tilde{N}_1$ V_3 B Dn $D_{1\,4\,5}$ — *Adhy name* $K_{1\,2\,4}$ $\tilde{N}_{3\,3}$ V $B_{1\,2}$ Dn Ds D_{1-5} पृथूपाख्यानम्, T_2 सोमाभिषेक ; T_3 चतुर्थसर्ग , G_1 M_4 सोमाद्यभिषेक , $G_{2\,3\,5}$ सोमाद्यभिषेके दिक्पालस्थापनम् — *Adhy no* (figures, words or both) $K_{1\,3}$ $\tilde{N}_3$ B Dn Ds_1 $D_{1\,6}$ S 4 : D_5 5 — *Śloka no* K_1 D_2 28, Dn_1 Ds 33, D_4 27

5

1 M_4 om the ref — ^{a}) $\acute{S}_1$ $K_{1\,3}$ Dn D_6 T_1 $G_{2\,4}$ गोप्ता वै , V_3 वै गोप्ता (for संगोप्ता) — ^{b}) M_4 -समुद्भवः (for -समः प्रभु) — ^{c}) V_3 Ds D_{2-4} G_1 अत्रिवंशे (for °वंश) — ^{d}) K_3 तुङ्गो , D_6 G_2 साङ्गो , T_2 G_1 अङ्गो , G_{3-5} $M_{1\,2\,4}$ सोऽङ्गो (for त्वङ्गो) V_2 महीपति. (for प्रजा°)

2 ^{a}) B_1 अस्य (for तस्य) Some Mss वेणो (for वेनो) — ^{b}) $\acute{S}_1$ K_1 G_5 धर्मको (for धार्मिको) $\tilde{N}_1$ नृप. (for ऽभवत्). K_{2-4} $\tilde{N}_{2,3}$ V B Dn Ds D_{1-6} $T_{3\,4}$ M_3 नात्यर्थं धर्मकोविद — ^{c}) V_2 तु , Dn_2 च (for वै) — ^{d}) D_6 $T_{1\,2}$ $G_{1\,3\,5}$ M_4 प्रजापते (for °पति.)

3 ^{b}) $\tilde{N}_3$ $V_{1\,2}$ (*sup lin* as in text) B Ds_1 $D_{2\,3\,6}$ $T_{1\,4}$ $G_{1\,3-5}$ M तेन (for वेन) $\tilde{N}_2$ V_3 वेन कालात्मजासुत — ^{c}) $\acute{S}_1$ T_1 M_4 स धर्मं , D_3 स्वधर्मान् (for °र्मं) — ^{d}) $K_{2\,4}$ $\tilde{N}$ V_2 B Ds $D_{1\,2\,5}$ $T_{2\,4}$ $G_{1\,3\,5}$ लोभेषु (for लोकेषु). K_1 वर्तते (for [अ]वर्तत) $V_{1\,3}$ कामाल्लोभेषु वर्तते , D_3 T_3 कामलोभेष्ववर्तत ; D_4 कामलोभप्रवर्तक , M_4 कामाल्लोभोऽभ्यवर्धत .

4 ^{b}) K_3 नराधिप , D_6 $T_{1\,2\,4}$ G M_4 स भारत (for स पार्थिव.) M_{1-3} धर्मापेता सहस्रश. — ^{c}) D_6 $T_{1\,2}$ $G_{1\,3\,5}$ -धर्मम् (for -धर्मान्)

5 ^{b}) $\tilde{N}_1$ D_6 S (except $T_{3\,4}$) तस्मिन्सर्वे (for प्रजास्तस्मिन्) S_1 $K_{1\,3}$ Dn तस्मिन्राजनि शासति — ^{c}) $K_{2\,4}$ $\tilde{N}$ V B_1 Dn D_{1-6} T G M_4 प्रवृत्तं , K_3 संस्कृत (for प्रावर्तन्) V_2 पुन (for पपुः) — ^{d}) $K_{1\,3}$ श्रुतं ; D_1 द्रुतं ; M_3 सुत (for हुतं)

6 ^{a}) K_3 च (for the second न) $\tilde{N}_2$ V_1 दातव्यम् (for हो°) — ^{c}) V_2 घोरा (for क्रूरा). T_2 G_5 M_4 [ए]व ; G_3 [ए]व (for [इ]यं) — ^{d}) V_2 विनाशे समुपस्थिते — After 6, Ds reads 8^{cd}, repeating it in its proper place

7 Ds om 7^{ab} — ^{a}) V_3 ईज्या ; D_2 ईड्यश्, D_4 ईशश् ; some Mss. इज्यश् (for ईज्यश्). S_1 पूज्यश् (for

ऊचुर्महर्षयः सर्वे मरीचिप्रमुखास्तदा ॥ ८
वयं दीक्षां प्रवेक्ष्यामः संवत्सरगणान्बहून् ।
अधर्मं कुरु मा वेन नैष धर्मः सतां मतः ॥ ९
निधने हि प्रसूतस्त्वं प्रजापतिरसंशयम् ।
प्रजाश्च पालयिष्येऽहमिति ते समयः कृतः ॥ १०
तांस्तथा ब्रुवतः सर्वान्महर्षीनब्रवीत्तदा ।
वेनः प्रहस्य दुर्बुद्धिरिममर्थमनर्थवत् ॥ ११
स्रष्टा धर्मस्य कश्चान्यः श्रोतव्यं कस्य वा मया ।
संमूढा न विदुर्नूनं भवन्तो मां विशेषतः ॥ १२
इच्छन्दहेयं पृथिवीं प्लावयेयं तथा जलैः ।
द्यां वै भुवं च रुन्धेयं नात्र कार्या विचारणा ॥ १३
यदा न शक्यते मानादवलेपाच्च पार्थिवः ।
अनुनेतुं तदा वेनं ततः क्रुद्धा महर्षयः ॥ १४
निगृह्य तं महात्मानो विस्फुरन्तं महाबलम् ।

यष्टा) K3 अहमिष्टश्च पूतश्च, K4 °मीड्यश्च यज्वा च —^{b}) K2–4 Ñ2 V3 D2 4 5 [ए]व (for [इ]ति) Ñ1 कुलोद्वह (for कुरू°). Ś1 यज्ञे देवैर्द्विजातिभि —^{c}) T2 G1 2 न हि (for मयि) M3 तु दातव्यो (for विधा°) B3 D5 मयि यज्ञा विधातव्या —^{d}) D3 यष्टव्यम् (for होत°)

8 The portion from 8^{b} up to 7 50^{d} is lost in M1 on missing folios —^{b}) Ñ1 अधार्मिकम् (for असांप्रतम्) — Ds reads 8^{cd} for the first time after 6 —^{d}) T2 G2 नारद- (for मरीचि) Ś1 सदा, K1 ततः; V2 (*sup. lin* as in text) 3 B1 D1. 3–5 M4 तथा (for तदा) Ds1 (both times) D6 G1 नारदप्रमुखास्तथा

9 M1 missing (cf v 1 8). —^{b}) K4 शश्वद्वर्ष- (for संवत्सर-) — After 9^{ab}, D6 ins :

104* फलदायी स चास्माकं यज्ञस्तेऽद्यापि नान्यथा ।

—^{c}) T3 4 वीर, G5 येन; some Mss वेण (for वेन) —^{d}) Dn2 नैव, D2 एष (for नैष) Ś1 सतामपि; K3 Ñ3 V1. 3 B3 Dn Ds D4 6 T1 3 4 M2. 3 सनातनः, Ñ1 V2 B1 2 D3 T2 G M4 सतामिति (for सतां मतः)

10 M1 missing (cf v 1 8) —^{a}) K1 4 B1 (marg) D1–3. 5 अन्वयेऽत्रे, K2 Ñ1 B1 Dn Ds D4 निधनेऽत्र; K3 नैवमत्रेः; Ñ2. 3 V B2 3 T2 3 G1 4 अत्रिवंश- (B2 3 °शे) (for निधने हि) M2 निधनं हि प्रजानां त्वम्; M3 विहितो हि प्रजानां त्वं. —^{b}) Ñ3 V1. 3 B3 T2 G1 2 5 M3 असंशयः; V2 इव स्वयम् (for असंशयम्) —^{d}) K4 निश्चयः (for समयः) M2 एष धर्मः सनातनः

11 M1 missing (cf v 1. 8) —^{a}) Ś1 K1 Ñ2 D6 T G1 2 4 M3 4 तदा (for तथा) D2 वदतः (for ब्रुवतः) —^{b}) Ś1 K3 4 Dn D4 5 प्राब्रवीत् (for अ°) Ś1 K1 3 D6 T1 2 G1 3 5 M4 ततः; D4 M2 3 वचः (for तदा) —^{c}) Some Mss वेणः (for वेनः) —^{d}) K1 इदं वाक्यम्; Ñ3 Dn D1 इदमर्थम्. Ś1 B2 3 D5. 6 T1 3 G1 4. 5 M3 अनर्थवित्; B1 अरिंदम (for अनर्थवत्). K4 V2 Ds इदमर्थमनर्थवित्; G3 इदं वचनमब्रवीत्. — After 11, Ñ2 V3 ins 105*.

12 M1 missing (cf. v. 1. 8). Before 12, D5 ins. वैशंपायन उवाच, some Mss वेन उवाच Ñ2 V3 read 12^{ab} after 105* —^{a}) M3 चैव (for कश्च) K1 [अ]त्र (for [अ]न्य.) —^{b}) Ś1 K1 3 G2 4 वै (for वा) T3 4 वच (for मया) — After 12^{ab}, all Mss (except Ś1 Ñ1 M2 3, M1 missing) Ñ2 V3 ins after 11

105* श्रुतवीर्यतपःसत्यैर्मया वा कः समो भुवि ।
प्रभवः सर्वभूतानां धर्माणां च विशेषतः ॥

[(L 1) T2 G1 3 5 भूत (for वा कः) M4 विभु (for भुवि) —(L 2) K4 T2 G1 M4 प्रभव (for °व)]

— T1 om (hapl) 12^{cd} —^{c}) D4 मां (for न) T2 G1 वेनं (for नूनं) —^{d}) D6 T2 G M4 हि (for मा) K3 4 Ñ2 3 V B Dn Ds D1–5 त्रि(V3 B3 अ)चेतसः (for विशेषतः)

13 M1 missing (cf v 1 8). —^{b}) K2 4 Ñ2 3 V1 3 D1 2 5 6 T G M4 जलेन वा; K3 Dn जलैरपि; Ñ1 V2 B Ds D3 जलैस्तथा (by transp.), D4 तथा जनान् —^{c}) D1 वा, D2 नि- (for च) D6 G2–5 M3 4 रुन्धीयां (for रुन्धेयं) Ś1 K1 3 V2 Dn T4 द्यां भुवं चैव रुन्धे(Ś1 K1 3 भिद्ये)य, D3 T3 द्यां भुवं च निरुन्धेयं, T1 द्यां वा भुवं च रुन्धीया; Bom and Poona eds खं भुवं चैव रुन्धेयं

14 M1 missing (cf v 1 8) Before 14, Ś1 K2 D6 T G M3 4 ins वैशंपायनः —^{a}) Ñ1 V2 B Ds D2–4 6 T1 3 4 मोहाद् (for मानाद्) —^{b}) Ś1 K2 4 V3 D1 T2 G1 5 पार्थिव, K3 °वम् (for °वः) —^{c}) K2 4 V1 D1–3 T2 G1 Cn*p* अपनेतुं (for अनु°) K1 प्रजा ह्येनं, K3 Ñ3 B2 Ds2 T1 3. 4 G2 4 तदा वेनस्; G3 प्रजा वेनस् (for तदा वेनं) Ñ1 2 V2 3 B1 3 Ds1 D5 M2 अपनेतुं तदा (M2 °था) वेन(Ñ1 V3 °ण)स् ❀ Cn पाठान्तरे अपनेतुमधर्मादपक्रष्टुम् । ❀ —^{d}) M2 3 तदा (for ततः)

15 M1 missing (cf v 1 8) —^{a}) Ñ1 V2 B Ds D3 तं निगृह्य (by transp); V3 निगृह्य तु; G2 विनिगृह्य Ñ2 महात्मान (for °त्मानो) — After 15^{ab}, T3. 4 ins. :

106* हन्यतां हन्यतां पाप इत्यूचुस्ते परस्परम् ॥
यो यज्ञपुरुषं देवमनादिनिधनं हरिम् ।

ततोऽस्य सव्यमूरुं ते ममन्थुर्जातमन्यवः ॥ १५
तस्मिंस्तु मथ्यमाने वै राज्ञ ऊरौ प्रजज्ञिवान् ।
ह्रस्वोऽतिमात्रः पुरुषः कृष्णश्चापि बभूव ह ॥ १६
स भीतः प्राञ्जलिर्भूत्वा स्थितवाञ्जनमेजय ।
तमत्रिर्विह्वलं दृष्ट्वा निषीदेत्यब्रवीत्तदा ॥ १७
निषादवंशकर्ता स बभूव वदतां वर ।
धीवरानसृजच्चापि वेनकल्मषसंभवान् ॥ १८
ये चान्ये विन्ध्यनिलयास्तुमुरास्तुम्बुरास्तथा ।
अधर्मरुचयस्तात विद्धि तान्वेनकल्मषान् ॥ १९

ततः पुनर्महात्मानः पाणिं वेनस्य दक्षिणम् ।
अरणीमिव संरब्धा ममन्थुस्ते महर्षयः ॥ २०
पृथुस्तस्मात्समुत्तस्थौ कराज्ज्वलनसंनिभः ।
दीप्यमानः स्ववपुषा साक्षादग्निरिव ज्वलन् ॥ २१
आद्यमाजगवं नाम धनुर्गृह्य महारवम् ।
शरांश्च दिव्यान्रक्षार्थं कवचं च महाप्रभम् ॥ २२
तस्मिञ्जातेऽथ भूतानि संप्रहृष्टानि सर्वशः ।
समापेतुर्महाराज वेनश्च त्रिदिवं ययौ ॥ २३
समुत्पन्नेन कौरव्य सत्पुत्रेण महात्मना । C 316 B I 5 25 P I 5 25

विनिन्दत्यधमाचारो न स योग्यो भुव पति ॥
इत्युक्त्वा मन्त्रपूतैस्तै कुशैर्मुनिगणा नृपम् ।
निजघ्नुर्निहतं पूर्वं भगवन्निन्दनादिना ॥ [5]
तस्मिन्हते जगत्सर्वं दस्युभूतमभून्नृप ।
तत. संमन्व्य ऋषयो ममन्थुस्तस्य भूभुज. ॥

[(L 3) T3 ते (for वि-) — (L 5) T3 आजघ्नुर् (for नि°).]

— ^{c}) D3 वै (for ते) T3 सव्यमूरुं महाबाहो — ^{d}) Ś1 कृत- (for जात-)

16 M1 missing (cf v l 8) T1 om 16^{a}–18^{b} — ^{a}) V2 तस्मिंस्तु प्रमथ्यमाने — ^{b}) D4 रौद्र., T2 M3 ऊरो· (for ऊरौ) V2 B D3 वि- (for प्र-) — Ñ1 om 16^{c}–17^{b} — ^{c}) K1 3 D6 -मात्रं, Cs मात्र (as in text) ❀ Cs अतिमात्रो मात्रा अतिह्रस्व इत्यर्थं । ❀ — ^{d}) K1 3 Ñ2 3 V B Dn Ds D2 3 T1 G4 M3 [अ]ति- (for [अ]पि)

17 M1 missing (cf v l 8) Ñ1 om 17^{ab}, T1 om 17 (for both, cf v l 16) — ^{a}) Ś1 संभूत (for स भीतः) — ^{b}) V2 B2 3 Ds D2 3 T2 G1 2 5 M2, 4 तस्थिवाञ् (for स्थित°) — ^{d}) Ś1 K1 3 Dn ततः, Ds वच, D3 पुनः (for तदा)

18 M1 missing (cf v l 8) T1 om 18^{ab} (cf v l 16) — ^{a}) V2 B Ds D2 3 T3 4 G2 4 [अ]सौ, D6 च (for स) M4 निषादकर्ता वंशस्य (sic) — ^{b}) K2 Ds D1 G2 5 वरः (for वर) B3 बभूव जनमेजय — ^{c}) Ś1 तात, K1 V1 T3 4 चाथ, M2 चैव (for चापि) — ^{d}) Some Mss वेण- (for वेन-) M2 4 -संभव (for °वान्)

19 M1 missing (cf v l 8) G2 om 19 — ^{a}) D2 (sup lin as in text) चिन्त्य- (for विन्ध्य-) — ^{b}) Ñ1 तुम्बुरास्; V1. 5 तुषारास्, B2 तुखारास्, T3 निषादास्, M3 तुमुलास् (for °रास्) D6 G4 तुम्बरास् (for तुम्बुरास्) K Ñ3 V2 B1. 3 Dn Ds D1, 2 4, 5 तुषा(K1 3 °म-, B3 Ds °खा)रास्तुम्बरास्तथा, Ñ2 तुषारास्तुमुला°, D3 सुखरास्तम्बुराः खशा, T1 तुम्नुनस्तुम्बरास्तथा, T4 निषादास्तुम्बरा° — ^{c}) D4 -पुरुषास् (for -रुचयस्) Ś1 K1 3 V3 Dn ये च (for तात) — ^{d}) V1 [इ]मान् (for तान्) Some Mss वेण- (for वेन-) Bom and Poona eds -सभवान् (for -कल्मषान्)

20 M1 missing (cf v l 8) — ^{a}) T2 G1 तदा (for तत) — ^{b}) Some Mss वेणस्य (for वेनस्य) — ^{c}) K1 संतप्तं, T2 M4 संरब्धां (for °ब्धा) — ^{d}) Ñ2 तु (for ते) D6 न संशय (for महर्षय) Ñ1 V2 B2 3 Ds D3 ममन्थुर्जातमन्यव

21 M1 missing (cf v l 8) — ^{a}) Ñ1 V2 3 B Ds समुत्पन्न (for °त्तस्थौ) — ^{b}) K1 M2 3 -संनिभात् (for °भ) S1 कराज्जलजसंनिभात्, D3 ज्वलनार्कसमप्रभ — V2 Ds D6 Bom and Poona eds ins after 21 B2 after 21^{ab}

107* स धन्वी कवची जात पृथुरेव महातपाः ।
[Ds वेण्यो (for एव). D6 महाबल, Bom and Poona eds °यशा (for °तपा)]

22 M1 missing (cf v l 8) — ^{a}) ❀ Cs आजगवम् । अजगवो शृङ्गाभ्यां निर्मितं धनु· । ❀ — ^{b}) K1 3 Dn D3 G1 M2 3 महारथ, Ñ1 °वर·, Ñ2 G2 °वरम्, T2 G5 °रथम्; T3 °जवम् (for °रवम्) — ^{c}) Ñ2 transp च and दिव्यान् — ^{d}) D2 कवचांश्च महाप्रभान्

23 M1 missing (cf v l 8) — ^{a}) Ś1 जाते च, K4 Ñ2 3 V1 D1 प्रजाते, M2 3 जाते तु (for जातेऽथ) V3 अत्रि प्रजापतेस्तानि (sic) — ^{b}) Ś1 T4 सर्वत (for °शः). D1 सहृष्टानि च सर्वश· — ^{c}) Ś1 समानेतुं, Ñ2 °ययुर्, D6 संबभूवुर् (for समापेतुर्) Ñ3 V1 2 B2 3 Ds D4 महाभाग (for °राज) D3 समुत्पेतुर्महाभीमो — ^{d}) Some Mss वेणश्च (for वेनश्च) V2 3 B3 D3 तु, Ds T4 [ऽ]पि (for च) Ś1 K1 3 Dn गतः (for ययौ).

त्रातः स पुरुषव्याघ्र पुन्नाम्नो नरकात्तदा ॥ २४
तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्वशः ।
तोयानि चाभिषेकार्थं सर्व एवोपतस्थिरे ॥ २५
पितामहश्च भगवान्देवैराङ्गिरसैः सह ।
स्थावराणि च भूतानि जंगमानि च सर्वशः ॥ २६
समागम्य तदा वैन्यमभ्यषिञ्चन्नराधिपम् ।
महता राजराज्येन प्रजापालं महाद्युतिम् ॥ २७
सोऽभिषिक्तो महातेजा विधिवद्धर्मकोविदैः ।
आधिराज्ये तदा राजा पृथुर्वैन्यः प्रतापवान् ॥ २८
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः ।
अनुरागात्ततस्तस्य नाम राजेत्यजायत ॥ २९
आपस्तस्तम्भिरे तस्य समुद्रमभियास्यतः ।
पर्वताश्च ददुर्मार्गं ध्वजसङ्गश्च नाभवत् ॥ ३०
अकृष्टपच्या पृथिवी सिध्यन्त्यन्नानि चिन्तया ।
सर्वकामदुघा गावः पुटके पुटके मधु ॥ ३१
एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे ।
सूतः सुत्यां समुत्पन्नः सौत्येऽहनि महामतिः ॥ ३२
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ।
पृथोः स्तवार्थं तौ तत्र समाहूतौ महर्षिभिः ॥ ३३
तावूचुर्ऋषयः सर्वे स्तूयतामेष पार्थिवः ।

---

24 M1 missing (cf v 1 8) — *b*) K2 D5 M3 सुपुत्रेण (for सत्पु॰) — *c*) Ś1 K1 2 4 Ñ2 3 V1 3 B2 D1 6 T2 G1 -व्याघ्र॰ (for -व्याघ्र) — *d*) T1 G3 5 ततः (for तदा) Ś1 पुन्नाम्नो नरकं तथा (sic)

25 M1 missing (cf v 1 8) — *a*) K1 3 Dn समागम्य (for च नद्यश्च) — K2 om (hapl) 25*c*–26*d* — *c*) K1 3 T3 G2 4 [अ]भिषेकाय (for ॰कार्थं) — *d*) K1 3 T1 [अ]व- (for [उ]प-)

26 M1 missing (cf v 1 8) K2 om. 26 (cf v 1 25) — *a*) T2 G1 5 स (for च) — *b*) M2 ऋषिगणै. (for आङ्गिरसै.) — *c*) Ś1 सर्वाणि (for भूतानि) — B1 om 26*d*. — *d*) K1 3 Dn तथैव च (for च सर्वश) G3 जंगमादीनि सर्वश॰.

27 M1 missing (cf v 1 8) — *a*) D1 समागत्य (for ॰गम्य). K1 Dn T1 2 G1 3 M4 तथा, D3 M2 3 ततो (for तदा) Some Mss वैण्यम् (for वैन्यम्). — *c*) M4 -वंशेन (for -राज्येन) — *d*) T3 4 महीभृतम् (for महाद्युतिम्).

28 M1 missing (cf v 1 8). — *a*) Ś1 K2. 4 Ñ3 V2 D1. 5 अभिषिक्तो (for सोऽभि॰). — *b*) Ś1 K1 -कोविदः (for -कोविदै). — *c*) Some Mss आदिराज्ये (for आधि॰) K3 om राजा Ñ1 3 V B Ds D3 T4 तदा (Ñ3 V1 2 D3 ॰था) राज्ञां, D4 तथा राजा, D6 T2 G1 2 M4 महातेजा॰, T1 G3–5 महाबाहु. (for तदा राजा) — *d*) Some Mss. वैण्य. (for वैन्य.)

29 M1 missing (cf v. 1. 8). — *a*) Ś1 D4 पराजितास्, K2 G4 M2. 3 न र(M3 विर)ञ्जितास्; T3 वै रञ्जितास् (for [अ]परञ्जितास्) G5 चैव (for तस्य) K3 corrupt; D6 G5 पित्रा वि(G5 ॰श्राप)रञ्जिताश्चैव; T1 G2 3 M4 पित्रा पराजिताश्चैव, T2 G1 पित्राभिरञ्जिताश्चैव — *b*) D3 सुरक्षिता (for [अ]नुरञ्जिता॰) — *c*) B1 D6 तु तत् (for ततस्) — *d*) B1 राज- (for नाम) G2 [अ]मन्यत (for [अ]जायत) B1 (marg) रामराज्येत्यभाषत (sic)

30 M1 missing (cf v 1 8) — *a*) K3 संस्तम्भिरे; D4 च स्तम्भिरे (for तस्तम्भिरे) K2 Ñ2 3 V1 3 D1 2 5 T1. 3 4 G2–5 M2 4 चास्य, M3 वास्य (for तस्य) Ś1 K4 D6 T2 G1 आप संस्तम्भिरे चा(K4 वा)स्य — *d*) Ś1 (before corr as in text) K2 Ñ V B D T G1 2 4. 5 ध्वजभङ्गश्च (for ॰सङ्गश्च)

31 M1 missing (cf v 1 8). — *b*) Ñ1 Ds1 D1 T G2–4 सिध्यति (for सिध्यन्ति) — *c*) Ñ3 V1 D6 G3 M2 3 सर्वाः (for सर्व-). V2 (sup lin as in text) D6 -दुहा (for -दुघा) B1 गाश्च (for गावः) — *d*) ❀ C3 . पुटके पुटके प्रतिपत्रम्। सर्व वृक्षा मधुमन्त इत्यर्थ॰ । ❀

32 M1 missing (cf v. 1. 8) — *c*) K2. 4 Ñ3 V1 3 D1 4 5 T3. 4 समभवत् (for समुत्पन्नः). Ñ2 सुतः सौत्यां समभवत् ❀ C3 सूतो लोमहर्षणः पौराणिकः सुत्यां सुत्यायां सोमाभिषवे क्रियमाणेऽहनि सुत्यादिना समुत्पन्न॰ । अग्निकुण्डादिति शेष॰ । "अग्निकुण्डात्समुद्भूत. सूतो निर्मलमानस." इति व्यासोक्ते । ❀ — *d*) D3 सौतत्वे हि, D4 (also as in text) सौम्येऽहनि (for सौत्येऽहनि) K1 3 Dn D6 महाद्युतिः (for ॰मतिः).

33 M1 missing (cf. v. 1 8). — *b*) K2 जज्ञे राज्ञो; V2 B3 D3 यज्ञे प्राज्ञो, D3 प्राज्ञो जज्ञे (by transp). — *c*) Ñ1 D5 G3–5 M2. 3 स्तवार्थे (for ॰र्थं). — *d*) K1. 3 Ñ1 Dn G2. 3 M2. 3 सुरर्षिभिः (for मह॰).

34 M1 missing (cf. v. 1 8). G2 om. (hapl.) 34–35. — *b*) K2 G3 M4 एव (for. एष). T3 वै पृथुः (for

कर्मैतदनुरूपं वां पात्रं चायं नराधिपः ॥ ३४
तावूचतुस्तदा सर्वांस्तानृषीन्सूतमागधौ ।
आवां देवानृषींश्चैव प्रीणयावः स्वकर्मभिः ॥ ३५
न चास्य विद्वो वै कर्म न तथा लक्षणं यशः ।
स्तोत्रं येनास्य कुर्याव राज्ञस्तेजस्विनो द्विजाः ॥ ३६
ऋषिभिस्तौ नियुक्तौ तु भविष्यैः स्तूयतामिति ।
यानि कर्माणि कृतवान्पृथुः पश्चान्महाबलः ॥ ३७
तदाप्रभृति त्रैलोक्ये स्तवेषु जनमेजय ।
आशीर्वादाः प्रयुज्यन्ते सूतमागधबन्दिभिः ॥ ३८
तयोः स्तवान्ते सुप्रीतः पृथुः प्रादात्प्रजेश्वरः ।
अनूपदेशं सूताय मगधं मागधाय च ॥ ३९
तं दृष्ट्वा परमप्रीताः प्रजाः प्राहुर्महर्षयः ।
वृत्तीनामेष वो दाता भविष्यति जनेश्वरः ॥ ४०
ततो वैन्यं महाराज प्रजाः समभिदुद्रुवुः । C 336 B 1 5 44 P 1 5 44

पार्थिव) T4 G1 स्तूयतामिति पार्थिवम् — c) Ś1 वै, K3 च, Ds1 D3 T2 M4 वा (for वां) G1 कर्मभिस्तदनुरूप वा (hypermetric) — d) D6 T3 G1 M4 पृथुश्, T3 4 याति (for पात्र) K2 D5 वाय, D2 चान्न, T1 चाथ (for चायं)

35 M1 missing (cf v 1 8) G2 om 35 (cf v 1 34) Ds om 35ab — a) K4 D1 4 तथा, D6 T1. 2 G1 M4 तत (for तदा) — c) Ś1 K1 M3 वयं (for आवां) — d) Ś1 K1 प्रीणयाम (for °याव)

36 M1 missing (cf v 1 8) — a) Ś1 विद्यते, K2 3 D1 M2 3 विद्मो वै, B2 विदुर्वै, D2 विद्धि वै, D3 5 6 T1 2 G2–5 M4 विद्महे, G1 विद्महे (for विद्वो वै) V2 कार्य (for कर्म) — b) K4 चास्य (for तथा) Ś1 विद्यते (for लक्षण) — c) Ś1 K2 3 D2 कुर्यावो, K4 कुर्वन्ति, Ñ1 कुर्याम, Ñ3 V1 2 Dn D1 4 5 कुर्वो वै, D3 कुर्वाते, G5 कुर्या वा (for कुर्याव) T3 4 स्तोत्रं यदस्य कुर्वीत (T4 °मो) — After 36, T3 ins

108* ऋषय ।
करिष्यते तु यत्कर्म चक्रवर्ती महाबल ।
गुणा भविष्या ये चास्य तैरयं स्तूयतां नृप. ॥

37 M1 missing (cf v 1 8) — a) K4 तैर्, G2 च (for तौ) K1 T3 4 G3 4 च, B2 G2 तौ (for तु) — After 37ab, T3 ins

109* तौ स्तुतिं चक्रतुर्युक्तं सूतमागधकौ नृप ।

— d) M2 3 वैन्यो (for पश्चान्) K2 4 Ñ2 3 V1 3 D1 2 4 5 T3 4 महामति, D6 T1 2 G M4 °यशा (for °बल) — After 37, Ñ2 V B1 Dn D5 ins

110* सत्यवाग्दानशीलोऽयं सत्यसंधो नरेश्वर ।
श्रीमाञ्जैत्र क्षमाशीलो विक्रान्तो दुष्टशासन. ॥
धर्मज्ञश्च कृतज्ञश्च दयावान्प्रियभाषक ।
मान्यमानयिता यज्वा ब्रह्मण्य साधुवत्सल. ।
सम. शत्रौ च मित्रे च व्यवहारस्थितो नृप ॥ [5]

[(L 1) Ñ2 V2 3 सत्यवान् (for °वाग्) Dn D5 शम- (for दान-). Ñ2 V1 नराधिप (for नरेश्वर) — (L 2) V2 B1 Dn2 श्रीमान्मैत्र, Dn1 D5 ह्रीमान्मैत्र (for श्रीमाञ्जैत्र) V3 सत्यसंगो (for क्षमाशीलो) — (L 3) V3 धर्मज्ञेषु कृतज्ञेषु (for a) V1 3 ऋत (for प्रिय-) Dn -भाषण (for °क) — (L 4) V2 मान्यो (for मान्य-) Dn ब्रह्मण्य सत्यसगर (for b) — B1 om line 5 — (L 5) Dn D5 सम शान्त(Dn1 °मशील)श्च निरतो (for a)]

38 M1 missing (cf v 1 8) — a) Ś1 च नित्यं, Ñ1 M3 हि नित्य (for -प्रभृति) K1 2 4 Ñ2 3 V1 3 Dn D1 2 4 T4 लोकेऽस्मिन् T3 लोकेषु (for त्रैलोक्ये) V2 B Ds D3 5 तत प्रभृति लोकेषु (V2 Ds2 D3 5 °केऽस्मिन्), D6 T1 2 G M4 तत पर महाराज — b) K1 भूतेषु, Ñ3 V1 सर्वेषु, D6 T1. 2 G M3 4 तमेत्य, T4 स्थलेषु, M2 तथैव (for स्तवेषु) — c) K1 प्रदीयन्ते, T2 प्रयुक्तेऽथ (sic) (for प्रयुज्यन्ते)

39 M1 missing (cf v 1 8) — a) Ñ2 partly damaged D4 स्तवार्थे, T3 स्तवैस्तै, T4 स्तवात्स (for स्तवान्ते) — b) D6 T1 2 G M2–4 जनेश्वर (for प्रजे°) — c) T1 देशान् (for -देश) Dn1 तज्ज्ञाय (for सूताय) — d) K2–4 Ñ1 Dn D1 T G2 4 M3 मगधान्, D6 G1 3 5 M2 4 मागधान् (for मगध)

40 M1 missing (cf v 1 8) — a) M2 मुनय: (for परम-) — b) G2 सर्वे (for प्रजा). Ś1 आहुर्, K1 3 Dn T3 4 चाहुर् (for प्रा°) Ñ1 V2 D6 T1 2 G1 3–5 M2 4 मनीषिण (for महर्षय) — c) D1 वै, D6 T1 2 G2 3 5 M4 नो (for वो) — d) K2 4 Ñ V1 3 D1 2 5 नरेश्वर. ; K3 B2 (marg) Dn न सशय, V2 B Ds D3 नराधिप:, M2 3 महेश्वर (for जने°) — After 40, D5 ins

111* तं प्रजा पृथिवीनाथमुपतस्थु क्षुधार्दिता ।
ओषधीषु प्रनष्टासु तस्मिन्काले ह्यराजके ॥
तमूचुस्तेन ता पृष्टास्तत्रागमनकारणम् ।
प्रजा ऊचुः ।
अराजके नरश्रेष्ठ धरित्र्या सकलौषधी ।
ग्रस्तास्तत. क्षय यान्ति प्रजा सर्वा. प्रजेश्वर ॥ [5]
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपित: ।
देहि नः क्षुत्परीताना प्रजानां जीवनौषधी. ॥

त्वं नो वृत्तिं विधत्स्वेति महर्षिवचनात्तदा ॥ ४१
सोऽभिद्रुतः प्रजाभिस्तु प्रजाहितचिकीर्षया ।
धनुर्गृह्य पृषत्कांश्च पृथिवीमार्दयद्बली ॥ ४२
ततो वैन्यभयत्रस्ता गौर्भूत्वा प्राद्रवन्मही ।
तां पृथुर्धनुरादाय द्रवन्तीमन्वधावत ॥ ४३
सा लोकान्ब्रह्मलोकादीन्गत्वा वैन्यभयात्तदा ।
प्रददर्शाग्रतो वैन्यं प्रगृहीतशरासनम् ॥ ४४
ज्वलद्भिर्निशितैर्बाणैर्दीप्ततेजसमच्युतम् ।
महायोगं महात्मानं दुर्धर्षममरैरपि ॥ ४५
अलभन्ती तु सा त्राणं वैन्यमेवान्वपद्यत ।
कृताञ्जलिपुटा भूत्वा पूज्या लोकैस्त्रिभिः सदा ॥ ४६
उवाच वैन्यं नाधर्मं स्त्रीवधे परिपश्यसि ।
कथं धारयिता चासि प्रजा राजन्विना मया ॥ ४७
मयि लोकाः स्थिता राजन्मयेदं धार्यते जगत् ।
मत्कृते न विनश्येयुः प्रजाः पार्थिव विद्धि तत् ॥ ४८
न मामर्हसि हन्तुं वै श्रेयश्चेत्त्वं चिकीर्षसि ।
प्रजानां पृथिवीपाल शृणु चेदं वचो मम ॥ ४९
उपायतः समारब्धाः सर्वे सिध्यन्त्युपक्रमाः ।

---

41 M_1 missing (cf v 1 8) — ^{a}) D_6 तथा (for ततो) Some Mss वैण्यं (for वैन्य) $\tilde{N}_3$ V_1 $D_{1\,3}$ T_2 महाराजं (for °राज) — ^{b}) $M_{2\,3}$ तमभि- (for समभि) D_3 -तुष्टुवु- (for -दुद्रुवु) D_6 T_1 G_{2-5} M_4 प्रजास्ता समभिद्रवन्, T_2 G_1 जनास्तमभिदुद्रुवु — ^{d}) D_5 तत-; G_1 तथा (for तदा) T_3 महर्षिवचन तथा

42 M_1 missing (cf v 1 8) — ^{a}) B_3 ऽतिद्रुत, $D_{3\,4}$ ऽभिष्टुत- (for °द्रुतः) $\acute{S}_1$ सोऽभिध्यायाथ सहसा, $K_{1\,3}$ °द्रुत्याथ सहसा ❀ C_s· अभिद्रुतः प्रोत्साहित । ❀ — ^{b}) $\acute{S}_1$ -प्रिय- (for -हित-) — ^{d}) $K_{2.4}$ D_4 अ(K_4 आ)द्रवद, D_1 T_1 $M_{2\,3}$ अर्दयन् (for आर्दयद्)

43 M_1 missing (cf. v 1 8) — ^{a}) Some Mss वैण्य- (for वैन्य-) K_3 B_1 Dn_2 $D_{5\,6}$ M_3 -भयात् (for -भय-) — ^{b}) $K_{1\,3}$ भयात् (for मही) — ^{d}) M_3 अनुधावति (for अन्वधावत)

44 M_1 missing (cf v 1 8) — ^{b}) T_1 G_{3-5} गता (for गत्वा) Some Mss. वैण्य- (for वैन्य-) K_2 $\tilde{N}_3$ $V_{2\,3}$ $B_{2\,3}$ Ds $D_{1.2.4.6}$ तत (for तदा) — ^{c}) $K_{2\,4}$ $\tilde{N}_3$ $V_{1\,3}$ $D_{1\,3.5}$ सा ददर्श, D_6 $T_{1.2}$ G M_4 ददर्शाथ (for प्रददर्श) Some Mss वैण्यं (for वैन्यं) $T_{3\,4}$ साग्रतो ददर्श वैन्यं — ^{d}) K_2 $D_{4\,5}$ $M_{2\,3}$ समादत्त-, K_4 संगृहीत-, $\tilde{N}_2$ V_1 समार्गण-; V_3 समाकुल-, D_1 सम्यगात्त-, D_2 समाहित-; $T_{3\,4}$ समासक्त- (for प्रगृहीत-) D_6 M_4 उपात्तधनुषं तदा, $T_{1.2}$ G उपात्तधनु(T_1 G_{3-5} °शर)मन्तिकात

45 M_1 missing (cf v 1 8) — ^{a}) K_2 $\tilde{N}_{1\,2}$ V_2 Ds $D_{4\,6}$ T_1 G_{3-5} $M_{2\,3}$ विशिखैर् (for निशितैर्). $D_{1\,2}$ ज्वलद्भिर्विशिखैः पाणौ — ^{b}) K_4 अन्वितम्, $\tilde{N}_1$ अच्युत., D_3 उद्यतम् (for अच्युतम्).

46 M_1 missing (cf. v. 1. 8) — ^{a}) D_5 तदा, D_3 च सा; T_1 परि- (for तु सा). — ^{b}) Some Mss वैण्यम् (for वैन्यम्). K_2 D_2 [अ]भ्यपद्यत (for [अ]न्व°). — ^{d}) $K_{2.4}$ लोके (for लोकैस्) $\tilde{N}_{1\,3}$ $V_{1\,2}$ B Ds D_5 T_4 $M_{2\,3}$ तदा, V_3 D_3 T_2 $G_{1\,3}$ तथा (for सदा)

47 M_1 missing (cf v 1 8) — ^{a}) V_2 B_3 Ds $M_{2\,3}$ चैन, Some Mss वैण्य (for वैन्यं) K_2 मा (for न) $\tilde{N}_2$ D_3 T G_4 [अ]धर्म्यं (for °र्मं) — ^{b}) $\acute{S}_1$ B_1 स्त्रीवध (for °धे) K $\tilde{N}_{2\,3}$ $V_{1\,3}$ $B_{2\,3}$ Dn Ds D_{1-5} T_4 स्त्रीवधं ($K_{2\,4}$ °धे) कर्तुमर्हसि — ^{c}) G_2 कर (for कथ) T_1 वापि (for चासि) — ^{d}) V_2 $D_{2\,3\,6}$ $T_{1\,2}$ $G_{1\,3\,5}$ $M_{2.3}$ मया विना (by transp), T_4 विना प्रभो $K_{2\,4}$ $\tilde{N}_{2\,3}$ $V_{1\,3}$ $D_{1\,4\,5}$ T_3 मया राजन्विना (D_4 °न्निमाः) प्रजा-.

48 M_1 missing (cf v 1 8) — ^{a}) K_4 D_1 स्थिरा राजन्, T_2 G_1 च राजेन्द्र (for स्थिता राजन्) — ^{b}) $K_{3\,4}$ $\tilde{N}_{2.3}$ $V_{1\,3}$ $D_{1.2\,5}$ $T_{3\,4}$ सं- (for [इ]दं) — ^{c}) $K_{2\,4}$ $\tilde{N}$ V B Dn Ds $D_{1\,2.4\,5}$ $T_{3\,4}$ G_1 मद्विनाशे (for मत्कृते न) K_3 विनश्यन्ति (for °श्येयु) $\acute{S}_1$ D_1 (marg) मत्कृते च विनश्यन्ति, K_1 D_3 मद्विनाशे विनश्यन्ति — ^{d}) D_4 G_2 विद्धि ताः; D_6 वर्धिता-, M_4 -वर्धन (for विद्धि तत्) $\acute{S}_1$ K_1 D_1 (marg) विद्धि पार्थिव पार्थिवाः

49 M_1 missing (cf v 1 8) — ^{a}) $\acute{S}_1$ K_3 B_1 D_2 वै हन्तुं (by transp), $M_{2\,3}$ हन्तुं त्वं $K_{1\,3}$ Dn न त्वमर्हसि मां हन्तुं — ^{b}) K_4 T_3 त्वं चेच्च (by transp), D_6 ते त्वं; $T_{2.4}$ G_1 M_4 च त्वं — G_2 om (hapl) 49^d–52^c

50 M_1 missing (cf v 1 8) G_3 om. 50 (cf v 1 49). $K_{1\,2\,3}$ (marg) $_4$ $\tilde{N}_{2.3}$ V B D (except D_3) repeat 50 after 6 7^{ab}. — ^{a}) T_2 G_1 समारूढाः (for °रब्धाः) — After 50^{ab}, T_3 ins

112* तस्माद्भवाम्युपायं ते तं कुरुष्व यदीच्छसि ।

-- T_{2-4} $G_{1.4}$ repeat 50^{cd} after 6 7^{ab} — ^{c}) V_3 (first time) B_2 (second time) येन पश्य (by transp); Ds_1 (first time) पश्य तेन; D_2 (second time) यस्य येन. B_1 (second time) [अ]हं (for त्वं). — ^{d}) K_1 (second time), $_2$

उपायं पश्य येन त्वं धारयेथाः प्रजा नृप ॥ ५०
हत्वापि मां न शक्तस्त्वं प्रजानां पोषणे नृप ।
अन्नभूता भविष्यामि यच्छ कोपं महाद्युते ॥ ५१
अवध्याश्च स्त्रियः प्राहुस्तिर्यग्योनिगतेष्वपि ।
सत्त्वेषु पृथिवीपाल न धर्मं त्यक्तुमर्हसि ॥ ५२
एवं बहुविधं वाक्यं श्रुत्वा राजा महामनाः ।
कोपं निगृह्य धर्मात्मा वसुधामिदमब्रवीत् ॥ ५३

इति श्रीहरिवंशे पञ्चमोऽध्यायः ॥ ५ ॥

६

पृथुरुवाच ।
एकस्यार्थाय यो हन्यादात्मनो वा परस्य वा ।
बहून्वै प्राणिनो लोके भवेत्तस्येह पातकम् ॥ १
सुखमेधन्ति बहवो यस्मिंस्तु निहते शुभे । C 350 B 1 6 2 P 1 6 2

(both times) 3 (marg , second time) 4 (both times) Ñ3 V B2 3 Dn Ds D1 2 (all second time) 3 4 5 (last two both times) 6 (second time) T1 2 (second time) 3 4 (both both times) G1 4 (both second time) प्रजा इमाः, Ñ1 2 (both times) V B Ds (all first time) प्रजामिमाम्, D1 2 (both first time) इमा प्रजाः (for प्रजा नृप) B1 (second time) धारयेयमिमा प्रजा.

51 M1 missing (cf v 1 8) G2 om 51 (cf v 1 49) Ś1 om (hapl) 51^{ab} — ^{a}) K2 4 Ñ3 D1–3 5 T3 4 न समर्थस् (for मां न शक्तस्) D4 हत्वा हि न समर्थस्त्वं — ^{b}) T1 G4 पालने, T3 4 तोषणे (for पो°) K1–3 Dn प्रजा धारयितुं नृप, D6 T2 G1 3 5 M4 प्रजाना परिपालने — ^{c}) Ś1 K1 Ñ1 3 V2 3 B1 3 T1 3 4 G4 5 अनुभूता (for अन्न°) D2 M4 भविष्यन्ति (for °ष्यामि) — ^{d}) G3 शोकं (for कोपं) K2 4 V3 B3 D1 5 M2 महामते (for °द्युते) — After 51, T3 ins

113* पृथु. ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥
ततः प्रणम्य वसुधा तं भूय प्राह पार्थिवम् ।

52 M1 missing (cf v 1. 8). G2 om 52^{abc} (cf v 1 49) — ^{a}) K2 वा (for च) D1 [अ]प्याहुस् (for प्राहुस्) Ś1 K1 3 V2 B Ds अवध्यां च स्त्रिय प्राहुस् — ^{b}) Ñ2 -गतास्वपि, V2 B2 -गतामपि, D3 M3 -गता अपि (for -गतेष्वपि) — ^{c}) K2 Ñ2 3 V1 2 B1 D1 3–5 T4 M4 सर्वेषु; D2 सत्त्वे च, T1 सत्येन (for सत्त्वेषु) — ^{d}) D6 T1 2 G M2 4 हातुम् (for त्यक्तुम्) V3 नाधर्मं कर्तुमर्हसि

53 M1 missing (cf v 1 8) — ^{b}) K2 B2 (marg as in text) राजन् (for राजा) — After 53^{ab}, D6 T G M4 ins

114* चिन्तयित्वा बहुविधं प्रजानां हितकाम्यया ।
[T1 चोदयित्वा (for चिन्त°)]

— ^{c}) T1 नियम्य (for निगृह्य) T3 निगृह्य कोप धर्मात्मा

Colophon missing in M1 — *Mention of the Epic* K3 Ñ1 Dn Ds — *Mention of Khila* K Ñ V B Dn Ds D1 2 4 — *Adhy name* V2 पृथिवीवाक्यम्, V3 B Ds D2 5 पृथूपाख्यानम्, D3 T2 G1 पृथुचरितम्; D6 G2 3 5 M4 वैन्योत्पत्तौ वसुधावाक्यम्, T4 वैन्योत्पत्तिः — *Adhy no* (figures, words or both) K1 4, K3 Ñ3 V1 3 B Dn Ds D1 3 4 6 T G1–3 5 M2–4 5, D5 6 — *Śloka no* K1 Dn1 Ds D2 54, D4 53

6

☞ This adhy is missing in M1 (cf v 1 5 8)

1 S1 वैन्य (for पृथुर्) — ^{a}) Ñ2 [अ]र्थे हि, V3 [अ]र्थे च, D3 [अ]र्थे तु (for [अ]र्थाय) — ^{b}) K1 3 V3 च, D4 ह (for the second वा) — ^{c}) K2 Ñ2 3 V B Ds D1 2 5 वा, D3 तु (for वै) K2 3 ह्येको, Ñ2 3 Dn वैकं, V1 3 B1 2 D2 5 ऽथैक, V2 B3 D1 ऽप्येकं, D3 T2 3 भद्रे (for लोके) Ñ1 M3 बहूनि प्राणिनोऽप्येकं (M3 °वं); D6 T1 2 G M4 बहूनि सत्त्वान्येकं वा, M2 सुबहून्प्राणिनोऽप्येवं. — ^{d}) Ñ2 ह, Ds2 तु, T1 हि, G3 5 M4 [ए]व (for [इ]ह)

2 K2 om (hapl) 2 G1 reads 2 twice — ^{a}) S1 (inf lin) दुःखम् (for सुखम्) — ^{b}) D2 च (for तु) K3 Dn T4 सति, Cs ऽशुभे (for शुभे) ❀ Cs अशुभे इति च्छेद । ❀ — ^{c}) Ś1 नास्त्यशुभे, K1 4 Dn ऽशुभे नास्ति, D2 नास्ति धरे, D3 धरे नास्ति, T1 G4 5 नास्ति हन्तुः (G4 °न्तुं, G5 °न्त्रे) (for नास्ति भद्रे) V2 T3 तस्मिंस्तु निहते भद्रे, G3 तस्मिन्नास्ति हते भद्रे — ^{d}) K1 D4 चोप-, K3. 4 Ñ2 B1 Dn D5 6 T1 3 4 G2–4 M4 चोप-; V2 नैव (for नोप-) — After 2, Dn D3 T3 4 ins

115* एकस्मिन्यत्र निधनं प्रापिते दुष्टकारिणि ।

तस्मिन्हते नास्ति भद्रे पातकं नोपपातकम् ॥ २
सोऽहं प्रजानिमित्तं त्वां हनिष्यामि वसुंधरे ।
यदि मे वचनं नाद्य करिष्यसि जगद्धितम् ॥ ३
त्वां निहत्याद्य बाणेन मच्छासनपराङ्मुखीम् ।
आत्मानं प्रथयित्वाहं प्रजा धारयिता स्वयम् ॥ ४
सा त्वं शासनमास्थाय मम धर्मभृतां वरे ।
संजीवय प्रजाः सर्वाः समर्था ह्यसि धारणे ॥ ५
दुहितृत्वं च मे गच्छ तत एनमहं शरम् ।
नियच्छेयं त्वद्वधार्थमुद्यतं घोरदर्शनम् ॥ ६

वसुंधरोवाच ।

सर्वमेतदहं वीर विधास्यामि न संशयः ।
वत्सं तु मम तं पश्य क्षरेयं येन वत्सला ॥ ७
समां च कुरु सर्वत्र मां त्वं धर्मभृतां वर ।
यथा विष्यन्दमानं मे क्षीरं सर्वत्र भावयेत् ॥ ८

वैशंपायन उवाच ।

तत उत्सारयामास शिलाः शतसहस्रशः ।
धनुष्कोट्या तदा वैन्यस्तेन शैला विवर्धिताः ॥ ९
न हि पूर्वविसर्गे वै विषमे पृथिवीतले ।

बहूनां भवति क्षेमं तत्र पुण्यप्रदो वधः ॥
[(L 2) D3 क्षेमस् (for क्षेम)]

3 a) Ś1 Ñ2 Ds1 त्वा (for त्वां) — b) Ñ2 वसुधराम् — c) V3 M2 वचनान् (for °नं)

4 a) Ś1 K4 V3 [आ]शु, K1 3 Dn तु (for [अ]द्य) — c) Ñ2 V1 आत्मानं प्रथयिष्यामि, T3 4 आत्मयोगप्रभावेन — d) K3 Dn चिरम् (for स्वयम्)

5 a) G4 आपद्य, M4 आज्ञाय (for आस्थाय) — b) T2 G1 धर्मं, G3–5 वैन्यं (for मम). K4 धर्मव्रतां (for °भृतां) Ś1 धरे (for वरे) — c) D6 जीवयस्व (for संजीवय) — d) G3 transp हि and असि D3 पोषणे (for धारणे)

6 a) Ś1 मे यच्छ; D8 गच्छस्व (for मे गच्छ) — b) D1 एतमहं ; D6 T1 G2–4 M2 एनं महा- ; T3 G1 M1 एवं महा- (for एनमहं). — c) T1 2 G1 नियच्छेऽहं (for °च्छेयं) D1 वधार्थाय (for त्वद्वधार्थम्) — d) Ñ2 उद्धृतं (for उद्यतं). Ñ1 -दर्शनः , D6 T1 2 G M4 -रूपिणम् (for -दर्शनम्).

7 Ś1 K1 D2 T2 G1 3–5 पृथिवी, B D8 M4 वसुधा; D3 T4 धरा (for वसुंधरा). — a) Ś1 K1 3 Dn एवम् (for सर्वम्). — After 7ab, K1 2 3 (marg) 4 Ñ2 3 V B D (except D3) repeat 5 50 and T2–4 G1 4 repeat 5 50cd — c) V3 transp तु and मम K4 Ñ2 Dn2 D3–5 G3 4 M2 3 सं- (for तं)

8 b) K3 Dn D2 त्वं मां (by transp.), T1 मां तु , M4 मां च — c) D3 यस्य (for यथा) K1 3 Dn [अ]भिस्यन्दमानं ; K2 4 Ñ V2 B1. 3 Ds2 विस्पन्द°, T2–4 G1 3–5 M4 निष्यन्द° (for विष्यन्द°) — d) D2 T3 G1 भावये (D3 °ये.), D3 °यन्, T3. 4 °य (for °येत्)

9 b) N (except Ś1 D6) T G M3 शैलान् (for शिला.). — c) K1. 3 ततो; Dn नृपो; D6 T1 2 G M4 पृथुर् (for तदा) Some Mss वैण्यस् (for वैन्यस्) — d) D3 तदा (for तेन) D6 T2 G1 5 विमर्दिता· , T1 G4 निवर्तिता· , M4 विवर्तिता (for °र्धिता) — After 9, K Ñ2 3 V B D T2–4 G M3 ins

116* पृथुर्वैन्यस्तदा राजा मही चक्रे समां तत ।
मन्वन्तरेष्वतीतेषु विषमासीद्वसुंधरा ॥
स्वभावेनाभवंस्तस्या समानि विषमाणि च ।
चाक्षुषस्यान्तरे पूर्वमासीदेव तदा किल ॥

[K1 om line 1 — (L 1) Some Mss वैण्यस् (for वैन्यस्) D8 यदा ; D6 T2 G1 5 तथा (for तदा). K3 Dn चक्रे, D4 राजन् (for राजा). D3 ततश्च (for मही) K3 Dn राजा (for चक्रे) D3 महीम् (for तत) T3 4 G4 समा चक्रे मही तत (for b) — K1 reads lines 2–4 on marg — (L 2) K1 वीर्यादासाद्, K3 वक्रा चा°, Dn वक्राथा°: G4 विभवा° (for विषमा°) — (L 3) K1 V3 B2 (marg as above) 3 [अ]स्याभवन् (submetro), K3 D5 T3 4 [अ]स्या ह्यभवन् , Ñ3 [अ]स्या भवने , Dn M3 [अ]भवन्नस्या , D2 [अ]स्याश्चाभवन् , T2 G1 स्वान्यभवन् , G2–5 [अ]स्या अभवन् (for [अ]भवंस्तस्या). Ñ2 प्रभावेनास्य भवने , V1 प्रभावेनास्याभवन् : D3 अस्या स्वभावादभवन् (for a) — (L 4) B1 पुरा ; D4 तथा (for तदा)]

10 a) D6 बहु- ; G2 तर्हि (for न हि) T1 पूर्वं (for पूर्व-) D3 त्रिसर्गेषु (for °र्गे वै) — b) V3 धरणी (for पृथिवी) — c) K2 D6 पुराणा वै ; D3 °णानां ; D2 G3 4 °णां च (for °णां वा) — d) D2 च (for वा) Ś1 K1 3 Dn D6 T2 तथाभवत् , Ñ1 V2 B1 3 Ds [अ]भवत्तदा (by transp). D4 ग्रामाणां च कृतस्तदा ; T3. 4 राष्ट्राणा च तथाभवत्

11 a) Ñ2 V1. 3 शस्यानि (for स°) K1 3 4 B1 Dn D8 G1 गोरक्षं ; Ñ1 D3 5 6 M4 °क्षा ; D4 गोरक्षां ; T1 गोरक्षो (for °क्ष्यं) — b) M4 कृषी (for कृषिर्). — After 11ab, K1 (marg.), 2–4 Ñ2 3 V B D T3. 4 ins. :

प्रविभागः पुराणां वा ग्रामाणां वा तदाभवत् ॥ १०
न सस्यानि न गोरक्ष्यं न कृषिर्न वणिक्पथः ।
वैन्यात्प्रभृति राजेन्द्र सर्वस्यैतस्य संभवः ॥ ११
यत्र यत्र समं त्वस्या भूमेरासीत्तदानघ ।
तत्र तत्र प्रजाः सर्वा निवासं समरोचयन् ॥ १२
आहारः फलमूलानि प्रजानामभवत्तदा ।
कृच्छ्रेण महता युक्त इत्येवमनुशुश्रुम ॥ १३
संकल्पयित्वा वत्सं तु मनुं स्वायंभुवं प्रभुम् ।
स्वे पाणौ पुरुषव्याघ्र दुदोह पृथिवीं ततः ॥ १४
सस्यजातानि सर्वाणि पृथुर्वैन्यः प्रतापवान् ।
तेनान्नेन प्रजास्तात वर्तन्तेऽद्यापि नित्यशः ॥ १५
ऋषिभिः श्रूयते चापि पुनर्दुग्धा वसुंधरा ।
वत्सः सोमोऽभवत्तेषां दोग्धा चाङ्गिरसः सुतः ॥ १६
बृहस्पतिर्महातेजाः पात्रं छन्दांसि भारत ।
क्षीरमासीदनुपमं तपो ब्रह्म च शाश्वतम् ॥ १७
ततः पुनर्देवगणैः पुरंदरपुरोगमैः ।
काञ्चनं पात्रमादाय दुग्धेयं श्रूयते मही ॥ १८
वत्सस्तु मघवानासीद्दोग्धा तु सविता विभुः ।
क्षीरमूर्जस्करं चैव येन वर्तन्ति देवताः ॥ १९
पितृभिः श्रूयते चापि पुनर्दुग्धा वसुंधरा । C 373 B I 6 24 P I 6 24

117* नैव सत्यानृतं तत्र न लोभो न च मत्सरः ।
वैवस्वतेऽन्तरे तस्मिन्सांप्रते समुपस्थिते ॥

[L 1) D4 [ए]व (for [ए]त्र) K3 V3 सत्यानृते (for °नृत) D3 तात, D4 6 चैव (for तत्र) T3 न वै सत्यानृते चैव (for a) V3 [ए]व लोभो न (for लोभो न च) — (L 2) K2 4 तत्र, B3 Dn Ds D5 T3 चास्मिन् (for त°) K1 2 4 Dn2 D1 2 4 5 T4 साप्रत (for °ते)]

— c) Some Mss वैण्यात् (for वैन्यात) — d) G1 [ए]वास्य (for [ए]तस्य)

12 a) Ś1 तत्र (for the second यत्र) Ñ2 D5 6 T1 G1 2 M3 समं तस्या, D2 3 समत्वं स्याद् (D3 तु), T3 4 समत्व च (for समं त्वस्या) — b) Ś1 K2 D1 इहानघ, D3 नराधिप (for तदानघ) — d) K2 V3 T1 सं- (for नि-)

13 a) Ś1 K1. 2 आहारं, G1 3 5 °रा (for °र) — b) T2 G1 प्रजानामभवस्तथा. — c) Ś1 K1–3 Dn नित्यम्, Ñ1 2 D2 3 T G1 3 5 M4 युक्तम्; Ñ3 V1 D1 M2 3 युक्ता (for युक्त) — d) Ś1 परि- (for अनु-) K Ds D2 3 5 6 T1 4 G2 3 M2–4 शुश्रुम (for °म) G5 इत्येतदनुशुश्रुमः

14 a) K2 4 V1 D3 स (for सं-) D2 तं वत्सं (for वत्सं तु) — b) T2 G M2–4 स्वारोचिषं (for स्वायंभुवं) Ñ1 V1 प्रभु. (for प्रभुम्) — c) K1–3 Ñ2 3 Dn D2–4 T3 4 M3 स्व- (for स्वे) Ś1 -श्रेष्ठो, K1–3 Dn Ds -श्रेष्ठ, D5 -व्याघ्रो (for व्याघ्र) B3 D6 T1 2 G M4 स्वे पा(G1 M4 स्वपा)णौ पृथिवीं तां तु (B3 T2 G1 तात) — d) Ñ2 3 V1 D1–5 T3 4 पृथु, V2 3 प्रभु, B1 नृप (for तत) D6 T1 2 G M4 दुदोह स नराधिप

15 a) V1 3 यस्य (for सस्य-) M3 तत्र जातानि सस्यानि — b) D3 (marg as in text) प्राणायूंषि, some Mss पृथुर्वैण्यः (for °न्यः). — V D1 2 ins after 15ab. D5 after 15

118* सस्यानि तेन वै दुग्धा वैन्येनेयं वसुंधरा ।

[V1 3 दुग्धा वै (by transp), V2 दुग्धानि Some Mss वैण्येन V1 च, V3 [ए]व (for [इ]य) D1 2 वैन्येनेह महात्मना (for b)]

— c) G3 5 ततो (for तेन) M2 3 तेन (for [अ]न्नेन) K4 Ñ2 3 V D1 2 4 5 T3 G3 5 M2 सर्वा, G1 तावद्, M3 ते वै (for तात) T1 ततस्तेन प्रजा सर्वा — d) B Dn Ds D1 2 T1 G3 सर्वश (for नित्यश) Ś1 D6 G2 5 M2 4 वर्तयन्त्यद्य (D6 M4 °न्तेऽद्य) सर्व(Ś1 नित्य)श., K1 T3 4 वर्तयन्तेऽद्य (K1 °न्तेऽथ) नित्यश., T2 G1 वर्तन्ते चाद्य सर्वश

16 a) Ñ2 प्रयतैश् (for श्रूयते) T1 [ए]व (for [अ]पि) — d) K4 Ñ2 3 V1 2 B Ds D1 3 5 6 T2 G3 M2 3 तु (for च) V3 तथा, T1 स्मृत (for सुत)

17 a) D2 6 T1 2 G2 4 5 M4 बृहत्तेजा (for महातेजा) — b) G5 पर्णं (for पात्रं) K1 (*sup lin* as in text) चाभवत् (for भारत)

18 a) T1 अत (for तत.) K1–3 Dn G4 पुनर्देवगणैः सर्वैः

19 b) Ś1 K1–3 V3 Dn D1 T3 4 G2 4 च (for तु). K1–3 Ñ1 3 V1 B Dn Ds D3 T3 G3 5 M3 प्रभु, V3 स्वयम्; G1 भुवि (for विभु) — c) K2 D2 3 ऊर्जस्वलं (for °स्करं) D6 T1 2 4 G M4 लोके (for चैव) K3 क्षीरमूर्जस्वरं तोयं, T3 तत्क्षीरममृतं चैव — d) G5 वर्धन्ति (for वर्तन्ति) T2 G1 तेन वर्धन्ति देवता.; Bom and Poona eds वर्तन्ते येन देवता

20 a) B Ds दुग्धा, D2 वापि (for चापि) — b) B D3 देवी (for दुग्धा) — d) K3 वामित-; Dn चामित- (for अ°).

राजतं पात्रमादाय स्वधाममितविक्रमैः ॥ २०
यमो वैवस्वतस्तेषामासीद्वत्सः प्रतापवान् ।
अन्तकश्चाभवद्दोग्धा कालो लोकप्रकालनः ॥ २१
नागैश्च श्रूयते दुग्धा वत्सं कृत्वा तु तक्षकम् ।
अलाबुपात्रमादाय विषं क्षीरं नरोत्तम ॥ २२
तेषामैरावतो दोग्धा धृतराष्ट्रः प्रतापवान् ।
नागानां भरतश्रेष्ठ सर्पाणां च महीपते ॥ २३
तेनैव वर्तयन्त्युग्रा महाकाया महाबलाः ।
तदाहारास्तदाचारास्तद्वीर्यास्तदपाश्रयाः ॥ २४
असुरैः श्रूयते चापि पुनर्दुग्धा वसुंधरा ।
आयसं पात्रमादाय मायाः शत्रुनिबर्हणीः ॥ २५
विरोचनस्तु प्राह्रादिर्वत्सस्तेषामभूत्तदा ।
ऋत्विग्द्विमूर्धा दैत्यानां मधुर्दोग्धा महाबलः ॥ २६
तयैते माययाद्यापि सर्वे मायाविनोऽसुराः ।
वर्तयन्त्यमितप्रज्ञास्तदेषाममितं बलम् ॥ २७
यक्षैश्च श्रूयते राजन्पुनर्दुग्धा वसुंधरा ।
आमपात्रे महाराज पुरान्तर्धानमक्षयम् ॥ २८
वत्सं वैश्रवणं कृत्वा यक्षैः पुण्यजनैस्तथा ।
तेन ते वर्तयन्तीह परमर्षिरुवाच ह ॥ २९
राक्षसैश्च पिशाचैश्च पुनर्दुग्धा वसुंधरा ।

---

21 ^{a}) K1 3 योऽसौ, T1 ततो (for यमो) — ^{d}) D3 लोकालोक- (for कालो लोक-) T2 (*sup lin*) -प्रकालक.; T4 -प्रतापन: (for -प्रकालन.) T1 कालो लोकभूतानल

22 ^{a}) D3 5 तु (for च) — ^{b}) D3 transp वत्स and कृत्वा. B3 वासुकिम् (for तक्षकम्) — ^{c}) K3 Ñ3 V B1 2 Dn2 D3 5 T1 M2 अलाबुं (for °बु-) — ^{d}) T2–4 G2 4 विष- (for विषं)

23 ^{a}) D8 इरावतो (for ऐरा°) — ^{c}) K4 Ñ2 3 V D1, 2, 4, 5 कौरव- (for भरत-) — ^{d}) K4 Ñ2, 3 V D1 2 4–6 T G1, 3–5 महाद्युते (for महीपते)

24 ^{a}) Ś1 K1 3 Dn T1 ते (for [ए]व) — ^{b}) D4 दण्डकाया (for महा°) Ś1 K1–3 B3 Dn D6 विषोल्बणा (for महाबलाः). — ^{c}) G2 तदाकारास् (for °हारास्) D3 तदाधारास्; D6 G1 2 5 तदा(G1 °था)कारास् (for तदाचारास्) T2 तथाहारास्तथाकारास्, T3 तथाकारास्तथाहारास्. — ^{d}) Ś1 तद्वीर्यास्तत्पराक्रमाः, K2 3 Ñ2 V2 B1 3 Dn1 D1 2 5 6 T2–4 G M4 °स्तदुपाश्रयाः, D3 4 °स्ते (D4 °स्तु) तदाश्रयाः

25 T1 om. (hapl) 25^{c}–30^{b} — ^{d}) N (except Ś1 Ñ1) T2–4 G M4 मायां Some Mss -निबर्हणीम् and -निबर्हिणीम् (for °र्हणीः).

26 T1 om 26 (cf v. l 25) — ^{a}) D3 वैरोचनस् (for विरो°) K3 B1 Dn D8 M3 च (for तु) Some Mss प्राह्लादिर्. — ^{c}) K1 सम्यग्, T2–4 G1 वृत्रो, M4 तथा (for ऋत्विग्). D6 मूर्धा तु (for द्विमूर्धा). — ^{d}) Ñ3 V1 D3 6 T2, 4 G1 2, 4 5 M2 4 अभूद् (for मधुर्). ❀ C3 · मधुरेव दैत्यानामृत्विक्। स एव द्विमूर्धा। ❀

27 T1 om 27 (cf. v l. 25) — ^{a}) Ś1 K1–3 D6 T3 3 G4, 5 त एते, D3 तयैते, G1 तमेते, M3 तदेते (for तयैते). K4 ते मायामुपजीवन्ति. — ^{b}) K4 Ñ1 3 V2 B3 Ds1 D1 2 5 मायाविदो (for °विनो) D3 4 सर्वमायाविदोऽसुरा. — ^{c}) M2 5 [अ]नृत (for [अ]मित-) — ^{d}) M3 अनृत (for अमितं)

28 T1 om 28 (cf v l 25) — ^{a}) Ś1 K1 दुग्धा, K3 Ñ2 B1 तात, D3 M2 3 चापि (for राजन्) — D5 repeats 28^{b} after the second occurrence of 29^{b} — ^{b}) Ś1 तात, K1 राजन् (for दुग्धा) — ^{c}) K1 आमपात्रं (for °पात्रे) — ^{d}) M3 अन्तर्धानं पुराक्षयम्.

29 T1 om 29 (cf v l. 25) D5 reads 29^{ab} twice — ^{b}) Ñ3 V1 B3 D8 D1 T3 4 G2 4 तदा, D5 (second time) चैत्र (for तथा) K4 D2 4 5 (first time) दोग्धा तु (K4 D4 च) धनद. प्रभु — After the second occurrence of 29^{b}, D5 repeats 28^{b} K2 Ñ2, 3 V B Dn D8 D3 6 T2–4 G M4 ins after 29^{ab} D5 after the repetition of 28^{b}:

119* दोग्धा रजतनाभस्तु पिता मणिवरस्य यः ।
यक्षात्मजो महातेजास्त्रिशीर्षः सुमहातपाः ॥

[L 1) K2 चैव स्व-, D6 वे वत्स-, G2 राजत- (for र°). Ñ2 च (for तु) D5 6 T2 G2 5 मणिवरस्य; T3 4 °मयस्य (for °वरस्य) — (L 2) K2 V2 B2 G2 4 5 यक्षानुजो; G3 यक्षराजो (for यक्षात्मजो) V3 D6 त्रिशीर्षो मु-. T2 G1 त्रिशीर्षस्तु, G3-5 त्रिशङ्कुश्च (G4 °स्तु) (for त्रिशीर्ष मु-)] While D1 ins after 29^{ab}

120* दोग्धा तु धनदः स्वामिश्चैवं तैश्च वसुधरा ।

— ^{c}) Ñ1 G3 वै; G2 [ए]व (for ते) B1 3 D8 D5 6 T2–4 G1, 2 4, 5 M2–4 [इ]ति; B2 D3 [उ]ग्रा (for [इ]ह) — ^{d}) T2 G1 महर्षिभिर् (sic) (for परमर्षिर्) K3 Dn तदेषां परमं बलम्; B2 D8 उग्रकर्मपरायणाः.

30 T1 om. 30^{ab} (cf v. l. 25). Ś1 om. 30^{cd}; K1

शार्वं कपालमादाय प्रजा भोक्तुं नरर्षभ ॥ ३०
दोग्धा रजतनाभस्तु तेषामासीत्कुरूद्वह ।
वत्सः सुमाली कौरव्य क्षीरं रुधिरमेव च ॥ ३१
तेन क्षीरेण रक्षांसि यक्षाश्चैवामरोपमाः ।
वर्तयन्ति पिशाचाश्च भूतसंघास्तथैव च ॥ ३२
पद्मपत्रे पुनर्दुग्धा गन्धर्वैः साप्सरोगणैः ।
वत्सं चित्ररथं कृत्वा शुचीन्गन्धान्नरोत्तम ॥ ३३
तेषां च सुरुचिस्त्वासीद्दोग्धा भरतसत्तम ।
गन्धर्वराजोऽतिबलो महात्मा सूर्यसंनिभः ॥ ३४
शैलैश्च श्रूयते दुग्धा पुनर्देवी वसुंधरा ।
ओषधीर्वै मूर्तिमती रत्नानि विविधानि च ॥ ३५
वत्सस्तु हिमवानासीद्दोग्धा मेरुर्महागिरिः ।
पात्रं तु शैलमेवासीत्तेन शैलाः प्रतिष्ठिताः ॥ ३६
दुग्धेयं वृक्षवीरुद्भिः श्रूयते च वसुंधरा ।
पालाशं पात्रमादाय च्छिन्नदग्धप्ररोहणम् ।
दुदोह पुष्पितः सालो वत्सः प्लक्षोऽभवत्तदा ॥ ३७
सेयं धात्री विधात्री च पावनी च वसुंधरा ।
चराचरस्य सर्वस्य प्रतिष्ठा योनिरेव च ।
सर्वकामदुघा दोग्ध्री सर्वसस्यप्ररोहिणी ॥ ३८
आसीदियं समुद्रान्ता मेदिनीति परिश्रुता । C 394 B I 6 45 P I 6 45

---

reads it on marg —^{c}) K_1 $D_{1\,4}$ $T_{3\,4}$ Cs नैश, $K_{3\,4}$ V_3 (marg) नार, D_6 T_2 $G_{1\,2}$ M_4 पात्र, M_2 शिर.-, M_3 निजं (for शार्वं) ❋ Cs नैशं निशायां गृहीतम् । ❋ —^{d}) $K_{1\,2\,4}$ $\tilde{N}_2$ V_3 $D_{1\,4}$ प्रजां (for प्रजा) K_3 V_2 B_2 (marg as in text) $_3$ Dn Ds_2 D_3 T_4 M_4 नराधिप (for नरर्षभ)

31 ^{a}) $D_{4\,6}$ G_2 राजत- (for र°) —After 31^{a}, M_4 reads 33^{b}–35^{a} —^{b}) D_4 कुलोद्वह (for कुरू°) —^{d}) D_3 तु (for च)

32 ^{ab}) K_{1-3} Dn यक्षाश्च राक्षसाश्च, T_1 M_4 रक्षांसि राक्षसा(M_4 पिशाचा)श्च (for °सि यक्षाश्चैव) Dn M_2 [अ]-मरोपम —^{c}) M_4 महाराज (for पिशाचाश्च)

7 ^{a}) K1 ये (for ते). T1 G4, 5 M2 3 ऽत्यर्थं (for नित्यं) — ^{c}) V2 M1, 2 -पत्स्यन्ति , D2 3 लप्स्यन्ते ; D6 T1 2 G1, 2 4 M3 4 -पत्स्यन्ते , G3 5 -पद्यन्ते (for लप्स्यन्ति) — ^{d}) Ś1 K3 Dn स्वकर्मभि , T4 °णि ; M4 समाहिताः (for स्वकर्मणा)

8 ^{a}) D1 4 स्व- (for च) K2 4 Ñ V B Ds D1–4 T3 4 संप्राप्य (for प्राप्स्यन्ति) — M4 reads 8^{bc} for the first time after 5^{c} — ^{b}) K2 (marg as in text) -कृतं नृप , B1 -समाहितम् (for -कृतं पुनः) — After the repetition of 8^{bc}, M4 repeats 5^{d} — ^{c}) G4 -प्राप्य (for -प्राप्ताः)

9 ^{a}) K4 धर्मेषु (for धर्मे च) Ś1 वै बुद्धिर् ; K2 बुद्धिर्वा (for ते बुद्धिर्). — ^{b}) K2 4 Ñ V1. 2 B Ds D1–4 T2–4 G4 न संशयः ; D6 T1 G2–5 M समाहिता (for पुनः पुनः).

भूयः सिद्धिमनुप्राप्ताः स्थानं प्राप्स्यन्ति शाश्वतम् ॥ ८
एवं धर्मे च ते बुद्धिर्भविष्यति पुनः पुनः ।

योगधर्मे च निरतः प्राप्स्यसे सिद्धिमुत्तमाम् ॥ ९
योगधर्माद्धि धर्मज्ञ न धर्मोऽस्ति विशेषवान् ।

C 1032
B I. 19. 18
P I. 19 18

— Dn D5 repeat 9^{cd} after 282* — ^{c}) G3 हि (for च) K1 3 Dn D5 (last three both times) T1 नितरा (for निरतः) — ^{d}) Ś1 K3 T1 3 4 G3 बुद्धिम् (for सिद्धिम्) — K1 (marg) 2–4 Ñ2 3 V B Ds D1–4 6 T G1 3 4 ins after 9 Dn D5 after the first occurrence of 9^{cd}

281* योगो हि दुर्लभो नित्यमल्पप्रज्ञे कदाचन ।
लब्ध्वापि नाशयन्त्येन व्यसनै कटुतामिता ॥
अधर्मेष्वेव वर्तन्ते अर्दयन्ते गुरु सदा ।
याचन्ते न त्वयाच्यानि रक्षन्ति शरणागतान् ।
नावमन्यन्ति कृपणान्माद्यन्ते न धनोष्मणा ॥
युक्ताहारविहाराश्च युक्तचेष्टा. स्वकर्मसु ।
ध्यानाध्ययनयुक्ताश्च न नष्टानुगवेषिण ॥
नोपभोगरता नित्यं न मांसमधुभक्षणा ।
न कामपरमा नित्य न विप्रासेविनस्तथा ॥
नानार्यसंकथासक्ता नालस्योपहतास्तथा ।
नात्यन्तमानसंसक्ता गोष्ठीषु निरतास्तथा ।
प्राप्नुवन्ति नरा योगं योगो वै दुर्लभो भुवि ॥
प्रशान्ताश्च जितक्रोधा मानाहंकारवर्जिता ।
कल्याणभाजनं ये तु ते भवन्ति यतव्रता. ॥
एवंविधास्तु ते तात ब्राह्मणा ह्यभवंस्तदा ।
स्मरन्ति ह्यात्मनो दोषं प्रमादकृतमेव तु ।
ध्यानाध्ययनयुक्ताश्च शान्ते वर्त्मनि संस्थिता ॥

[(L 1) D6 राजन् (for नित्यम्) G1 योगा हि दुर्लभा नित्यम् (for ^{a}) K1 न साध्यते , K2 B3 कथचन (for कदा°) — (L 2) D3 4 लब्धो (for लब्ध्वा) K3 [ए]त , K4 [अ]न्ये , Ñ2 [ए]ते , Ñ3 V1 D3 [ए]व , V2 [ए]न (for [ए]न) K2 3 D2 व्यसनैरप(K2 °नै पटु)तापिता , K4 °नै कृटलापना , Ñ3 D1 G3 4 °नै कटुतापिता (D1 °न), Ds1 (inf lin) वचनैर्बहुतामिता , D3 विषयेषु सुकामिन , D4 व्यसनै कटुवासिता , D5 °नै कवचैर्हता , T2 °नै कटुवापिता , T3 °नै. कटुताडिता ; G1 °नै कुलवापिना (for ^{b}) — (L 3) D3 T G1 3 स्वकर्मेषु (for अ°) D1 च (for [ए]व) B3 D2 अर्दयन्ति ; Dn प्रार्दयन्ते , D3 आर्द्रि° , D4 अर्दयन्तो , T1 2 4 G1 3 4 अर्चयन्ति (for अर्दयन्ते) Ñ3 V1 B1 D6 T3 गुरून्सदा , B2 गुरूनपि (for गुरुं सदा) K1 अर्दयन्ति गुरु तथा , D3 °न्ति गुरून्सदा , D5 मर्दयन्ते गुरून्सदा (for ^{b}) — (L 4) D2 च , D3 [ए]व (for तु) K1 याचन्ते चैव याच्नापि , T3 °न्ते सत्त्वया वाचा (for ^{a}) — (L 5) K3 V3 Dn D5 T1 -जानन्ति (for -मन्यन्ति) Dn माद्यन्ति (for °न्ते) — (L 6) D3 6 T4 -विहारश् Ñ3 -चेष्ट (for -चेष्टा) Ñ2 B2 3 Ds D3 6 च कर्मसु , V2 ह्यक° (for स्वक°) — (L 7) D4 -निष्ठाश् (for युक्ताश्) D2 ध्यानाध्यापनयुक्ताश्च (for ^{a}) Ñ2 V B2 T3 4 G1 नष्टार्थ- D2 नित्यानु- (for नष्टानु-) D4 गुण्यान्गुण्यगवेषिण , T2 न नष्टार्थगवेषणा , G3 °र्थमपेक्षिण° (for ^{b}) — (L 8) K1 2 D1 -भक्षिण , Ñ3 V1 T2–4 G1 3 -भक्षका (for °णा) — (L 9) K3 अकाम- (for न काम-) K1 Ds 5 T1 न च कामपरा नित्य (for ^{a}) K1 3 न निद्रासेविनस्तथा , B1 (marg as above) 2 3 D6 न विप्रोत्सादिनस्तथा , D1 4 न प्रियासेविनस्तथा , D3 अविप्रा° (for ^{b}) — D3 om (hapl) lines 10–11 — (L 10) K4 न भार्या- , V1 नाकार्य- , D4 नानार्थ- (for नानार्य-) V2 नानार्थसगमासक्ता , T2–4 G1 3 न चार्य(T4 भार्या)सगमासक्ता (for ^{a}) — (L 11) K1 corrupt , Dn D6 [अ]त्यन्त (for °न्त-) Ñ3 -सक्ता वै , Dn2 -सत्यक्ता (for -ससक्ता) K2 4 न ह्यर्थे सा- (K4 °र्थेमा)नुषक्ता वै , K3 न ह्यनर्थसमायुक्ता , Ñ2 3 (marg) V न क्षुत्(V1 लवुत्)ण्गानुस(V1 °र)क्ता वै , B3 D5 न क्षुद्रमनुसक्ता वै , Ds1 D2 न द्यतमनुषक्ता वै , Ds2 (sup lin) नात्यन्तपानसक्ता वै , D1 नानुत्तमानुषक्ता वै , D4 न ह्यर्थमानसक्ता वै , T1 G3 नान(G3 °त्य)र्थमनुषक्ता वै , T2–4 G1 4 न ह्यर्थमनुषक्ता वै (for ^{a}) K3 Ñ2 3 V3 B1 Dn1 D6 [अ]निरताम् , D5 [अ]भि° (for निरतास्) G3 सदा (for तथा). — (L 12) D4 प्राप्नुवन्ते नरा योगान् (for ^{a}) T2 ऽपि , T4 ऽय (for वै) — (L 13) D2 जितकामा (for प्रशान्ताश्च) Ñ2 प्रशान्ता जितक्रोधाश्च (for ^{a}) — (L 14) V2 कल्याण B2 T2 G3 -भाजना , T4 -भाजिनो (for -भाजन) D6 यत्तु (for ये तु) D3 कल्याण भजमान ये (for ^{a}). K2 स- , Ds2 T1 G3 ये (for ते) Ds तरन्ति , D3 भजन्ति (for भवन्ति) K4 दृढव्रता , D2 4 जित° , D6 वृत° (for यत°) — (L 15) Ñ3 च (for तु) T1 ये (for ते) T3 ब्रह्मण्या (for ब्राह्मणा) K2–4 D1 2 T1 2 G1 सदा (for तदा) — (L. 16) D1 स्मरन्तो (for °न्ति) V2 प्रमाद , B2 °दात् (for °द-). T1 2 4 G1 3 4 तत् (for तु) — (L 17) V1 D3 शान्त- , T1 शान्ति- , G1 कान्ते (for शान्ते) D4 धर्मणि (for वर्त्मनि) Ds1 सस्तुता , D3 सुस्थिता (for स°)]
Dn D5 cont

282* शान्ति ते परमामाशु लभन्ते नात्र संशय ।
तस्मात्त्वमपि धर्मज्ञ योगधर्मपरो भव ॥

— After the above, Dn D5 repeat 9^{cd}

10 ^{a}) Ñ3 **धर्माद्धै**, V2 °**च**, G2 °**र्थे**- (for °**द्धि**). — Before 10^{c}, T4 ins **सनत्कुमार** — ^{c}) K1, 3 **विशिष्टं** ; K2 4 Ñ2 3 V1 3 B2 Dn D1 3–6 T G M1 2 4 **वरिष्ठः** (for °**ष्ठं**) D2 **वरिष्ठ सर्वमन्त्राणां**. — ^{d}) K1 3 **एवं भज**, Bom. and Poona eds. **एवाचर** (for **समाचर**).

वरिष्ठं सर्वधर्माणां तं समाचर भार्गव ॥ १०
कालस्य परिणामेन लब्धाहारो जितेन्द्रियः ।
तत्परः प्रयतः श्राद्धी योगधर्ममवाप्स्यसि ।
इत्युक्त्वा भगवान्देवस्तत्रैवान्तरधीयत ॥ ११
अष्टादशानां वर्षाणामेकाहमिति मे मतिः ।
उपासतश्च देवेशं वर्षाण्यष्टादशैव मे ॥ १२
प्रसादात्तस्य देवस्य न ग्लानिरभवत्तदा ।
न क्षुत्पिपासे कालं वा जानामि स्म तदानघ ।
पश्चाच्छिष्यसकाशात्तु कालः संविदितो मम ॥ १३

इति श्रीहरिवंशे चतुर्दशोऽध्यायः ॥ १४ ॥

१५

मार्कण्डेय उवाच ।
तस्मिन्नन्तर्हिते देवे वचनात्तस्य वै विभो ।
चक्षुर्दिव्यं सविज्ञानं प्रादुरासीन्ममानघ ॥ १
ततोऽहं तानपश्यं वै ब्राह्मणान्कौशिकात्मजान् ।
आपगेय कुरुक्षेत्रे यानुवाच विभुर्मम ॥ २
ब्रह्मदत्तोऽभवद्राजा यस्तेषां सप्तमो द्विजः ।
पितृवर्तीति विख्यातो नाम्ना शीलेन कर्मणा ॥ ३
शुकस्य कन्या कृत्वी तं जनयामास पार्थिवम् ।

---

11 Before 11, T_3 ins सनत्कुमार — ^{a}) K D_1 M_4 परिमाणेन (for °णामेन) — ^{b}) K_{2-4} V, D_1 T_1 $G_{1\,4\,5}$ लब्धाहारो (for लब्धा°) — ^{c}) D_3 मत्पर (for तत्पर) D_1 T_4 G_4 M_2 श्राद्धे, G_3 श्राद्धं (for श्राद्धी) T_2 $G_{1\,5}$ त्व (G_1 त) कुरु प्रयत. श्राद्धं — ^{d}) M_3 यशोधर्मम् (for योग°) $\tilde{N}_1$ अवाप्स्यति, Ds °थ (for °सि)

12 ^{a}) V_3 धर्माणाम् (for वर्षाणाम्) G_1 damaged from वर्षाणा up to तदानघ (in 13^d) $Ś_1$ तदष्टादशवर्षाणि, $K_{1\,3\,4}$ Dn D_5 G_3 अष्टादशैव वर्षाणि — ^{b}) D_5 त्वेकाहम् (for ए°) T_4 इव (for इति) G_2 गतम् (for मति) $Ś_1$ एकाहमिव चाभवत्, $K_{1\,3\,4}$ V_2 Dn M_3 त्वे(V_2 M_3 ए)काहमिव मेऽभवत्, D_6 $T_{1\,2}$ G_{3-5} $M_{1\,3\,4}$ ए(G_3 त्वे)काहमिव मे गतम् — ^{c}) $K_{1\,3}$ Dn $T_{2\,3}$ $G_{2\,4\,5}$ त, D_6 T_1 M_4 तु (for च) $Ś_1$ देवेशे; $K_{2\,4}$ $\tilde{N}_3$ (marg) $V_{1\,3}$ $D_{1\,2\,4\,5}$ तत्रैव, $\tilde{N}_1$ तत्रैवं, $\tilde{N}_3$ तेनैव, $B_{2\,3}$ Ds तं देव (for देवेशं) $\tilde{N}_2$ D_3 उपासितश्च तत्रैव, M_2 °सतस्तु तं देव, M_3 °गतस्य देवेशं — ^{d}) D_6 $G_{3\,5}$ M_4 [अ]ष्टादशानि (for °शैव) K_4 V_2 B_1 तु (for मे)

13 ^{b}) D_3 चाभवत् (for अ°) — ^{c}) V_2 क्षुत्पिपासां (for °से) — ^{d}) $Ś_1$ जानाम्यपि, $K_{2\,4}$ $\tilde{N}$ V B Ds $D_{3\,5}$ T_2 प्रत्यजानं, D_4 न प्रजान, D_2 प्रत्यजानत्, G_5 जानाति स्म, M_4 न जानामि (for जानामि स्म) M_3 कदाचन (for तदानघ) T_3 जाताः स्म मम चानघ, T_4 प्रत्यजानन्त भूयश (sic), G_2 जाता न स्म ममानघ. — ^{e}) $\tilde{N}_1$ -सकाशं (for °शात्) K_1 च; B_1 वै (for तु). — ^{f}) Ds_1 कालं (for कालः) $K_{2,4}$ $\tilde{N}_3$ V $B_{2\,3}$ D_2 T_3 G_4 $M_{1,2}$ स; B_1 $D_{3,5}$ च; Ds_1 मे (for सं) T_2 वेदितो (for वि°) N (except $Ś_1$ D_6) $T_{3\,4}$ M_2 मया (for मम)

Colophon — *Mention of the Epic*: K_3 Ds_2 — *Mention of Khila*: $Ś_1$ K_3 V_3 B Ds $D_{1\,3\,4\,6}$ — *Adhy. name*: N M_4 पितृकल्प — *Adhy. no.* (figures, words or both): K_1 15, K_3 $D_{1\,4}$ $T_{1\,2}$ G M 17, $\tilde{N}_3$ V_1 D_3 18, $V_{2\,3}$ $B_{1\,2}$ Dn Ds_2 19, $D_{2\,6}$ $T_{3\,4}$ 20 — *Śloka no.*: Dn_1 Ds_2 22, D_2 23, D_6 21

15

1 K_1 om. the ref. — ^{b}) $Ś_1$ $K_{1\,3}$ Dn_2 $T_{3\,4}$ $G_{2\,5}$ M_4 प्रभो, $\tilde{N}_{2\,3}$ $V_{1\,2}$ $B_{1\,2}$ Dn_1 $D_{1\,5}$ T_2 $G_{1\,3}$ $M_{1\,2}$ विभो, $D_{2\,3}$ प्रभो (for विभो) — ^{d}) $K_{2,4}$ $\tilde{N}$ V B D (except D_6) $T_{3\,4}$ तदा मम, G_5 तदानघ (for ममानघ)

2 ^{c}) T_2 यानुवाच (for आपगेय) V_1 कुरुश्रेष्ठ (for °क्षेत्रे) — ^{d}) $\tilde{N}_1$ मामुवाच, T_3 ह्यापगेय (for यानुवाच) $Ś_1$ $G_{2\,3\,5}$ $M_{2\,4}$ गुरुर् (for विभुर्) B_1 तदा (for मम) T_2 G_1 यानवोचत्पुरा मम

3 ^{b}) K_4 सोमपो (for सप्तमो) — ^{c}) M_4 चक्रवर्ती (for पितृ°) $Ś_1$ D_5 T_2 M_3 तु (for [इ]ति) — ^{d}) D_3 [आ]मित्तेन (for शीलेन) T_3 महता स्वेन कर्मणा

4 Before 4, K_1 ins भीष्म उवाच — ^{a}) T_4 corrupt K_2 $\tilde{N}_{1\,3}$ $V_{1\,3}$ Ds_1 $D_{2\,4}$ तु, M_1 यज् (for तं) D_6 $T_{1\,2}$ $G_{1\,3-5}$ M_1 शुककन्या कीर्तिमती — ^{b}) M_2 भूमिपम् (for पार्थिवम्) — ^{c}) K_2 D_4 -श्रेष्ठं (for -श्रेष्ठान्) — ^{d})

अणुहात्पार्थिवश्रेष्ठात्काम्पिल्ये नगरोत्तमे ॥ ४
युधिष्ठिर उवाच ।
अणुहः कस्य वै पुत्रः कस्मिन्काले बभूव ह ।
राजा धर्मभृतां श्रेष्ठो यस्य पुत्रो महायशाः ॥ ५
ब्रह्मदत्तो नरपतिः किंवीर्यश्च बभूव ह ।
कथं च सप्तमस्तेषां संबभूव नराधिपः ॥ ६
न ह्यल्पवीर्याय शुको भगवाँल्लोकपूजितः ।
कन्यां प्रदद्याद्योगात्मा कृत्वीं कीर्तिमतीं प्रभुः ॥ ७
एतदिच्छाम्यहं श्रोतुं विस्तरेण महाद्युते ।
ब्रह्मदत्तस्य चरितं तद्भवान्वक्तुमर्हति ॥ ८
यथा च वर्तमानास्ते संसारेषु द्विजातयः ।
मार्कण्डेयेन कथितास्तद्भवान्प्रब्रवीतु मे ॥ ९
भीष्म उवाच ।
प्रतीपस्य स राजर्षे तुल्यकालो नराधिपः ।
पितामहस्य मे राजन्बभूवेति मया श्रुतम् ॥ १०
ब्रह्मदत्तो महाराजो योगी राजर्षिसत्तमः ।
रुतज्ञः सर्वभूतानां सर्वभूतहिते रतः ॥ ११
सखा हि गालवो यस्य योगाचार्यो महायशाः ।
शिक्षामुत्पाद्य तपसा क्रमो येन प्रवर्तितः ।
कण्डरीकश्च योगात्मा तस्यैव सचिवोऽभवत् ॥ १२
जात्यन्तरेषु सर्वेषु सहायाः सर्व एव ते ।
सप्तजातिषु सप्तैव बभूवुरमितौजसः ।	C 1051 B I 20 14 P I 20 14

M1 3 कास्विल्ये (for काम्पिल्ये) — After 4, N (except Ś1 Ñ1 D1) T2 4 G4 ins

283*	भीष्म उवाच ।
यथोवाच महाभागो मार्कण्डेयो महातपा ।
तस्य वंशमहं राजन्कीर्तयिष्यामि तच्छृणु ॥

[K1 Ñ2 3 V1 3 B Ds G4 om the rest K3 सौतिर् (for भीष्म) — (L 1) D6 महाभाग — (L 2) B3 वंशे महा- (for वंशमहं) Ñ2 3 V B1 2 D2 4–6 महान् (for राजन्) K1 3 Ñ2 3 V1 D4 T4 त (for तच्)]

5 a) Ds1 पुत्रस्तु (for वै पुत्र) — b) T2 लोके (for काले)

6 a) T3 4 (marg as in text) ब्रह्मपुत्रो (for °दत्तो) K2 4 Ñ2 3 V D1–4 T3 4 sथ नृ (for नर-) — b) K3 Dn किंवीर्यः स, K4 D1 किंधर्मश्च (for किंवीर्यश्च) D6 S किंवीर्यः किंपराक्रमः — c) T2 G1 कथंचित्, M4 कथं स (for कथं च) T1 संमतस् (for सप्तमस्) — d) K1 बभूव च, K2 B2 3 Ds बभूव स, K4 Ñ V1 3 B1 Dn D1–5 T3 4 G2–5 स बभूव (for संब°)

7 Dn2 om 7–8 — a) T4 [अ]ल्पविद्याय (for °वीर्याय) — c) D5 M4 प्रादाद्यद् (for प्रदद्याद्) T1 G2 4 लोकात्मा (for योगात्मा) — d) D3 T1 2 G1 2 4 5 M1 2 (inf lin) 3 4 शुभां (for कृत्वीं) K3 Ñ2 कीर्तिमतां (for °तीं) B3 विभु (for प्रभु)

8 Dn3 om 8 (cf v 1 7) — a) K3 तदिच्छामि ह्यहं श्रोतुं — b) Ñ2 V3 T3 G1 महामते, T2 (also) °मता (for °द्युते) — d) K3 D1 T1 M4 अर्हसि (for °ति) D4 भवान्वक्तुमिहार्हति

9 b) K1 3 D4 G3 संसारे च, D5 °रे तु (for °रेषु) Ś1 द्विजोत्तमा (for द्विजातय) — c) Ñ2 T3 G1 5 M4 कथितं (for °तास्)

10 a) K2 4 Ñ3 V B Dn Ds D1–5 T1 3 G4 M2 तु, Ñ2 T4 च, D6 T2 G1–3 5 M1 3 4 [ए]व (for स) — b) K1 M1 3 कालं (for कालो) K3 V3 D2 4 T1 4 M नराधिप — c) Ś1 [इ]ति (for मे) — d) D3 यथा (for मया)

11 a) Ś1 K1 3 (marg) B1 2 Dn D6 T G M2 4 महाभागो, K2 4 D1–5 M1 °राज (for °राजो) — b) K2 V2 3 Dn1 Ds1 D1 4 सत्तम, D3 -संमत (for -सत्तम) — c) K4 तत्त्वज्ञ, T3 4 सर्वज्ञ (for रुतज्ञ) Ñ2 जन्तूनां (for -भूतानां)

12 a) K3 M1 corrupt K2 4 Ñ V B Dn D1–3 5 T3 G2 4 च, D4 [अ]स्य, D6 T1 2 4 G1 3 5 M2–4 तु (for हि). — b) Ñ3 (marg as in text) V1 (sup lin as in text) महाबल, D6 T1 2 4 G M °तपा (for °यशा) — c) V2 सहसा, D5 तरसा (for तपसा) — d) D3 विवर्तित, T3 4 प्रकां° (for प्रव°) — e) K2 Dn2 M2 कुण्डरीकश्च, K4 G2 कण्डीर°, Ñ2 V2 3 D3 कण्डरीषश्च, B1 D4 6 T3 पुण्डरीकश्च (for कण्डरी°) G1 तु योगात्मा, M1 तु धर्मात्मा (for च योगात्मा) — f) T1 स द्विजो (for सचिवो) D5 G5 महान् (for ऽभवत्)

13 b) K2 4 Ñ2 V1 3 D1–5 T1 3 4 G3 सखाय (for महाया). — c) B2 D6 T1 2 G1 3 5 M2 3 सप्तैते, G2 सर्वे ते (for सप्तैव) — e) K Ñ V2 3 B Dn Ds D1 2 4 5

यथोवाच महातेजा मार्कण्डेयो महातपाः ॥ १३
तस्य वंशमहं राजन्कीर्तयिष्यामि तच्छृणु ।
ब्रह्मदत्तस्य पौराणं पौरवस्य महात्मनः ॥ १४
पुरुमित्रस्य दायादो राजा बृहदिषुर्नृप ।
बृहद्धनुर्बृहदिषोः पुत्रस्तस्य महायशाः ।
बृहद्धर्मेति विख्यातो राजा परमधार्मिकः ॥ १५
सत्यजित्तस्य तनयो विश्वजित्तस्य चात्मजः ।
पुत्रो विश्वजितश्चापि सेनजित्पृथिवीपतिः ॥ १६
पुत्राः सेनजितश्चासंश्चत्वारो लोकसंमताः ।
रुचिरः श्वेतकाश्यश्च महिम्नारस्तथैव च ।
वत्सश्चावन्तको राजा यस्यैते परि वत्सकाः ॥ १७
रुचिरस्य तु दायादः पृथुषेणो महायशाः ।
पृथुषेणस्य पारस्तु पारान्नीपोऽथ जज्ञिवान् ॥ १८
नीपस्यैकशतं तात पुत्राणाममितौजसाम् ।
महारथानां राजेन्द्र शूराणां बाहुशालिनाम् ।
नीपा इति समाख्याता राजानः सर्व एव ते ॥ १९
तेषां वंशकरो राजा नीपानां कीर्तिवर्धनः ।
काम्पिल्ये समरो नाम स चेष्टसमरोऽभवत् ॥ २०

T_4 G_2 महाभागो, $\tilde{N}_3$ (marg) V_1 T_3 °योगी (for °तेजा)

14 K_3 om 14 —^{a}) $K_{2\,4}$ $\tilde{N}_1$ $V_{2\,3}$ B Dn $D_{1\,2\,4\,5}$ अहं ब्रह्मन्, D_6 T_2 $G_{1\,3}$ M_4 महाराज (for अहं राजन्) —^{b}) $\tilde{N}_1$ ते शृणु, $\tilde{N}_2$ $V_{1\,3}$ B_3 D_5 तं शृणु, D_6 $T_{1\,2}$ $G_{1\,3-5}$ $M_{3\,4}$ सवंश ; M_1 तेऽनघ (for तच्छृणु) —^{c}) D_3 पुत्राणां, D_6 M_{1-3} शूरस्य (for पौराणं) D_4 चरित्रं ब्रह्मदत्तस्य — $K_{1.4}$ $\tilde{N}_3$ V $B_{1\,2}$ D_5 D_{2-6} M_4 ins after 14 $\tilde{N}_2$ B_3 after 15^{ab} :

284* बृहत्क्षत्रस्य दायाद सुहोत्रो नाम धार्मिक ।
सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह ।
तेनेदं निर्मितं पूर्वं पुरं वै हस्तिनापुरम् ॥
हस्तिनश्चापि दायादास्त्रय. परमधार्मिका ।
अजमीढो द्विमीढश्च पुरुमीढस्तथैव च । [5]
अजमीढस्य धूमिन्या जज्ञे बृहदिषुर्नृप ॥

[K_4 M_4 om lines 1–5 $\tilde{N}_2$ om line 1 — (L 1) $V_{1\,3}$ B_3 बृहत्क्षेत्रस्य D_8 पार्थिव (D_{S2} °व) (for धार्मिक) — (L 2) $\tilde{N}_2$ D_3 च, $V_{1\,3}$ तु (for [अ]पि). — (L 3) D_5 येन (for तेन) D_8 दिव्यं (for पूर्वं) K_1 D_8 हस्तिना (for पुरं वै). $\tilde{N}_3$ V_1 पुरं वै नागसाह्वयम्, D_4 हस्तिनापुरमुत्तमम् (for ^{b}). — (L. 4) B D_5 D_6 [ए]व (for [अ]पि) — (L 5) K_1 $\tilde{N}_3$ V_1 D_{2-4} पुरमीढम — D_6 om line 6. — (L. 6) $\tilde{N}_3$ (marg as above) M_4 दायादो (for धूमिन्या). K_1 D_3 पुरमीढस्य दायादो (for ^{a}) K_1 $\tilde{N}_3$ V_1 D_3 M_4 राजा (for जज्ञे) K_1 स्मृत, $\tilde{N}_3$ B_1 D_8 D_{2-4} नृप: (for नृप) B_2 पुरुमित्रो बभूव ह (for ^{b})]

15 K_1 $\tilde{N}_3$ V B_1 D_8 $D_{3\,5}$ M_4 om (hapl) 15^{ab} D_2 transp 15^{ab} and 15^{cd} D_4 reads 15^a–17^d on marg —^{a}) Dn_1 D_1 T_4 G_5 पुरमित्रस्य, M_3 कुरु° (for पुरु°) — T_4 om 15^b —^{b}) B_2 जज्ञे, T_2 राजन् (for राजा) $Ś_1$ K_3 Dn स्मृत, K_4 $\tilde{N}_1$ B_2 $D_{1\,2}$ T_2 $G_{1\,5}$ M_3 नृप: (for नृप). $\tilde{N}_2$ B_3 बृहत्क्ष(B_3 °त्क्षे)त्र इति स्मृत.. — After 15^{ab}, $\tilde{N}_2$ B_3 ins 284* S_1 om (hapl) 15^{cd} —^{d}) G_4 पुत्रस्य च (for °स्तस्य) D_2 महातपा, T_4 °त्मन (for °यशा). — For 15^{cd}, T_3 subst

285* आसीद्बृहदिषो. पुत्रो बृहद्धर्मेति विश्रुत ।

—^{e}) K_3 बृहद्धर्मेषु विख्यातो, T_3 °द्धनुश्च विख्यातो

16 ^{a}) D_{S1} हव्यजित्, G_5 सत्यवित् (for °जित्) K_3 Dn D_5 T_3 G_{2-4} सत्यजित्तनयस्तस्य — G_2 om (hapl ?) 16^{cd} —^{c}) G_4 [आ]सीत् (for [अ]पि) —^{d}) D_{1-3} श्येनजित् (for सेन°) $M_{1\,3}$ सेनाजित्पृथिवीपते, M_2 सेनाजित्परवीरहा

17 ^{a}) D_{1-3} श्येनजितश् (for से°) B_2 T_2 $G_{1-3\,5}$ M_4 [अ]पि (for [आ]सञ्) —^{b}) $K_{1\,2\,4}$ $\tilde{N}_2$ V_3 D_{1-6} S विश्रुता, K_3 Dn -सत्तमा, $\tilde{N}_3$ V_1 -पूजिता (for -संमताः) —^{c}) $Ś_1$ श्वेतकक्षश्, $K_{1\,3}$ श्वेतकाक्षश्, K_1 (*sup lin*) श्रुतकेतुश्, $K_{2\,4}$ $\tilde{N}_{2\,3}$ V B_2 Dn D_8 D_{1-5} $T_{1\,3\,4}$ $G_{3.4}$ श्वेतकेतुश्, M_4 °कार्यश् (for °काश्यश्) —^{d}) K_2 महिम्ना च, D_1 °नारस्, D_4 °स्तारस्, T_1 °तारस् (for °म्नारस्) —^{e}) $\tilde{N}_3$ V_1 $D_{1\,6}$ G_5 $M_{1.3}$ [अ]वन्तिको, T_2 $G_{1\,2}$ [आ]पन्तिको, G_4 [आ]रन्तिको (for [आ]वन्तको) T_3 वत्सकावन्तिको राजा. —^{f}) D_6 G M तस्य (for यस्य) M_4 [अ]नु (for [ए]ते). $\tilde{N}_3$ D_8 $G_{2\,3.5}$ M_4 वत्सरा., D_4 $T_{1\,2}$ $G_{1.4}$ -वंशजाः, $M_{1.2}$ (*inf lin*) $_3$ -वासिनः, M_2 -वासकाः (for वत्सका)

18 ^{a}) K_2 च (for तु) G_3 रुचिराश्वस्य दायादः —^{b}) Some Mss पृथुसेनो (for °षेणो) V_2 B D_8 महातपाः (for °यशा.) —^{c}) Some Mss पृथुसेनस्य D_4 दायादः, G_1 पौरस्तु (for पारस्तु) —^{d}) $Ś_1$ K_3 B_1 Dn D_5 $T_{2\,3}$ $G_{2.4}$ तु; K_1 च; V_2 ऽपि (for ऽथ) D_4 पार इत्यधिभीयते — After 18, D_4 ins

286* पारस्य तनयः श्रीमान्नीपो नाम महायशाः ।

19 ^{a}) T_2 G_1 नीपकस्य (for °स्यैक-) K_1 V_2 राजन् (for तात).

समरस्य परः पारः सदश्व इति ते त्रयः ।
पुत्राः परमधर्मज्ञाः पारपुत्रः पृथुर्बभौ ।। २१
पृथोस्तु सुकृतो नाम सुकृतेनेह कर्मणा ।
जज्ञे सर्वगुणोपेतो विभ्राजस्तस्य चात्मजः ।। २२
विभ्राजस्य तु पुत्रोऽभूदणुहो नाम पार्थिवः ।
बभौ शुकस्य जामाता कृत्वीभर्ता महायशाः ।। २३
पुत्रोऽणुहस्य राजर्षिर्ब्रह्मदत्तोऽभवत्प्रभुः ।
योगात्मा तस्य तनयो विष्वक्सेनः परंतपः ।। २४
विभ्राजः पुनराजातः सुकृतेनेह कर्मणा ।
ब्रह्मदत्तस्य तनयो विष्वक्सेन इति श्रुतः ।। २५
विष्वक्सेनस्य पुत्रोऽभूद्दण्डसेनो महीपतिः ।
भल्लाटश्च कुमारोऽभूद्राधेयेन हतः पुरा ।। २६
दण्डसेनात्मजः शूरो महात्मा कुलवर्धनः ।
भल्लाटपुत्रो दुर्बुद्धिरभवज्जनमेजयः ।। २७ C 1071 B 1 20 33 P 1. 20 33

20 ^{a}) B2 3 Ds एषां (for तेषां) K3 राजन् (for राजा) — M3 om 20^{c}–22^{d} — ^{c}) M1 2 काम्बिल्ये (for काम्पिल्ये) — ^{d}) D1 स ज्येष्ठ, D6 G3 4 M3 4 सदेष्ट- (for स चेष्ट-)

21 M3 om 21 (cf v l 20) — ^{a}) D2 समरात्तु (for °रस्य) D5 [अ]पर· (for पर) K2 B3 समस्य पार· सपा(B3 सत्पा)र, K4 Ñ1 D4 M1 2 समरस्य पार संपार (hypermetric), D3 T1 2 G समरात्पार सपा(T2 G1 °वा)र, M4 समरात्पारपु पारः (sic) — ^{b}) T2 G1 सदश्वा (for °श्व) T3 समराश्च इति त्रय — ^{d}) Ś1 K4 B2 Dn T4 पर·, D6 पर (for पार·) M1 प्रथिर् (for पृथुर्) T3 विभु, T4 विभो (for बभौ)

22 M3 om 22 (cf v l 20) — ^{a}) Ś1 om तु Ś1 सुकृतिर्, K1 3 D1 °ती (for °तो) — ^{b}) V3 स्वकृतेन (for सु°). Ś1 [ए]व, D6 T1 2 G3 5 M1 4 च (for [इ]ह) — ^{c}) D6 T1 2 G M1 2 4 पुत्र. (for जज्ञे)

23 ^{b}) Ś1 K1 Ñ1 धार्मिक, B Ds नामत (for पार्थिव.) — ^{c}) T3 आसीच् (for बभौ) D3 (marg as in text) या कन्या (for जामाता). M3 अणुह शुकजामाता — ^{d}) Ś1 कृत्व्या भर्ता; K4 कृत्वीभार्यो, Ñ2 V3 कृत्वी भार्या, T1 G4 5 कीर्त्या कान्त्या; T2 G1 M3. 4 कीर्त्या भर्ता, T4 G2 कीर्तेर्भर्ता (for कृत्वीभर्ता) — After 23, G2 reads lines 2–3 of 291*

24 ^{a}) V2 B1 3 Dn Ds सुतो (for पुत्रो) K2 4 Ñ2 3 D1–5 अणुहस्य सुतो राजा, Ñ1 T1 2 G1 3–5 M अणुहस्य पुत्रो राजर्षि(T2 G1 राजार्षे-, M4 ब्रह्मर्षि)र् (hypermetric); D6 G2 अणुहपुत्रो राजर्षिर्, T3 4 अणुहस्य तु दायादो — ^{b}) Ś1 K2 4 Ñ2 3 V1 3 D1–5 T3 4 बभूव ह, T2 G1 महाप्रभु· (for ऽभवत्प्रभु.) — M4 om 24^{c}–25^{b} — ^{d}) S1 इति स्मृत; K2 इति श्रुतिः; V2 महातपा, D6 T1 2 G1–3 5 M1–3 ऽभवन्नृप, G4 महानृप· (for परंतप.). — After 24, K2 ins. 287*.

25 M4 om 25^{ab} (cf v l 24) Ś1 K2 om (hapl) 25 — ^{a}) K1 3 V2 Dn D1 5 T1 3 4 G3 4 आयात (for आजात). — ^{b}) Ñ1 V2 3 B1 2 Dn Ds T1–3 G1 3–5 M1 2 स्वकृतेन (for सु°) T1 [ए]व (for [इ]ह) — T1 2 G1 4 5 repeat 25^{cd} after 287*. — ^{c}) Ñ2 V2 B Dn Ds D5 T1 (first time) 3 4 G3 4 5 (last two first time) पुत्रोऽन्य, T2 G1 (both first time) पुत्रोऽस्य, M4 दायादो (for तनयो) — ^{d}) Ñ2 3 V B Dn Ds D2 4–6 T1 2 (both first time) 3 4 G1 (first time) 3 4 5 (last two first time) सर्वसेन (for विष्वक्सेन) K1 3 Dn इति स्मृत·, Ñ2 D1 T1 (second time) इति श्रुति, M4 बभूव ह (for इति श्रुत) — K1 3 4 Ñ2 3 V B Dn Ds D1 3–6 T3 4 G3 ins after 25 K2 after 24 T1 2 G1 4 5 after the first occurrence of 25^{cd}

287* चक्षुषी तस्य निर्भिन्ने पक्षिण्या पूजनीयया ।
सुचिरोषितया राजन्ब्रह्मदत्तस्य वेश्मनि ॥

[(L 1) K3 Dn यस्य (for तस्य) D3 भिन्नेऽथ, T2 G1 4 निविण्णे, G3 5 निर्भिण्णे (for °न्ने) —(L 2) T2 G1 4 5 चात्मानि, T3 4 मित्रया (for वेश्मनि)]

— After the above, T1 2 G1 4 5 repeat 25^{cd} While K4 Ñ2 3 V B Dn Ds D4 6 G3 cont after 287*

288* अथास्य पुत्रस्त्वपरो ब्रह्मदत्तस्य जज्ञिवान् ।
विष्वक्सेन इति ख्यातो महाबलपराक्रम ॥

26 ^{a}) D6 T1 2 G M1–3 पुत्रस्तु, M4 दायादो (for पुत्रोऽभूद्) — ^{b}) Ś1 महासेनो, K2 दत्त°, Dn1 अज° (for दण्ड°) K3 महीपते, Ds2 °पते·, D6 बभूव ह (for महीपति) S (except T3 4) उदक्सेनो बभूव ह (M4 °नोऽभवन्नृप). — After 26^{ab}, T2 G1 read 27^{ab}. — ^{c}) Ś1 K1 3 Dn D1 भल्लाटोऽस्य, K2 B3 °टस्य, D3 °टक- (for °टश्च) D6 T G M1–3 भल्लाटस्तस्य पुत्रस्तु (T3 4 पुत्रोऽभूद्), M4 भल्लस्तस्य तु पुत्रोऽभूद् — ^{d}) K4 D3 गाधियेन (for राधेयेन)

27 T2 G1 read 27^{ab} after 26^{ab} — ^{a}) T1 2 G1 4 M उदक्सेनात्मज. शूरो· — ^{b}) D6 T1 2 G M2 3 बलो (G2

स तेषामभवद्राजा नीपानामन्तकृन्नृपः ।
उग्रायुधेन यस्यार्थे सर्वे नीपा विनाशिताः ॥ २८
उग्रायुधः स चोत्सिक्तो मया विनिहतो युधि ।
दर्पान्वितो दर्परुचिः सततं चानये रतः ॥ २९

युधिष्ठिर उवाच ।

उग्रायुधः कस्य सुतः कस्मिन्वंशेऽथ जज्ञिवान् ।
किमर्थं चैव भवता निहतस्तद्ब्रवीहि मे ॥ ३०

भीष्म उवाच ।

अजमीढस्य दायादो विद्वान्राजा यवीनरः ।
धृतिमांस्तस्य पुत्रस्तु तस्य सत्यधृतिः सुतः ॥ ३१
जज्ञे सत्यधृतेः पुत्रो दृढनेमिः प्रतापवान् ।
दृढनेमिसुतश्चापि सुधर्मा नाम पार्थिवः ॥ ३२
आसीत्सुधर्मणः पुत्रः सार्वभौमः प्रजेश्वरः ।
सार्वभौम इति ख्यातः पृथिव्यामेकराट् तदा ॥ ३३
तस्यान्ववाये महति महान्पौरवनन्दनः ।
जज्ञे संनतिमान्राजा संनतिर्नाम वीर्यवान् ॥ ३४
तस्य वै संनतेः पुत्रः कार्तो नाम महाबलः ।
बभूव येन विक्रम्य पृषतस्य पितामहः ।

घरो, G3–5 बालो) नाम महाबल , M1 बल्लाटो वै महाबल , M4 महातेजा महाबल . — c) T2 G1 भल्लातकस्य दुर्बुद्धेर्, G4 °टस्य च दुर्बुद्धिर्, M4 भल्लपुत्रो बलो नाम — d) Ñ2 V B Dn Ds T1. 3 4 G3–5 अभवच्च युधिष्ठिर

28 a) G4 एतेषाम् (for स तें°) — b) Ś1 V2 B D5 6 अन्तको , G6 अभिकृन् (for अन्तकृन्) K2 B3 D1 3–6 T1 3 G2–4 M2 3 नृप (for नृप.) M4 नीपानामन्तिमो नृप — c) D3 नीपार्थे , D6 om , T1–3 G1 3 5 M1 3 4 वीरेण (for यस्यार्थे) — d) D4 नीपा सर्वे (by transp)

29 a) K2. 4 Ñ2 3 V B1 2 (marg as in text) 3 D T3 4 G4 मदोत्सिक्तो , T1 G1 5 स चोद्युक्तो , T2 G2 3 स चोद्रिक्तो , M4 सहोद्रिक्तो (for स चोत्सिक्तो) — b) G2 वै (for वि-) M3 रणे (for युधि) — c) D6 दर्पाविष्टो (for °न्वितो) Ds -रति (for -रुचि) — d) K4 [अ]प्रिये (for [अ]नये).

30 a) T4 पुत्र (for सुत.) — b) V1 कस्य (कस्मिन्) M4 देशे (for वशे) Ñ1 V2 B1 (marg) 2 3 स, D5 च , D6 T1. 2 G3. 5 M3 4 प्र- (for ऽथ) D6 जग्मिवान् (for जज्ञि°). — c) Ñ1 किमर्थं भवता वापि — d) K2 4 Ñ2 3 V1 3 D1–6 T1 2 4 G M वदस्व, V2 ब्रवीतु (for °हि) Ś1 हतस्तत्प्रब्रवीहि मे , K1 3 Dn निहतो ब्रूहि तन्मम

31 Ś1 lacuna for 31^{a} — a) T2 G1 M3 4 आजमीढस्य — c) V2 D3 पुत्रोऽभूत् , M2 तनयस् (for पुत्रस्तु) D2 धृतिमानस्य पुत्रस्तु

32 a) D6 T2 G1. 2 तस्य (for जज्ञे) — Ś1 Ñ1 M1–3 om (hapl) 32^{b}–33^{a} — b) K1 दृढसेनः ; T2 °नेम (for °नेमि·) — B3 om 32^{cd} — c) K1 दृढसेन· ; T1 दृढनेमे· , T2 °नेम- (for °नेमि·) — d) Ñ3 (marg as in text) T3 4 सुधन्वा , D6 धर्मात्मा (for सुधर्मा) K2. 3 पार्थिव , V2 B1. 2 Ds धार्मिकः , G1 वीर्यवान् (for पार्थिव) T1 G3. 5 सुधर्माणः (T1 °र्मा तु) प्रतापवान् , T2 धर्मात्मा नाम वीर्यवान्

33 Ś1 Ñ1 M1–3 om 33^{a} (cf v l 32) D4 reads 33^{a}–34^{b} on marg — a) Ñ3 (marg as in text) T3 4 सुधन्वन. , T2 G1 धर्मात्मज (for सुधर्मण) — b) S1 M3 प्रजाहित. , Ñ1 B Ds प्रजापति , V2 D6 T2 G M1 3. 4 प्रतापवान् (for प्रजेश्वरः) — c) M1 2 महात्मा धर्मशीलश्च — d) Ś1 D1 अकरोद् (for एकराट्) K1–3 Ñ V B D (except D6) T4 विभुः , K4 प्रभु , T3 G2 4 भुवि (for तदा)

34 a) K4 [अ]न्वये च (for [अ]न्ववाये) T3 मतिमान् (for महति) — b) K4 D6 T1 2 G1 2 4 5 M3 4 कौरव- (for पौ°) K4 Ñ2 Dn2 D5 6 T1 G3 4 M नन्दन , Ds -वंशज (for -नन्दन.) Ñ1 V2 महापौरववंशज — K2–4 Ñ3 s V B D T G M4 ins after 34^{ab} K1 after the first occurrence of 34^{cd}

289* महतश्चापि पुत्रस्तु नाम्ना रुक्मरथ. स्मृतः ॥
पुत्रो रुक्मरथस्यापि सुपार्श्वो नाम पार्थिवः ।
सुपार्श्वतनयश्चापि सुमतिर्नाम धार्मिक. ॥

[(L 1) K1 4 D1 4 5 [ए]व (for [अ]पि) G5 च (for तु) V2 B1 3 Dn3 Ds G2–4 राजा (for नाम्ना). T4 रुक्मवर (for °रथ) B3 श्रुत , D1 सुत , M4 तथा (for स्मृत) — (L 2) G1 रुक्मवरस्य (for °रथस्य) V3 [अ]थ (for [अ]पि) K4 D6 T2 G1 सुपार्थो (for °र्श्वो) B2 T4 नामत (for पार्थिव) D3 सुपार्थो नाम विश्रुत (for b) — (L 3) K4 D3 6 T2 सुपार्थ (for °र्श्व-) Ñ2 Dn D4 (marg as above) पार्थिव (for धार्मिक)]

— After the above, K1 repeats 34^{cd} K1 reads 34^{cd} thrice D6 G1–3 5 read 34^{cd} twice — c) G1 damaged T1 G4 ऽथ सुमती (G4 °ते) (for संनतिमान्) K1 (second time) 2 4 Ñ2. 3 V B Dn Ds D1–5. 6 (first time) T2–4

नीपो नाम महाराज पाञ्चालाधिपतिर्हतः ॥ ३५
स चाप्युग्रायुधस्तात दुर्बुद्धिर्वैरकृत्सदा ।
प्रदीप्तचक्रो बलवान्नीपान्तकरणोऽभवत् ॥ ३६
स दर्पपूर्णो हत्वाजौ नीपानन्यांश्च पार्थिवान् ।
पितर्युपरते मह्यं श्रावयामास किल्बिषम् ॥ ३७
माममात्यैः परिवृतं शयानं धरणीतले ।
उग्रायुधस्य राजेन्द्र दूतोऽभ्येत्य वचोऽब्रवीत् ॥ ३८
अद्य त्वं जननीं भीष्म गन्धकालीं यशस्विनीम् ।
स्त्रीरत्नं मम भार्यार्थे प्रयच्छ कुरुपुंगव ॥ ३९
एवं राज्यं च ते स्फीतं बलानि च न संशयः । C 1089 S I. 20. 51 P I 20. 51

G2 3 5 (last three first time) M4 सुमतेरपि (D6 °तेर्नृप) धर्मात्मा — d) D3 4 6 संततिर् (for सन°) V2 B1 3 Ds राजा संनतिमान्प्रभु — After 34, K3 reads 36ab, repeating it in its proper place

35 a) Ñ2 तथा (for तस्य) K2 4 Ñ V1 3 B3 Ds D1-4 6 T1 2 G1 3 M4 [ए]व (for वै) D4 संतते (for संनते.) — b) Ś1 कान्तो, K2 Ñ1 D6 T2 G1 कर्ता, K3 Ñ3 V2 B Dn Ds D5 T3 4 G2 4 M4 कृतो, K4 कीर्तिर्, D3 4 T1 G3 5 M1-3 कर्तो (for कार्तो) M1 2 महायशा (for °बल.) — After 35ab, N (except Ś1 Ñ1 D1 2) S ins

290* शिष्यो हिरण्यनाभस्य कौसल्यस्य महात्मन· ।
चतुर्विंशतिधा तेन प्रोक्तास्ता सामसहिता ।
स्मृतास्ते प्राच्यसामान· कार्ता नाम्ना तु सामगा ॥
कार्तिरुग्रायुधः सोऽथ वीर. पौरवनन्दन ।

[K3 reads lines 1-2 after 36ab — (L 1) D6 T1 2 G M हिरण्यनाभे शिष्य(D6 M4 °भशिष्य-. T3 G3 °भे पुत्र-, G2 °भ शिष्य)स्तु (for a) Some Mss कौशिल्यस्य, कौशल्यस्य, कौशलस्य, कौसलस्य, T3 4 कौशिकस्य (for कौसल्यस्य) —(L 2) Ñ2 V3 येन (for तेन) K2 B D5 T3 सप्राच्या, V2 D3 T1 G3-5 M4 सप्रोक्ता (for प्रोक्तास्ता) G1 -समिता (for -सहिता) — K3 reads line 3 after 291* —(L 3) T3 श्रुत्वा, T4 श्रुतास् (for स्मृ°) K3 तै, G4 5 M4 ता (for ते) K2 प्राच्यसवना, G2 4 प्राच्यनामान (for °सामान) K1 D4 कर्ता, Ñ3 T3 4 कर्तुर् (for कार्ता) K2 4 Ñ3 (marg) V B Dn Ds G3 5 M4 कार्तयो नाम सामगा, Ñ2 D3 कर्ता नाम च सामगा, Ñ3 कर्ता नाम्ना तु सामगा, D6 T1 2 G1 2 M1-3 कर्ता नाम्ने(T1 °म्ने)ह सा° (for b) —(L 4) K4 B3 G2 कीर्तिर्, D4 कार्तेर्, T2-4 G1 कर्तुर् (for कार्तिर्) K2 4 सोऽपि, D4 चापि, D6 T2 G1 5 M3 सो वै, M1 2 सर्वैर् (for सोऽथ) T2 G1 2 M3 पर (for वीर) M4 कौरव- (for पौ°) D6 G3 5 M1 -नन्दन (for °न)]

— K1 om 35cdef — c) D6 T1 2 G M4 संग्रामे (for बभूव) — d) Ñ3 वृषभस्य (for पृषतस्य) Ś1 T4 M1 पिता हत (for पितामह·) — e) Ś1 Ñ1 V2 D6 T2 G1 2 नीलो (for नीपो) Ś1 K1 3 Dn D5, 6 T1 G3-5 M3 4 महातेजा. (for °राज) — f) Some Mss पञ्चालाधिपतिर् K2 Ñ1 2 M1 तदा, D6 G2 M2 3 बली (for हत.) M4 पाञ्चाल्यो निहतो बली — After 35, K1-3 Ñ2 3 V B Dn Ds D3-6 T G M4 ins

291* उग्रायुधस्य दायाद क्षेम्यो नाम महायशा ॥
क्षेम्यात्सुवीरो नृपति सुवीरात्तु नृपंजय ।
नृपजयाद्बहुरथ इत्येते पौरवा स्मृता ॥

[(L 1) D4 5 तनय (for दायाद) K3 Ñ3 V1 D3 T3 G2 क्षेमो (for क्षेम्यो) D6 महाबल (for °यशा) T3 G1 3 5 M4 क्षेमो नाम महाबल (for b) — G2 reads lines 2-3 after 23 —(L 2) K3 Ñ3 V1 D3 T2 G1 3 5 क्षेमात् (for क्षेम्यात्) M4 क्षेमात्सुवीर्यो नृपति (for a) D3 च (for तु)]

— After the above, K3 reads line 3 of 291*

36 K3 reads 36ab for the first time after 34 — a) Ś1 K1 3 (second time) D1 कार्तिर्, K3 (first time) कीर्तिर्, D2 कार्तेर् (for स चापि) — b) K4 T2 दुर्बुद्धेर् (for °द्धिर्) Ś1 K3 (second time) Dn T3 दुर्बुद्धिरभवत्सदा (Ś1 °वन्नृप), G4 °रसकृत्सदा — After the repetition of 36ab, K3 reads lines 1-2 of 290* — c) Ś1 T1 G4 प्रवृद्ध-, K1 3 G3 M प्रवृत्त (for प्रदीप्त-) — d) K1 V2 B Ds T3 G2 4 महान् (for ऽभवत्) — After 36, D6 ins

292* उग्रायुधस्तु दुर्बुद्धि स्त्रैणो दुष्ट सदाभवत् ।
राजकन्यां जहाराथ मुनिपत्नीप्रधर्षक ॥

37 a) Ds1 (also as in text) दर्पपूर्ण (for °र्णो) T3 4 बलवान्, M2 हत्वा च (for हत्वाजौ) — b) K2 वीर्यवान् (for पार्थि°) G2 नीपानामन्तकोऽभवत् — d) D2 मां नृप (for किल्बिषम्)

38 a) K1 समामात्यैः, K1 (sup lin) महा°, D2 मम नित्य (for माममात्यै) — b) K1 पृथिवी- (for धरणी) — d) T3 आगत्य च (for ऽभ्येत्य वचो)

39 a) Ś1 M1 2 अद्य वै; K1 2 अद्यैव, T2 अन्यां तु; G1 अन्यां त्वं (for अद्य त्वं) — b) T1 तव काली, T2 G1 M गन्धकालीं, G2 डिण्डिकाली (for गन्ध°) — G4 om 39d-41a — d) K3 Ñ3 V1 B2 3 Dn Ds D6 T1 2 G1 3 5 M1 3 4 -नन्दन (for -पुंगव) M2 शीघ्रमेवोपपादय

40 G4 om 40 (cf v l 39) — a) T3 एतद् (for एवं) D3 धनं (for च ते) M1-3 एवं मम कृते कामे — After 40a, M1-3 ins. :

प्रदास्यामि यथाकाममहं वै रत्नभाग्भुवि ॥ ४०
राष्ट्रस्येच्छसि चेत्स्वस्ति प्राणानां वा कुलस्य वा ।
शासने मम तिष्ठस्व न हि ते शान्तिरन्यथा ॥ ४१
अधः प्रस्तारशयने शयानस्तेन चोदितः ।
दूतान्तरितमेतद्वै वाक्यमग्निशिखोपमम् ॥ ४२
ततोऽहं तस्य दुर्बुद्धेर्विज्ञाय मतमच्युत ।
आज्ञप्तवान्वै संग्रामे सेनाध्यक्षांश्च सर्वशः ॥ ४३
मम प्रज्वलितं चक्रं निशाम्यैतत्सुदुर्जयम् ।
शत्रवो विद्रवन्त्याजौ दर्शनादेव भारत ॥ ४४
विचित्रवीर्यं बालं च मदपाश्रयमेव च ।
दृष्ट्वा क्रोधपरीतात्मा युद्धायैव मनो दधे ॥ ४५
निगृहीतस्तदाहं तु सचिवैर्मन्त्रकोविदैः ।
ऋत्विग्भिर्देवकल्पैश्च सुहृद्भिर्नरपुंगव ॥ ४६
स्निग्धैश्च शास्त्रविद्भिश्च संयुगस्य निवर्तने ।
कारणं श्रावितश्चास्मि युक्तरूपं तदानघ ॥ ४७

मन्त्रिण ऊचुः ।

प्रवृत्तचक्रः पापोऽसौ त्वं चाशौचगतः प्रभो ।
न चैष प्रथमः कल्पो युद्धं नाम कदाचन ॥ ४८
ते वयं साम पूर्वं वै दानं भेदं तथैव च ।
प्रयोक्ष्यामस्ततः शुद्धो दैवतान्यभिवाद्य च ॥ ४९

293* त्वया राज्ये च ते स्थितिम् ।
चतुरङ्गयुतान्यद्य

—^{b}) $K_{1\ 3}$ Dn D_{4} धनानि च, $\tilde{N}_{3}$ V_{1} बल चैव (for बलानि च) —M_{3} reads 40^{cd} twice —^{c}) D_{2} दास्यामि च (for प्रदास्यामि) $\tilde{N}_{2}$ V_{3} D_{1} यथाकालम् (for °मम्) —^{d}) K_{1} हि (for वै). K_{4} G_{3} रत्नभुग् (for °भाग्) —After 40, all Mss (G4 om) and printed eds read 44

41 G_{4} om 41^{a} (cf V 1 39) —^{a}) $M_{3\ 4}$ राज्यस्य (for राष्ट्रस्य) K_{2} चैव (for [इ]च्छसि) K_{1} स्वस्तिं; D_{3} तुष्टे, T_{1} स्वास्थ्य (for स्वस्ति). $M_{1\ 2}$ राष्ट्रे यदीच्छसि स्वस्ति. —^{b}) V_{3} प्रजानां, G_{5} प्राणिनां (for प्राणानां) D_{4} T_{4} च (for the first वा) $\acute{S}_{1}$ $K_{1\ 3}$ V_{2} B_{1} Ds_{1} $D_{2\ 3}$ T_{4} M_{4} च (for the second वा) $M_{1\ 2}$ प्राणानामपि ते (M_{2} मे) सदा —^{d}) $\acute{S}_{1}$ च (for हि)

42 ^{a}) $D_{1\ 4}$ (marg) $_{6}$ T_{1-3} G_{2-5} $M_{3\ 4}$ अहं (for अधः) M_{1} अथाध प्रस्तरशये —^{b}) K_{4} D_{4} नोदित, $\tilde{N}_{2\ 3}$ (marg as in text) V_{3} देशितः; D_{3} बोधित (for चोदितः) $\acute{S}_{1}$ $K_{1\ 3}$ शयानस्यैव वाशि(K_{1} °चि)तम्, K_{2} °नास्तेन चोदिता —^{c}) M_{3} एवैतद् (for एतद्वै) $K_{2\ 4}$ $\tilde{N}$ V B Ds D_{1-6} $T_{3\ 4}$ दूतान्तर्हितमेतद्वै, T_{2} °रे तदेतद्वै —^{d}) D_{6} $T_{1\ 2}$ G $M_{1\ 2\ 4}$ विषोपमम् (for शिखो°) —After 42, D_{6} $T_{1\ 2}$ $G_{1\ 3\ 5}$ ins:

294* शरीरं मेऽदहत्तस्य वाक्यं चैतद्दुरात्मन ।

43 ^{b}) K_{4} D_{4} अप्युत; D_{1} अच्युत, G_{1} अच्युतम् (for अच्युत). —^{c}) $K_{1\ 3}$ V_{2} B Dn Ds $D_{5\ 6}$ $G_{2\ 4}$ आज्ञापय (for आज्ञप्तवान्) $\tilde{N}_{1.2}$ B_{2} Ds $M_{1\ 2}$ संग्रामं (for °मे) $\acute{S}_{1}$ आज्ञापयं च संग्रामे —^{d}) V_{2} B_{2} T_{4} सर्वेत (for °शः)

44 G_{4} om. 44. All Mss (G_{4} om.) and printed eds read 44 after 40 —^{a}) $M_{1\ 2}$ सैन्य (for चक्रं). —^{b}) K $\tilde{N}_{1\ 2}$ $V_{1\ 3}$ B_{1} Dn D_{1-5} $T_{3\ 4}$ निशम्येदं, $\tilde{N}_{3}$ D_{6} M_{3} निशम्यैत, V_{2} B_{2} निशम्यैवं, B_{3} Ds निशम्यैव, $G_{2\ 3}$ निशाम्येद, M_{4} निशाम्यैनं (for निशाम्यैतत्) —^{c}) $D_{1\ 6}$ ऽपि (for वि) —^{d}) $T_{1\ 2}$ G_{1} $M_{1\ 3}$ पार्थिव; $G_{3\ 5}$ $M_{2\ 4}$ पार्थिवा (for भारत)

45 ^{a}) K_{2} D_{2} तं (for च) $\acute{S}_{1}$ विचित्रवीर्यो बालश्च —^{b}) $M_{2\ 3}$ तम् (for च) $K_{2\ 3}$ V_{3} Dn $D_{4\ 5}$ $T_{1\ 3\ 4}$ $G_{1\ 4}$ मदुपाश्रयमेव च —^{c}) $K_{2\ 4}$ $\tilde{N}_{3}$ $V_{1,3}$ D_{1-4} T_{4} परीताक्षो, $\tilde{N}_{2}$ °ताङ्गो (for °तात्मा)

46 ^{a}) M_{4} ततो (for तदा) $K_{1\ 2\ 4}$ $\tilde{N}_{2\ 3}$ V Dn D_{1-5} T_{2-4} $G_{2\ 4}$ [अ]हं तैः; $\tilde{N}_{1}$ तत्तु (for [अ]हं तु) —^{b}) M_{3} धर्म- (for मन्त्र-) —K_{3} reads 46^{c} twice —^{c}) K_{3} (second time) सुहृद्भिर् (for ऋत्विग्भिर्) $\acute{S}_{1}$ M_{1} अर्थकामैश्, B_{2} D_{5} T_{2} वेदकल्पैश्, D_{6} $G_{1-3\ 5}$ M_{2-4} हितकामैश्, T_{1} G_{4} हितकारैश् (for देवकल्पैश्) —^{d}) $K_{2\ 4}$ $\tilde{N}$ V B Dn Ds D_{1-5} T_{3-4} सुहृद्भिश्चार्थ($\tilde{N}_{2}$ B_{1} °नु)दर्शिभिः, D_{6} T_{1} G M °र्भरत(M_{1} °श्च नर)र्षभ.

47 ^{a}) $K_{2\ 4}$ $\tilde{N}$ V $B_{2\ 3}$ Ds_{1} D_{1-3} $T_{3\ 4}$ मन्त्रविद्भिश्, D_{4} मन्त्रिवर्यैश् (for शास्त्रविद्भिश्) —^{b}) T_{3} प्रवेशने; T_{4} निवेशने (for निवर्तने) —^{c}) M_{4} श्रावितं (for °तश्). $\acute{S}_{1}$ T_{4} [अ]पि (for [अ]स्मि) K_{2} कारणं श्रावयिष्यामि (sic). —^{d}) $K_{1,3}$ Dn युक्ति- (for युक्त) $K_{1\ 3}$ Dn तथा (for तदा)

48 $T_{3\ 4}$ M_{1-3} om the ref. M_{4} ऋत्विजान्त्रिणः (for मन्त्रिण.). —^{a}) $K_{2\ 4}$ $\tilde{N}_{2\ 3}$ V D_{1-4} T_{2-4} $G_{1\ 2}$ M_{4} प्रवृद्ध-, D_{6} स वृद्ध- (for प्रवृत्त-) —^{c}) $\acute{S}_{1}$ $\tilde{N}_{2}$ V_{3} चैव; M_{1} त्वेष (for चैष) —^{d}) K_{1} युद्धे (for युद्धं).

49 ^{a}) K_{2} यूयं (for वयं). Dn_{1} पूर्वे (for पूर्वं), $\acute{S}_{1}$ D_{4}

कृतस्वस्त्ययनो विप्रैर्हुत्वाग्नीन्वाच्य च द्विजान् ।
ब्राह्मणैरभ्यनुज्ञातः प्रयास्यसि जयाय वै ॥ ५०
अस्त्राणि न प्रयोज्यानि न प्रवेश्यश्च संगरः ।
आशौचे वर्तमानेन वृद्धानामिति शासनम् ॥ ५१
सामदानादिभिः पूर्वमपि भेदेन वा ततः ।
तं हनिष्यसि विक्रम्य शम्बरं मघवानिव ॥ ५२
प्राज्ञानां वचनं काले वृद्धानां च विशेषतः ।
श्रोतव्यमिति तच्छ्रुत्वा निवृत्तोऽस्मि नराधिप ॥ ५३
ततस्तैः स क्रमः सर्वः प्रयुक्तः शास्त्रकोविदैः ।
तस्मिन्काले कुरुश्रेष्ठ कर्म चारब्धमुत्तमम् ॥ ५४
स सामादिभिरप्यादावुपायैः शास्त्रचिन्तकैः ।
अनुनीयमानो दुर्बुद्धिरनुनेतुं न शक्यते ॥ ५५
प्रवृत्तं तस्य तच्चक्रमधर्मनिरतस्य वै ।
परदाराभिलाषेण सद्यस्तात निवर्तितम् ॥ ५६
न त्वहं तस्य जाने वै निवृत्तं चक्रमुत्तमम् ।
हतं स्वकर्मणा तत्तु पूर्वं सद्भिश्च निन्दितम् ॥ ५७
कृतशौचः शरावापी रथी निष्क्रम्य वै पुरात् । C 1108 B 1 20 69 P 1 20 69
कृतस्वस्त्ययनो विप्रैः प्रायोधयमहं रिपुम् ॥ ५८

च (for वै) — b) B2 दान भेदस्, M4 दानपूर्वं (for दान भेदं) M2 3 च भारत (for तथैव च) — c) K4 V3 D1 तप शुद्धो, M3 तदा राजन् (for तत. शुद्धो) T4 प्रयोक्ष्यामि तप.शुद्धो — d) K1 (*sup lin*) 2 देवता (for दैवतानि). Ś1 K1 3 [अ]भिगम्य (for °वाद्य)

50 b) T2 4 G1 3 5 हुत्वाग्निं, M1 2 (*inf lin*) हुताशं (for हुत्वाग्नीन्) K2–4 Ñ1 3 V2 3 B1 2 Dn Ds D2–6 T1 G2 4 अर्च्य, Ñ2 B3 आर्च्यं, T4 M2 चार्च्यं (for वाच्य) Ñ1 द्विजम् V1 गत्वाग्नीनर्च्यं च द्विजान्, T3 हुत्वाग्निं चार्च्य वै द्विजान् — d) D2 यास्यसि त्वं, T4 (marg) प्रयातो वै, G3 °हि वि- (for °स्यसि)

51 b) S1 सगरे, Dn1 T2 °रा (for °र.) D6 G M3 न प्रवेश्याश्च सं(G4 सा)गरा — c) Ñ3 V3 B3 Ds2 D6 G1 अशौचे (for आ°) S1 K3 4 Ñ2 B2 अशौचे वर्तमाने तु (Ñ2 च), K1 B1 Dn D4 5 T1 3 आशौचे वर्तमाने तु (T1 च) — d) G3 5 M4 अनु- (for इति)

52 a) Ñ1 पूर्वादिभि (for -दाना°) T1 3 G2 4 5 पूर्णस् (for पूर्वम्) — b) S1 अथ, B3 इति, Ds T2 G1 अभि- (for अपि) K2 D5 T1–3 G1 3–5 M पुन: (for तत:) T4 अपि लेखेन वा पुन — c) T2 G2 हरिष्यसि (for हनि°). — d) Ds1 (*sup lin*) शम्बरं कृष्णजो यथा

53 a) V3 Ds2 D2–4 प्रज्ञानां (for प्रा°) T2 G1 लोके (for काले) — b) Ñ1 वै (for च) — c) V3 बुध्वा (for श्रुत्वा) — d) G2 विशेषत (for नराधिप) M2 विनिवृत्तोऽस्मि भारत

54 a) K3 Ñ1 3 V1 B Dn Ds2 D5 G2 संक्रम, Ñ2 क्रमश (for स क्रम.) D2 पूर्वं (for सर्व.) V2 D1 3 T3 4 ततस्तै क्रमश सर्वै (D1 3 °र्वै), V3 D6 T1 2 G1 3–5 °स्तै संक्रम पूर्वं (V3 सर्वै, T1 G4 पूर्व.), M1–3 ततोऽस्मै संक्रम स(M2 पू)र्वै, M4 ततस्त संक्रमै पूर्वं — b) Dn1 D5 T1 G5 M2 प्रत्युक्तः, T2 G1 प्रवृत्तः (for प्रयुक्तः) — c) G1 अस्मिन् (for त°) Ś1 मासे, K1 3 पापे (for काले)

55 Ñ2 om (hapl) 55^{a}–57^{b}. — a) K1 3 D5 T3 G2 4 एवादाव्, M1 2 अन्यैश्च (for अप्यादाव्) D6 T1 2 G1 3 M3 4 सामादिभिरथाप्यादाव् (G1 °स्तथाप्यादाव्; M4 °रथो-पायैर्) — b) T3 4 प्राज्ञ- (for शास्त्र) S1 K1 3 -निश्चितैः; G1 -चिन्तनै (for °कै) K2 उपायैरपि चिन्तितै, K4 Ñ1 3 V B Dn Ds D1–5 °यै प्रा(K4 प्र)ज्ञचिन्तितै (Ñ3 [marg] °न्तकै), M1 2 °यैरनुचिन्तितै, M4 प्रयुक्तैः शास्त्रकोविदैः — c) Hypermetric V2 T2 G1–3 5 अन्वीयमानो दुर्बुद्धिर्

56 Ñ2 om 56 (cf v l 55) — a) V2 3 T4 प्रवृद्धं (for °त्त) G2 त्रिप्रवृत्तस्य तच्चक्रम् — c) D6 T2–4 G1 2 4 परदाराभिमर्शेन — d) T1 G3 5 चक्रं, G4 क्रमं (for सद्यस्). D6 G2 तेन (for तात) K2 D1 त्रि- (for नि-) — After 56, K3 ins

295* न हीदृशमनायुष्यं लोके किंचन विद्यते ।
याद्दशं पुरुषस्येह परदारोपसेवनम् ॥
[= MBh 13 107 20^{cdef}]

57 Ñ2 om 57^{ab} (cf v l 55) — a) K2. 4 V2 Dn2 D1 नु, T4 च (for तु) K Ñ1 V3 Dn D1–5 T3 G2–4 M1 जाने तत्, D6 T1 2 G1 5 M2–4 तज्जाने, T4 जाने च (for जाने वै) Ś1 अन्वहं तस्य वै जाने — b) Ś1 प्रवृत्तं (for नि°) Ñ1 V2 B1 3 Ds अच्युत, Ñ3 V1 M1 उद्यतम्; B2 अच्युत (for उत्तमम्) — c) G2 कर्तुं; M1 तेन, M2 तस्य (for तत्तु) — d) D6 T2–4 G1. 2 M च गर्हितम्, T1 G3–5 विगर्हितम् (for च निन्दि°)

58 a) K Ñ2 3 V B D T1 2. 4 G M4 शरी चापी, Ñ1 कृतावापी, T3 कृतास्त्रश्च (for शरावापी). — K4 om. 58^{c}–59^{d} — d) M1 परम् (for रिपुम्)

59 K4 om 59 (cf v. l 58). — a) Ñ1 2 D1 T1 G4 सुमार्गम्; V3 B2 T3, 4 संग्रामम् (for संसर्गम्) Ñ3 V1 Dn

ततः संसर्गमागम्य बलेनास्त्रबलेन च ।
त्र्यहमुन्मत्तवद्युद्धं देवासुरमिवाभवत् ॥ ५९
स मयास्त्रप्रतापेन निर्दग्धो रणमूर्धनि ।
पपाताभिमुखः शूरस्त्यक्त्वा प्राणानरिंदम ॥ ६०
एतस्मिन्नन्तरे तात काम्पिल्यात्पृषतोऽभ्ययात् ।
हते नीपेश्वरे चैव हते चोग्रायुधे नृपे ॥ ६१
आहिच्छत्रं स्वकं राज्यं पित्र्यं प्राप्य महाद्युतिः ।
द्रुपदस्य पिता राजन्ममैवानुमते तदा ॥ ६२
ततोऽर्जुनेन तरसा निर्जित्य द्रुपदं रणे ।
अहिच्छत्रं सकाम्पिल्यं द्रोणायाथापवर्जितम् ॥ ६३
प्रतिगृह्य ततो द्रोण उभयं जयतां वरः ।
काम्पिल्यं द्रुपदायैव प्रायच्छद्विदितं तव ॥ ६४
एष ते द्रुपदस्यादौ ब्रह्मदत्तस्य चैव ह ।
वंशः कार्त्स्न्येन वै प्रोक्तो वीरस्योग्रायुधस्य च ॥ ६५
अतस्ते वर्तयिष्येऽहमितिहासं पुरातनम् ।
गीतं सनत्कुमारेण मार्कण्डेयाय पृच्छते ॥ ६६
श्राद्धस्य फलमुद्दिश्य नियतं सुकृतस्य च ।
तन्निबोध महाराज सप्तजातिषु भारत ॥ ६७

आक्रम्य (for आगम्य) K2 D2–4 तत स मार्गं(D3 समर्दं) माक्रम्य — ^{b}) T3 4 दिव्येन (for बलेन) Ś1 [आ]स्त्रै- (for [अ]स्त्र-) T4 ते (for च) — ^{c}) D6 T1 2 G1–4 M1–3 मुहूर्तवद् (for उन्मत्त°) M4 मुहूर्तमभवद्युद्ध

60 ^{a}) V1 T3 M2 3 मम (for मया) K2 स्व (for [अ]स्त्र-) D2 स संप्रतापेन मया , M1 स ममास्त्रप्रभावेन — ^{b}) D1 निहतो ; G2 काम्बिल्यो (for निर्दग्धो) — ^{c}) V3 त्यक्त्वा (for शूरस्) — ^{d}) V3 स च (for त्यक्त्वा) K2 4 Ñ V1 2 B Ds D1–4 सहानुग॰ , V3 महानृप , M3 अरिंदमः (for °म)

61 D3 reads 61^{b} on marg — ^{b}) Ś1 काम्पिल्य , K3 Dn D5 G2 °ल्ये , T3 °ल॰ , G3 काम्बिल्यात Ñ1 Ds2 पृष्ठतो (for पृषतो) V2 ऽन्वयात् , V3 ऽभ्यगात् , D5 ऽप्यग्यात् (for ऽभ्य°) D6 काम्पिल्य॰ पृष्ठतोऽप्ययात् , T2 G1 5 काम्पि(G5 °म्बि)ल्या पृषदोऽप्ययात् , T4 काम्पिल्य. पृष्ठतोऽन्वयात् , G4 काम्बिल्य॰ पृष्ठतोऽभ्ययात् , M1–3 काम्बिल्य पृषतोऽभ्यगा(M3 °तोऽत्यज)त् , M4 काम्पिल्यः पृषतोऽन्वगात् — D3 om 61^{c} T3 om 61^{cd} — ^{d}) G1 नृप (for नृपे) D3 तस्मिन्विनिहते नृपे

62 ^{a}) K2 4 B1 Dn2 Ds D1–3 T2 G1 M4 अहिच्छत्र ; K3 अहिच्छत्रे , Ñ2 G3 5 अभिच्छत्रं , D6 अधिच्छत्र , T3 अयाचत (for आहिच्छत्रं) D4 स्वकं राष्ट्र , M1 2 सकाम्बिल्यं (for स्वकं राज्य) M3 अहिच्छत्रं स राज्य हि — ^{b}) K3 om from पित्र्यं up to निर्जित्य द्रु (in 63^{b}) K1 4 Ñ2 V B Dn Ds D3 5 6 T G M4 पित्र्य प्राप , Ñ3 पैत्रं प्राप , D1 4 पैत्र्य प्राप , M1 3 तदवाप्य (for पित्र्यं प्राप्य) — ^{c}) G1 3 5 M4 राजा (for राजन्) Ñ3 द्रुपदः स महाराज — ^{d}) T2 G1 मम चाचानुमोदित॰ — After 62, Ñ2 Ds ins

296* ततोऽभूद्द्रुपदो राजा द्रोणस्तेन निराकृतः ।

63 K3 om up to निर्जित्य द्रु (cf v l 62) — ^{a}) K2 तस्यापि , V2 सहसा , B3 T1 तपसा (for तरसा) — ^{c}) G2 partly damaged Dn1 D1 5 T1 4 आहिच्छत्रं , D6 अधिच्छत्रं , T3 दत्त राज्यं , T4 (marg) दत्तराज्ये (for अहिच्छत्रं) T2 G1 अहिच्छत्रा स(T2 °त्रास्य)काम्पिल्या , G3 अभिच्छत्रात्सकाम्बिल्याद् , G4 5 M1–3 आहिच्छत्र (G5 °त्रा) सकाम्बिल्यं (G5 °ल्या), M4 अभिच्छिद्र सकाम्बिल्यो — ^{d}) G2 partly damaged M1–3 [ए]व (for [अ]थ) Ś1 [उ]पपादिताः , T2 G1 5 M4 [अ]पवर्जिता (for °वर्जितम्)

64 ^{a}) B3 Ds T1 प्रगृह्य तु (T1 च) (for प्रतिगृह्य) K2 4 D3 तु तद् , D1 T4 तु त (for ततो) K1 द्रोणम् (for द्रोण) — ^{b}) Ś1 ह्युभय (for उ°) D6 T1 2 G1–3 5 M1 3 ददता (for जयतां) K2 B2 D4 5 वर , D1 वर (for वर). M4 अभयं दत्तवान्वरम्॰ — ^{c}) T2 G1 काम्पिल्यान् , G3–5 M1–3 काम्बिल्यं (for काम्पिल्य) — ^{d}) M4 तदा (for तव)

65 ^{a}) K4 Ñ1 V2 B1 D6 T1 2 G1 3–5 M2–4 [अ]पि (for [आ]दौ) — ^{b}) K2 D3 6 T1 2 4 G1 3 5 M2 4 हि (for ह) — ^{c}) Ś1 ते प्रोक्तो , V1 प्रोक्तो वै (by transp) — ^{d}) K2 4 V2 B D1 4 5 T1 G2–4 नीपस्य (for वीरस्य) K2 4 Ñ D1 2 5 वै (for च) — After 65, K2 4 Ñ1 3 V B Dn Ds D1–3 5 6 T G ins a passage given in App I (No 5) , K1 3 D4 ins the same after adh.v 15

66 K1 3 D4 repeat 66–68 (with the colophon) after App. I (No 5) Dn repeats 66^{a}–67^{b} after App I (No 5) — ^{a}) V2 3 Dn2 (first time) वर्णयिष्ये (for वर्त°). B1 D2 G5 अतस्ते वर्तयिष्यामि ; T4 अत्र ते कीर्तयिष्यामि

67 For the repetition in K1 3 Dn D4, cf 1 66. — After 67^{a}, T5 reads lines 128^{b}–129^{a} of App I (No 5) repeating them in their proper place — ^{b}) T2 सुश्रुतस्य (for सुकृ°) K4 ह , V3 D2 M1–3 वै (for च) — ^{c}) K1 (first time) महाभाग (for °राज). — ^{d}) K1 (first time) 3 (second time) 4 V1, 3 Dn D1–3, 4

सगालवस्य चरितं कण्डरीकस्य चैव ह ।
ब्रह्मदत्ततृतीयानां योगिनां ब्रह्मचारिणाम् ॥ ६८

इति श्रीहरिवंशे पञ्चदशोऽध्यायः ॥ १५ ॥

१६

मार्कण्डेय उवाच ।
हन्त ते वर्तयिष्यामि श्राद्धस्य फलमुत्तमम् ।
ब्रह्मदत्तेन यत्प्राप्तं सप्तजातिषु भारत ॥ १
तत एव हि धर्मस्य बुद्धिर्निर्वर्तते शनैः ।
पीडयाप्यथ धर्मस्य कृते श्राद्धे पुरानघ ॥ २
ततोऽहं नातिधर्मिष्ठान्कुरुक्षेत्रे पितृव्रतान् ।
सनत्कुमारनिर्दिष्टानपश्यं सप्त वै द्विजान् ॥ ३
वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च । C 1189 B 1 21 5 P 1 21 5

(second time) 5 6 T3 4 [अ]भूत्पुरा, K3 (first time) भारते (for °त) K2 सप्राप्त यदभूत्पुरा

68 For the repetition in K1 3 D4 cf v l 66 — a) Ś1 K3 (first time) D5 6 G2 M सुगालवस्य — b) K4 कुण्डीरकस्य, D4 (first time). 6 G2 पुण्डरी°, T2 कन्धरीहस्य; T4 कन्धरीकस्य, G1 कण्डरीहस्य, M2 3 कुण्डरीकस्य (for कण्ड°) K1 (second time) 2 3 (both times) V2 Dn Ds2 D3 4 (both times) 5 T3 4 G1–4 M4 हि (for ह) — d) K2 T3, 4 सर्वेषां, Ñ1 योगानां (for योगिनां) T2 G1–3 5 M1–3 धर्म- (for ब्रह्म-) Ś1 K1 3 D4 (last three first time) योगि(K1 3 °गा)नां सहधर्मिणाम्

Colophon om in T1 — *Mention of the Epic* K3 (both times) Dn Ds2 — *Mention of Khila* Ś1 K3 (both times) Ñ3 V B Dn Ds1 D1 2 4 (both times) 6 — *Adhy name* Ś1 K1 3 (both first time) 4 Ñ1 D4 (first time) M1 2 पितृकल्प, K1 (second time) वीराचटिकाख्यानम्, K2, 3 (second time) Ñ3 Dn D3 6 T2 G1 M4 चटकाख्यानम्, Ñ2 B1 3 Ds पूजनीयोपाख्यानम्, V1 D4 (second time) चटकोपाख्यानम्, V2 पितृकल्पे चटकोपाख्यानम्, V3 B2 पितृकल्पे पूजनीयोपाख्यानम्, D5 पारिजाते चटकाख्यानम्; D1 2 शकुन्तिकोपाख्यानम्, G3 5 शकुन्ताख्यानम् — *Adhy no* (figures, words or both) K1 (both times) 16, K3 (first time) 18, K3 (second time) Ñ3 V1 D4 (both times) 19, V2 3 B1 2 Dn Ds2 20, D1 T2 G M 18, D6 T3 4 21 — *Śloka no* K1 (both times) 67, Dn1 41, Ds2 146, D2 43, D4 (both times) 66 — After adhy 15, K1 3 D4 ins App I (No 5)

16

1 N (except Ś1 Ñ1 D6, K2 marg) T1 3 G2 4 ins after the ref T2 G1 after 1ab G3 after 1

297* श्राद्धे प्रतिष्ठितो लोक श्राद्धाद्योग प्रवर्तते ।

[D3 T2 G3 श्राद्धे प्रतिष्ठिता लोका (for a) K2 3 Ñ2 Dn D5 T1 श्राद्धे (for श्राद्धाद्) D4 लोक (for योग)]

K2 reads 1–2 on marg — a) K4 D2 5 6 T2–4 G1 3 5 कथयिष्यामि, V वर्ण°, D4 कीर्त° (for वर्त°) T1 G4 M4 हन्त ते कथयिष्येऽहं, M2 हन्त ते संप्रवक्ष्यामि — b) K3 4 Ñ V1 3 D2–5 T3 4 विधिम् (for फलम्) Ds श्राद्धयो(Ds2 °द्धाद्यो)गमनुत्तमम् — c) Ś1 K2 3 V3 प्रोक्त (for प्राप्त) — After 1, G5 reads 5a

2 a) M1 2 धर्मेऽस्य, M3 धर्मेऽस्मिन् (for धर्मस्य) — c) D6 T2 G1 2 अपि, T3 4 वापि, M3 4 [अ]पि हि (for [अ]प्यथ) T1 G3 5 पीडयामास धर्मस्य (sic) — d) K2 भूते श्राद्धे, T2 कृतश्राद्धे, G1 कृतश्राद्धै (for कृते श्राद्धे) Ś1 पुरातने (for °नघ) — After 2, N (except Ś1 Ñ1) S (except M1–3) ins

298* यत्प्राप्तं ब्राह्मणै पूर्वं तन्निबोध नरोत्तम ।

[D3 प्राप्य (for प्राप्त) K Ñ2 V3 D1 3–5 द्विजोत्तम (D3 °मै), Dn महामते, T3 4 G4 नृपोत्तम (for नरो°)]

3 a) K2 तत्र, K4 Ñ2 3 V1 Dn Ds D2 3 5 T1 2 4 G1 तात (for नाति) V2 3 B D1 T3 G4 ततोऽहं तानधर्मिष्ठान् — b) V2 कृत, D6 यत- (for पितृ-) — After 3, N (except Ś1 Ñ1) S (except M1–3) ins

299* दिव्येन चक्षुषा तेन यानुवाच पुरा विभु ॥

[D3 येन (for तेन)]

4 a) T1 G4 वक्रेष्ट°, T3 गर्विष्ठ, T4 अक्रुद्ध, G3 5 वाकष्ट (for वाग्दुष्ट) K3 पिशुनो (for क्रोधनो). — b) V3 रुचिर्, T2 G1 कपिर् (for कविर्). — c) K2 समृग (for खसृम) — d) T3 4 G1 तदा, M4 स्मृता (for तथा)

खसृमः पितृवर्ती च नामभिः कर्मभिस्तथा ॥ ४
कौशिकस्य सुतास्तात शिष्या गार्ग्यस्य भारत ।
पितर्युपरते सर्वे व्रतवन्तस्तदाभवन् ॥ ५
नियोगात्ते गुरोस्तस्य गां दोग्ध्रीं समकालयन् ।
समानवत्सां कपिलां सर्वे न्यायागतां तदा ॥ ६
तेषां पथि क्षुधार्तानां बाल्यान्मोहाच्च भारत ।
क्रूरा बुद्धिः समभवत्तां गां वै हिंसितुं तदा ॥ ७
तान्कविः खसृमश्चैव याचेते नेति वै तदा ।
न चाशक्यन्त ते ताभ्यां तदा वारयितुं द्विजाः ॥ ८
पितृवर्ती तु यस्तेषां नित्यं श्राद्धाह्निको द्विजः ।
स सर्वानब्रवीद्भ्रातृन्कोपाद्धर्मसमन्वितः ॥ ९
यद्यवश्यं प्रकर्तव्या पितृनुद्दिश्य साध्विमाम् ।
प्रकुर्वीमहि गां सम्यक्सर्वे एव समाहिताः ॥ १०
एवमेषा च गौर्धर्मं प्राप्स्यते नात्र संशयः ।
पितृनभ्यर्च्य धर्मेण नाधर्मोऽस्मान्भविष्यति ॥ ११
तथेत्युक्त्वा च ते सर्वे प्रोक्षयित्वा च गां ततः ।
पितृभ्यः कल्पयित्वैनामुपयुञ्जन्त भारत ॥ १२
उपयुज्य च गां सर्वे गुरोस्तस्य न्यवेदयन् ।

5 G5 reads 5a after 1 — a) D3 ते तु (for तात) — b) D4 6 G 5 M गर्गस्य (for गार्ग्यस्य) T2 G1 शुभा- (G1 शिष्या)गस्त्यस्य भारत (sic) — c) D2 6 T1 2 G1-3 5 M तस्मिन् (for सर्वे) — d) Ś1 प्रवसन्तस्, M1 3 प्रभव° (for व्रतव°) Ñ1 प्रभवन्तस्तगो हुतम्, Ñ3 (marg as in text) V2 B2 3 Ds1 (marg as in text) s2 न्यवसन्त त- (Ñ3 Ds2 °सन्तस्त-, B3 °र्तन्त त)दा गुरौ, B1 न्यवसन्त गुरौ तदा, D6 G2 3 M2 4 प्रभवन्तस्ततोऽभ(G2 °दाभ)वन्, T2 G1 5 प्रभवस्ते ततोऽभवन्

6 a) Ś1 K1 3 4 Dn T1 G2 विनियोगाद्, V2 B 1 s D6 T2 G1 3-5 M ते नियोगाद् (by transp) D3 सर्वे (for तस्य) — b) K4 D2 T4 समपालयन्, D1 (marg) समचार° (for समकाल°) — d) K2 Ñ2 T4 G3 न्यायागताम्, Ñ1 D6 °गतं, V2 न्यायगतास्, T1 G5 न्यायगतां (for न्याया°) D5 सदा (for तदा) T2 G1 सर्वन्यायगता तथा

7 a) M4 एषां (for तेषां) T2 G1 अपि (for पथि) — b) T4 G3 पार्थिव (for भारत) — c) T3 क्रूर- (for क्रूरा) Ñ1 समुत्पन्ना (for समभवत्) — d) Ñ1 धेनु तां (for तां गां वै) D6 G2 4 तां गां वै हिंसितुमेव हि (hypermetric), T1 2 G1 3 5 M4 तां गां हिंसितुमेव हि

8 a) G1 कपीन् (for कवि) K2 समृगश्, D3 स्वसृपश् (for खसृमश्) — b) K Ñ2 3 V2 3 B Dn Ds D1-5 T3 4 याचेतां, V1 यातेतां, M3 याचितौ (for याचेते) — c) V2 B2 3 Ds1 [ए]व (for च) K1 [अ]शक्यं न (for [अ]शक्यन्त) G2 4 तात, M1 3 सर्वे (for ताभ्या) S1 K4 न च शक्यं तदेता(K4 तात ता)भ्यां, Ñ2 न चाशक्यं ततस्ताभ्या, B1 Ds2 नैवाशक्यन्त ते ता(Ds2 °क्य ततो द्वा)भ्यां; D6 G3 5 न चाशकंस्ततस्तौ तु (G3 °तो जाता; G5 °तस्तात), T2 G1 M4 न चाशकत्ततस्तात, M4 °कंस्तु ते तात — d) D6 T4 G2 3 5 यदा, T2 यथा (for तदा) Ś1 M3 धारयितुं (for वा°) B3 तदा (for द्विजा.) G1 M4 यथा (M4 °दा) पारयितुं द्विजा

9 a) B3 च, Ds M1 2 [इ]ति (for तु) — b) K1 2 V3 नित्य- (for नित्यं) D6 श्राद्धाहितो, T1 4 G4 °न्वितो, G3 5 श्राद्धरतो (for श्राद्धाह्निको) K3 द्विजम् (for द्विज) T2 नित्यश्राद्धरतो द्विज, G1 नित्यश्राद्धंकरो द्विज — c) M1-3 तु तान् (for सर्वान्) B1 राजन्, G3 तात (for भ्रातृन्) — d) K1 4 V3 D2-4 G2 समाहित, T3 4 परायण (for -समन्वित) Ś1 कोपाद्यद्धर्मशंसित, K2 3 Ñ V1 B Dn Ds कोपाद्ध(B1 °पध)र्मे समाहित, V2 °द्धर्मात्समाहित, D1 5 कोवो धर्मं समाहित., M1 2 समासाद्धर्मसहितम्, M3 अकोपान्धर्मसंहितान्

10 a) K1-3 Dn Ds2 D1 5 प्रहर्तव्या, Ñ1 B1 D3 6 प्रकर्तव्यं, Ñ2 3 V T3 प्रहन्तव्या (V2 °व्य), B2 Ds1 D4 T1 2 G1 3-5 प्रहर्तव्यं, B3 प्रवर्तव्या (for प्रक°) K4 M4 यदा(M4 °द)वश्य प्रहर्तव्या, T4 G2 यदवश्य प्रहन्तव्या (G2 °कर्तव्यं) — b) T1 ताम् (for साधु) — d) D6 T2 G1 3 5 M4 समन्विता (for समाहिता)

11 a) K1 3 4 Dn G2, 4 M1 [अ]पि, B1 om (for च) T2 om from धर्मं up to उपयुज्य (in 13a) T3 धर्मं गौः (by transp) — b) V1 M3 4 प्राप्यते (for प्राप्स्यते) — c) K3 Dn उद्दिश्य, D6 G1 5 M1 अर्च्यं च, M3 अर्चत (for अभ्यर्च्य) — d) K2 Ds D1-4 वो, Ñ2 3 V B2 3 Dn1 नो, Dn2 ऽभि, T4 ऽस्तौ (for ऽस्मान्) B1 T1 G5 M1-3 भजिष्यति (for भवि°)

12 T2 om 12 (cf v l 11) — a) Ñ1 V2 B1 2 D5 D1 T1 तु (for च) D6 T1 G M4 गा (for ते) — b) V2 T1 G3 4 तु, D4 [अ]थ (for च) K4 मांसत., Ñ1 तां तत; D6 T1 G M शास्त्रत. (for गां तत) — c) K2 D2 [इ]माम्, K4 D4 [ए]ताम्, B3 [ए]वम्, D3 6 T1 G1 3 5 ताम् (for [ए]नाम्) — d) K1 3 V3 D3 उप(K3 °पा)भुञ्जन्त, Ñ3 V2 B Dn D5 D1 5 6 T1 G4 M1, 2 4 उपायु°; V1 D2, 4 G1, 2

शार्दूलेन हता धेनुर्वत्सोऽयं गृह्यतामिति ।
आर्जवात्स तु वत्सं तं प्रतिजग्राह वै द्विजः ॥ १३
मिथ्योपचर्य ते तं तु गुरुमन्यायतो द्विजाः ।
कालेन समयुज्यन्त सर्वे एवायुषः क्षये ॥ १४
ते वै हिंस्रतया क्रूरा अनार्यत्वाद्गुरोस्तदा ।
उग्रा हिंसाविहाराश्च सप्ताजायन्त सोदराः ।
लुब्धकस्यात्मजास्तात बलवन्तो मनस्विनः ॥ १५
पितॄनभ्यर्च्य धर्मेण प्रोक्षयित्वा च गां तदा ।
स्मृतिः प्रत्यवमर्शश्च तेषां जात्यन्तरेऽभवत् ॥ १६
जाता व्याधा दशार्णेषु सप्त धर्मविचक्षणाः ।
स्वधर्मनिरताः सर्वे लोभानृतविवर्जिताः ॥ १७
तावन्मात्रं प्रकुर्वन्ति यावता प्राणधारणम् ।
शेषं धर्मपराः कालमनुध्यान्ति स्वकर्म तत् ॥ १८
नामधेयानि चाप्येषामिमान्यासन्नराधिप ।
निर्वैरो निर्वृतः क्षान्तो निर्मन्युः कृतिरेव च ।
वैघसो मातृवर्ती च व्याधाः परमधार्मिकाः ॥ १९
तैरेवमुषितैस्तात हिंसाधर्मपरैर्वने ।
माता च पूजिता वृद्धा पिता च परितोषितः ॥ २०
यदा माता पिता चैव संयुक्तौ कालधर्मणा ।
तदा धनूंषि ते त्यक्त्वा वने प्राणानवासृजन् ॥ २१　C 1208 B 1 21 23 P 1 21 23

उपायुञ्जत, $T_{3,4}$ उपयुज्यन्त, $G_{3,5}$ °युञ्जन्ति, M_3 उपायुज्यत (for उपयुञ्जन्त)

13 T_2 om up to उपयुज्य (cf v l 11) — ^{a}) K_2 (marg) $_3$ $\tilde{N}_3$ (marg) $V_{1,3}$ $D_{3,6}$ उपभुज्य, K_4 Dn_2 Ds_1 °युञ्ज्य, D_4 °भुञ्ज्य, T_1 G_4 M_{1-3} °युक्तां, G_1 °युक्त, $G_{2,3,5}$ M_4 °युक्त्वा (for °युज्य) $T_{3,4}$ G_1 ता, M_3 ते (for गां) — ^{b}) K_4 $D_{1,3}$ G_1 निवेदयन् (for न्य°) — ^{c}) D_6 शार्दूळेन — ^{d}) M_{1-3} वत्स सं- (for वत्सोऽयं) $K_{2,3}$ $\tilde{N}_{2,3}$ $V_{1,3}$ Dn D_{1-5} T_{2-4} G_1 वत्सोऽय प्रति(V_3 परि)गृह्यताम् — ^{e}) D_6 आर्जवेन (for °वात्स) K_1 च (for तु) $Ś_1$ $K_{1,4}$ V_2 Dn D_5 T_3 तं वत्सं (by transp) $T_{1,2}$ G_1 M_4 आर्जवेन तु (T_2 च) तत्सर्वं — ^{f}) D_6 $T_{1,2}$ $G_{1,3,5}$ M_4 स (for वै)

14 ^{a}) D_1 च (for तु) K_4 मिथ्योपचर्याचरिते, Ds_1 °र्यैया तं तु, $T_{3,4}$ सर्वे ते वञ्चयित्वा तं (T_4 तु) — ^{c}) D_3 $T_{1,2}$ G_1 -युञ्जन्त, D_5 -युज्येत (for -युज्यन्त) — ^{d}) K_2 क्षयात् (for क्षये).

15 ^{a}) D_1 हिंस्रतमा, T_3 क्रूरतया (for हिंस्र°) $Ś_1$ $K_{1,3,4}$ Dn ते वै क्रूरतमा (K_4 Dn °या) हिंस्रा — ^{b}) $Ś_1$ $K_{1,2,4}$ D_{2-4} M_{1-3} गुरोस्तथा; K_3 $\tilde{N}_{1,2}$ B Dn Ds $D_{1,5}$ T_3 $G_{2,4}$ गुरौ तथा, $\tilde{N}_3$ V_1 $T_{2,4}$ G_1 M_4 गुरौ तदा, V_2 गुरौ सदा (for गुरोस्तदा) T_1 $G_{3,5}$ अन्यायत्वाद्गुरौ तथा (G_5 °दा) — ^{c}) $\tilde{N}_2$ D_1 $T_{2,3}$ G_1 उग्र- (for उग्रा) D_4 हिंस्र- (for हिंसा-) $G_{3,5}$ उग्राश्च हिंस्राश्चोराश्च, M_4 उग्रा हिंस्राश्च रौद्राश्च — ^{d}) K_3 Dn [अ]सृज्यन्त (for [अ]जायन्त) — M_3 om 15^e–17^d — ^{e}) $T_{1,2}$ $G_{2,3,5}$ M_4 ते लुब्धस्य (for लुब्धकस्य) — ^{f}) K_2 $\tilde{N}$ V B_2 (marg as in text) $_3$ Ds D_{1-5} $T_{3,4}$ मनीषिणः (for मनस्विनः).

16 M_3 om 16 (cf v l 15) — ^{a}) T_1 M_2 अर्च्य च (for अभ्यर्च्य) — ^{b}) V_2 $B_{2,3}$ Ds_1 (*sup lin* as in text) $_2$ तत, $D_{2,6}$ T_2 G_1 M_4 तथा (for तदा) — ^{c}) K_1 (marg as in text) D_4 प्रत्यवसर्गश्च, $\tilde{N}$ V B Ds $D_{1,5}$ $G_{2,4}$ °मर्षश्च (for °मर्शश्च) T_4 स्मृतिप्रत्यवमर्शाच्च

18 ^{a}) Dn1 यजन्नस्तत (for °नान्ते) B3 तत्; G4 च (for तु) K2 गोपानां यजता सर्वं — ^{c}) K4 सर्वं (for मांसं). T4 पयसा (for मायया) — After 18, D2 ins.

702* ईदृशं ह्यभवत्तत्र गोपाना भरतर्षभ ।

19 ^{a}) Dn1 [ए]व; T2 [अ]त्र (for [अ]पि) D6 विप्रास्तु; M1–3 विप्रेन्द्रास् (for विप्राग्र्यास्) — ^{b}) K Ñ2 3 V1 2 B1 Dn D2–5 T3 4 G3 M4 -मानसा (for -भोजनाः) D1. 2 पुष्टा सपूर्णमानसा — ^{c}) Ś1 V1 2 B1 Ds1 प्रीति- (for प्रीत-). K1 उत्तस्थु प्रीतिमन्तश्च; Ñ1 तुष्टुवु प्रीतिमनसः — ^{d}) V1 G5 स्वस्ति K4 Ds2 T1 4 M2 वाच्यं (for वाच्य). — After 19, K2 reads 22^{c}–23^{b}

20 ^{a}) Ś1 [उ]ग्राहृतं, Ñ1 (marg) D6 T1 G3 [अ]पहृत, T2 [उ]पहृत, G1 2 4 5 M4 [उ]पहृतं; M1–3 च सकलं (for [अ]वभृथे) D2 भुक्त्वा चापहृत कृत्स्नं — ^{b}) T4 तु (for च) — ^{c}) Ś1 K4 D6 G1. 2 4. 5 स, D4 T3 4 सु- (for सं-) K1 V1 -तुष्टो (for तृप्तो) K1 सोऽति- (for ऽस्मीति). Ś1 T1 रूपेण, D6 T2 G M4 दीप्तेन (for दिव्येन). — ^{d}) T1 दीप्तेन (for रूपेण) D4 वि- (for प्र-) T3 रूपेण प्रहसन्निव — After 20, T3 ins.:

703* प्रजहास गिरेर्मूर्ध्नि स्थित कमललोचन ।

21 ^{b}) V1 3 -स्रग्गन्ध- (for स्रगनु) — ^{d}) K2 कृष्ण (for कृष्णं)

22 ^{b}) T1 चोदित-, G3 चोत्थितः (for [आ]च्छादित-) Ś1 कृष्णरूपेण छादित°, D6 T2 G1 2 4 5 M4 कृष्णरूपेण चोत्थि(D6 G2 °दि)त; M1–3 रूपेणातीव शोभितः — K2 reads 22^{c}–23^{b} after 19. T2 G5 M4 read 22^{cd} twice,

तमूचुर्विस्मिता गोपा देवं गिरिवरे स्थितम् ।
भगवंस्त्वद्वशे युक्ता दासाः किं कुर्म किंकराः ॥ २३
स उवाच ततो गोपान्गिरिः सुप्रभया गिरा ।
अद्यप्रभृति याज्योऽहं गोषु यद्यस्ति वो दया ॥ २४
अहं वः प्रथमो देवः सर्वकामकरः शिवः ।
मम प्रभावाच्च गवामयुतान्येव भोक्ष्यथ ॥ २५
शिवश्च वो भविष्यामि मद्भक्तानां वने वने ।
रंस्ये च सह युष्माभिर्यथा दिविगतस्तथा ॥ २६
ये चेमे प्रथिता गोपा नन्दगोपादयः स्थिताः ।
एषां प्रीतः प्रयच्छामि गोपानां विपुलं धनम् ॥ २७
पर्याप्नुवन्तु मां क्षिप्रं गावो वत्ससमाकुलाः ।
एवं मम परा प्रीतिर्भविष्यति न संशयः ॥ २८
ततो नीराजनार्थं वै वृन्दशो गोकुलानि च ।
परिवव्रुर्गिरिवरं सवृषाणि सहस्रशः ॥ २९
ता गावः प्रस्रुता वत्सैः सापीडस्तबकाङ्गदाः ।
सस्रगापीडशृङ्गाग्राः शतशोऽथ सहस्रशः ॥ ३०
अनुजग्मुश्च गोपालाः कालयन्तो धनानि च ।
भक्तिच्छेदानुलिप्ताङ्गा रक्तपीतासिताम्बराः ॥ ३१

— c) B2 D4 5 G2 सहितै (for सह तै) K4 Ñ V1 2 D8 T1 सहितो (for प्रणतो) K2 V3 D2 3 6 T2 (both times). 3 4 G1 3 5 M4 (last two first time) स (D2 सं) हितै. सहितो गोपैर्, G2 4 5 M4 (last two second time) स तदा सहि (M4 सेवि) तो गोपैर्, M1–3 कृष्णस्तै. सह गोपालैर् — d) G2, 5 M4 (last two second time) ददर्श, M1–3 ववन्दे (for °न्द)

23 For the sequence in K2, cf v 1 22. — c) G2 M4 त्वद्धिते (for त्वद्वशे)

24 a) Ś1 यत्रोवाच; K1 D2 3 स प्रो°, K4 T1 स चो°; Ñ1 उवाच च (for स उवाच) — b) K1 D2 सप्रभया, Ñ1 D8 T3 4 सप्रणयं, D6 T2 G1 3–5 स शुभया (for सुप्रभया) K2, 4 Ñ2 3 V B Dn D4 5 गिरिप्रभवया गिरा — c) K2 आप्यो, K3 4 Ñ3 V1 2 B2 3 Dn D2–5 G1 4 चेज्यो, Ñ2 V3 पूज्यो; D1 (before corr) वेद्यो, T1 M4 यज्ञो, T2 G3 5 वन्द्यो, M3 युज्यो (for याज्यो) — d) D1 G1 2 5 [अ]स्तु (for [अ]स्ति) V1 T1 वै; D6 वा (for वो)

25 a) Ñ3 (marg) V1 वै, D2 च (sup lin as in text); G4 य (for व) — b) K Ñ V1 3 B Dn D8 D1, 3 5 T3 4 शुभ·; D2 4 प्रभु (for शिव) V2 सर्वकामप्रद· शुभ. — c) K1 T3 4 प्रसादाच्च (for प्रभावाच्च) M1–3 मत्प्रभावाच्च सर्वं वै — d) K1 च, Ñ3 (marg) V2 3 B2 3 D81 G4 M4 [उ]प- (for [ए]व) K2 D6 T2 G1–3, 5 अमृतान्युपभोक्ष्यथ (T2 G1 °भुङ्क्ष्यत) D1 प्रयुतान्युपभोक्ष्यथ, M1–3 यथेष्टमुपभो°.

26 a) K2 शिव· श्रेयो, D6 T1 2 G1 3–5 M4 शिवाय वो, G2 शिवभावो; M1–3 शिवस्तु वो (for °श्च वो) — b) Ś1 मद्गतानां, V3 मम भक्तानां (hypermetric) (for मद्भक्तानां) K4 स्थितो वने, G2 दिने दिने (for वने वने) — c) Ś1 वत्स्यामि, K1 B1 3 D8 D1 T4 रंस्येऽहं, D3 रमेऽहं (for रंस्ये च) K4 अह चरिष्ये युष्माभिर् — d) Ś1 स्वर्गंगतस् (for दिवि°)

27 a) Ś1 K2 V2 M3 मे (for [इ]मे) K4 कथिता (for प्र°) — b) N (except Ś1 D6) T3 4 नन्दगोपपुरोगमा — c) D4 6 T2–4 G1–3 5 M1 4 तेषां (for एषां). T1 M4 प्रीति (for प्रीत.).

28 a) Ś1 K4 M2 मां क्षिप्रं (by transp), T1 M1 3 4 क्षिप्रं च D3 पर्यागच्छन्तु क्षिप्र मां, D6 T2 G °प्नुवन्ति क्षिप्रं च — b) D8 वत्सा (for वत्स-). — c) Ś1 T3 4 मे परमा (for मम परा) — d) Ś1 जगद्धितम् (for न संशय).

29 a) M4 Bom Poona eds G(ed) हि (for वै) M1 2 ततो नीराजनार्थं वै — b) K2–4 Ñ V D1 3–5 T3 4 वै, Dn तत्, T1 M1 3 4 तु (for च) — c) D3 -चक्रे (for -वव्रुर्) — d) T1 सकृष्णेन, G2 lacuna (for सवृषाणि). N (except Ś1 D6) समन्ततः (for सहस्रश) T3 4 सवृषास्ते समन्तत

30 a) Ś1 तावन्त प्रद्रुता दृष्ट्वा, K1 T4 ता गाव· प्रद्रुता हृष्टा (K1 [sup lin] °ष्टा), K2 ता गाव. प्रहृतं दृष्ट्वा, K3 तं गावः प्रद्रुता दृष्टा·, K4 Ñ V B Dn D8 D1 2 4 5 T3 ता गाव प्रद्रुता हृष्टा·, D3 ता गाव प्रहिता हृष्टा·, D6 T1 2 G M4 ता गाव प्रद्रु (T3 G1 4 °सृ·, G5 °हृ) ता दीप्ता· — b) D3 सापीडस्तवराङ्गदा: G4 5 °स्तवकाङ्कका, M4 °स्तबकाङ्कुशाः. — D3 om 30cd — c) Ś1 ससृजोत्पीडशृङ्गाग्राञ् (sic), K2 सहस्रगोपीशृङ्गाग्रा; K4 T3 स्रगापीडित°, V1 समग्रापीड°; V2 B1 Dn T4 M2 सस्रजा°, D6 T1 2 G M4 स (G4 सु)-निष्का°

31 a) K2 तु (for च). — b) M4 पालयन्तो, G(ed) गाल° (for काल°) K4 Ñ2 V1 3 T4 वनानि (for ध°) D6 G1, 2 4, 5 M3 पा (M3 का) लयन्गोधनानि च — c) V3

मयूरचित्राङ्गदिनो भुजैः प्रहरणावृतैः ।
मयूरपत्रवृन्तानां केशबन्धैः सुयोजितैः ।
बभ्राजुरधिकं गोपाः समवाये तदाद्भुते ॥ ३२
अन्ये वृषानारुरुहुर्नृत्यन्ति स्मापरे मुदा ।
गोपालास्त्वपरे गाश्च जगृहुर्वेगगामिनः ॥ ३३

तस्मिन्पर्यायनिर्वृत्ते गवां नीराजनोत्सवे ।
अन्तर्धानं जगामाशु तेन देहेन सो गिरिः ॥ ३४
कृष्णोऽपि गोपसहितो विवेश व्रजमेव ह ।
गिरियज्ञप्रवृत्तेन तेनाश्चर्येण विस्मितः ॥ ३५

इति श्रीहरिवंशे षष्टितमोऽध्यायः ॥ ६० ॥

६१

वैशंपायन उवाच ।
महे प्रतिहते शक्रः सक्रोधस्त्रिदशेश्वरः ।
संवर्तकं नाम गणं तोयदानामथाब्रवीत् ॥ १

भो बलाहकमातङ्गाः श्रूयतां मम भाषितम् ।
यदि वो मत्प्रियं कार्यं राजभक्तिपुरस्कृतम् ॥ २
एते वृन्दावनगता दामोदरपरायणाः । C 3895 B 2. 18 3 P 2. 18 2

भुक्ति-, B2 शक्ति- (for भक्ति-) — d) Ñ3 V1 B3 Ds D4 6 T1 3 4 G1-3 5 M2 4 रक्तपीतसिताम्बरा , V3 B1 रक्तापीडा° , M3 रक्तपीताम्बरासिता:

32 a) M4 मायूर- (for म°) D2 (sup lin as in text) मयूरचित्राङ्गदितैर् — b) D2 6 T2 4 G1 भुजै प्रहरणायु(T2 G1 °न्वि)तै , D5 T3 भुजै प्रहरणोद्यतै , D4 भुजै प्रहरणैर्वृतै. — T4 om 32cd — c) K2 Ñ3 V1 2 B2 3 Dn Ds D2-4 -चित्रैश्च , K3 4 Ñ1 2 D1 5 -चित्राणां , V3 चित्रैस्तु , D6 G2 -वृत्तान्तै. , T1 -प्रततै , T2 G1 3-5 M4 -प्रवृत्तै ; T3 चित्राश्च (for -वृन्ताना) Cal ed मयूरचित्र पत्रैस्तु — d) V1 M4 सुपूजितै , G2 ततोर्जितै (for सुयोजितै). — e) Ñ3 V1 बभ्राजिरे , V2 3 विभ्राजुर् (for ब°) — f) D6 T2 G2-4 M1-3 तथाद्भुते , G1 तदाद्भुतम् (for °ते). D3 समवायतयाद्भुतम्

33 b) K1 तथा परे ; K3 4 Ñ3 Dn D1 2 5 T3 4 M4 परे मुदा , D6 G1 5 [अ]परे जना , T1 G3 4 परे जना ; M1 2 परे तथा , M3 [अ]परे तथा (for °रे मुदा) D3 नृत्यन्ति परया मुदा , G2 °न्गायन्परे जना — c) T1 4 च (for तु) Ś1 गावो , K Ñ V B1 2 D (except D5 6) T4 गा वै , T3 गोपान् (for गाश्च). — d) D3 वेश्म- (for वेग-)

34 a) Cal ed अस्मिन् (for त°). K3 -निर्वृत्तैर् (for °त्ते) — b) Ñ1 (marg as in text) गोपा (for गवा) K2 3 गवां नीराजनोत्सवै. . — d) Ś1 वै गिरि , K1. 3 4 Ñ2 3 V B D (except D6) T3 4 G5 सोऽचल. (D3 °लात्) (for सो गिरि.)

35 a) T3 गोपै. (for गोप-). — b) D5 जगाम (for विवेश) Ñ2 V1 D5 T4 हि , Ds2 च (for ह) D6 T2 G M4 व्रजमेव विवेश स (D6 G3 M4 ह) — c) Ś1 -यज्ञे (for -यज्ञ-) V2 प्रवर्तेन (for -प्रवृत्तेन) T3 4 गिरियज्ञेन महता. — After 35, N (except Ñ1) S (except M1-3) G(ed.) ins :

704* गोपा. सबालवृद्धा वै तुष्टुवुर्मधुसूदनम् ।

[G(ed) स (for स-) K1 D2 ते , D3 G4 5 च , T2 G1 तु (for वै)]

K4 cont

705* नृत्यं गीतं प्रकुर्वाणा सहकृष्णा व्रजं ययु. ।

Colophon — *Mention of the Epic* K3 Ñ2 Ds2 G3. — *Mention of Khila* All Mss (except Ñ1). — *Subparvan* T4 आश्चर्यपर्व — *Adhy name* Ś1 K2 D6 G2 3 M4 गिरियज्ञ , K1 3 Ñ V B Dn Ds D1 3 5 गिरियज्ञप्रवर्तनम् — *Adhy no.* (figures, words or both) · K3 G2. 4 70 , Ñ3 V1 T1 G3 5 M4 73 ; V2 B2 74 ; V3 Dn Ds D4 T2 G1 72 , D3 78 ; T3 79 , T4 68 , M1-3 69 — *Śloka no* Dn1 39 ; Ds2 38 , D1 70 , D4 50.

61

1 D5 om. the ref. — a) K4 (by corr.) B3 D6 T3 G2 4. 5 M4 मखे (for महे) — b) D6 स क्रोधात् (for सक्रोधस्). V1 सक्रोधस्त्रिदिवेश्वर ; G2 शक्रेशस्त्रिदिवे° . — c) D5 T1. 3 4 M4 सांवर्तकं (for सं°) — d) T1 तथा (for अथ). Ñ1 तोयदानिदमब्रवीत् ; M4 तोयानामथ सोऽब्रवीत्.

2 a) T2 G1 4 हे (for भो). — c) G2 वा (for वो).

नन्दगोपादयो गोपा विद्विषन्ति ममोत्सवम् ॥ ३
आजीवो यः परस्तेषां गोपत्वं च यतः स्मृतम् ।
ता गावः सप्तरात्रेण पीड्यन्तां वृष्टिमारुतैः ॥ ४
ऐरावतगतश्चाहं स्वयमेवाम्बु दारुणम् ।
स्रक्ष्यामि वृष्टिं वातं च वज्राशनिसमप्रभम् ॥ ५
भवद्भिश्चण्डवर्षेण चरता मारुतेन च ।
हतास्ताः सव्रजा गावस्त्यक्ष्यन्ति भुवि जीवितम् ॥ ६
एवमाज्ञापयामास स सर्वाञ्जलदान्प्रभुः ।
प्रत्याहते वै कृष्णेन शासने पाकशासनः ॥ ७
ततस्ते जलदाः कृष्णा घोरनादा भयावहाः ।
आकाशं छादयामासुः सर्वतः पर्वतोपमाः ॥ ८
विद्युत्संपातजननाः शक्रचापविभूषिताः ।
तिमिरावृतमाकाशं चक्रुस्ते जलदास्तदा ॥ ९
गजा इवान्ये संसक्ताः केचिन्मकरवर्चसः ।
नागा इवान्ये गगने चेरुर्जलदपुंगवाः ॥ १०
तेऽन्योन्यवपुषा बद्धा नागयूथायुतोपमाः ।
दुर्दिनं विपुलं चक्रुश्छादयन्तो नभस्तलम् ॥ ११
नृहस्तनागहस्तानां वेणूनां चैव सर्वशः ।
धाराभिस्तुल्यरूपाभिर्ववृषुस्ते बलाहकाः ॥ १२
समुद्रं मेनिरे तं हि खमारूढं नृचक्षुषः ।

— d) D8 -शक्ति (for -भक्ति-) Ś1 K1.3 Dn -पुरस्कृते (for °स्कृतम्)

3 a) K2 एवं (for एते) — d) K2.3 महोत्सवम् (for ममो°)

4 a) T3.4 जीवा गाव, G3 आजीवं च (for °वो यः) K1 D8 G1 स्वेषां (for तेषां) — b) T3.4 श्रुतम् (for स्मृतम्) G1 गोपास्ते नु यत स्मृता, G4 गोगोवत्सादय स्मृता — c) T4 पाल्यन्ता (for पीड्यन्ता) D5 वर्ष- (for वृष्टि-) Ś1 पीड्यन्तो भयमारुतै (sic), M1–3 °न्ता वृष्टिभि सदा

5 a) Ś1 K1 ऐरावण (for °वत-) K1 (marg as in text) [अ]यं (for [अ]हं). — b) M1.2 सु- (for [अ]म्बु) M3 सायमेव सुदारुण — c) D8 मोक्ष्यामि (for स्र°) K V3 T2 G1 वृष्टिवा(T2 °पा)तं, T4 वात वृष्टिं (by transp) Ś1 वृष्टिं वात च स्रक्ष्यामि, T3 स्रक्ष्याम्यनारतं वृष्टिं — d) Ñ V B D8 D3–5 T3.4 -स्वनम् (for -प्रभम्)

6 a) Ś1 तत्र (for चण्ड-) — b) Ñ1 सृजता, D3 T3 महता; G4 भवता (for चरता) — c) Ś1 K3 Ñ1 B1 D8 D2.3.6 T4 G1 सप्रजा (for सव्रजा) — d) D6 त्यजन्ति (for त्यक्ष्यन्ति).

7 Before 7, K1 ins वैशंपायन उवाच — b) K2 Ñ1.3 V B1 D4–6 T1.2 G M4 सर्वान्स (by transp) T2 G1 विभु. (for प्रभु·) K3.4 Ñ2 Dn D1 T3.4 सर्वाञ्जलधरान्प्र- (Ñ2 °गत प्र)भु — c) Ś1 K1 तु (for वै). — d) D6 मखे वै (for शासने) — For 7^{cd}, M1–3 subst

706* मखे प्रतिहते विष्णोः शासनात्पाकशासन· ।

8 a) T4 partly damaged V दृष्टा (for कृष्णा). — b) K3 घोरा नाद-; M3 घोरं नाद- (for घोरनादा) D4 महाबला (for भयावहाः) — d) G2 समन्तात् (for सर्वत·)

9 K2 om (hapl) 9^{a}–11^{b} M4 om 9–12 — a) V1 वियत्संपातजनना·, V3 T4 विद्युत्संघात° — b) T1 -वात- (for -चाप-) — d) K1.2.4 Ñ2 V3 D1 (*sup lin* as in text) M1–3 तथा, V2 मुदा, B1.3 D8 तत (for तदा). — After 9, G4 reads 11^{cd} for the first time, repeating it in its proper place

10 K2 M4 om 10 (cf v l 9) — a) T1 इभा (for गजा) Ñ1 D8 [अ]न्य- (for [अ]न्ये) K4 सन्यक्ता, D5 Bom Poona eds G(ed) संयुक्ता (for संसक्ता) G3 गजा इवान्यान्यसक्ता — b) D3 शकट- (for मकर) — c) D6 T2 G1 M3 नगा (for नागा) V2 गमने (for गगने). T4 नागाकारा इवान्योन्यौ

11 K2 om 11^{ab}, M4 om 11 (for both, cf v. l 9). — a) Ś1 K3.4 Ñ V2.3 B2 Dn D1.3–5 M2 तेऽन्योन्यं; D6 T G अन्योन्यं (D6 G2 °न्य-) (for तेऽन्योन्य-) M1–3 दिग्धा (for बद्धा) — G4 reads 11^{cd} for the first time after 9 — d) B2 दारयन्तो (for छाद°)

12 M4 om 12 (cf v l 9) T3 om 12^{ab} — a) K4 बृहत्तं, T4 स्वहस्ते, G3 नृहस्ति- (for °स्त-) Dn D1 T2 G4 -हस्ताभ्यां (for -हस्ताना) — b) K1 om वेणूनां Ś1 वेणूना च समन्ततः, K2–4 Ñ2.3 V Dn D8 D1.5 T4 G4 °नां चैव (K4 खे च) सर्वतः — For 12^{ab}, M1–3 subst .

707* स्थूलनागोरुहस्तानां सततं सर्वतोदिशम् ।

— G3 repeats 12^{cd} after 14^{ab} — c) T3 बहु- (for तुल्य-) Ś1 धाराभिरक्षमात्राभिर् — d) Ś1 बबन्धुस्, T2 G1 ववर्षुस (for ववृषुस्)

13 a) Ñ3 V1 T1 M4 ते, B1.2 D8 D4 तद् (for तं). D1 वै (for हि). Ś1 समुद्र इव तं मेने — b) K2 Ñ1 क्षमा-

दुर्विगाह्यमपर्यन्तमगाधं दुर्दिनं महत् ॥ १३
न संपतन्ति खगमा दुद्रुवुर्मृगजातयः ।
पर्वताभेषु मेघेषु खे नदत्सु समन्ततः ॥ १४
सुप्तसूर्येन्दुसदृशे मेघैर्नभसि दारुणैः ।
अतिवृष्टेन लोकस्य विरूपमभवद्वपुः ॥ १५
मेघौघैर्निष्प्रभाकारमदृश्यग्रहतारकम् ।
चन्द्रसूर्यांशुरहितं खं बभूवातिनिष्प्रभम् ॥ १६
वारिणा मेघमुक्तेन मुच्यमानेन चासकृत् ।
आबभौ सर्वतस्तत्र भूमिस्तोयमयी यथा ॥ १७
विनेदुर्बर्हिणस्तत्र स्तोककाल्परुताः खगाः ।
विवृद्धिं निम्नगा याताः प्लवगाः संप्लवं गताः ॥ १८
गर्जितेन च मेघानां पर्जन्यनिनदेन च ।
तर्जितानीव कम्पन्ते तृणानि तरुभिः सह ॥ १९
प्राप्तोऽन्तकालो लोकानां प्राप्ता चैकार्णवा मही ।
इति गोपगणा वाक्यं व्याहरन्ति भयार्दिताः ॥ २०
हम्भारवैः क्रन्दमाना न चेलुः स्तम्भितोपमाः ।
निष्कम्पसक्थिश्रवणा निष्प्रयत्नखुराननाः ।
हृष्टलोमार्द्रतनवः क्षामकुक्षिपयोधराः ॥ २१ C 3914 B 2 18 22 P 2. 18 22

रूढं, G2 M4 समा° (for खमा°) —c) M1–3 दुर्विगाहम् (for °गाह्यम्)

14 a) K Ñ2 3 V B1 2 Dn Ds D1–5 T3 4 G4 नैवापतन्वै खगमा, D6 corrupt — After 14ab, G3 repeats 12cd —c) M4 पर्वाभेषु च मेघेषु —d) Ś1 विनदत्सु, D2 नदत्सु सु- G5 खेऽनदन्सु- (for खे नदत्सु)

15 Ś1 repeats 15ab after 33 —a) All Mss (except Ś1 M1–3) नष्ट-; Ś1 (second time) सप्त- (for सुप्त-) Ś1 (both times) K1 3 4 Ñ1 2 Dn D1 5 -सदृशैर्, K2 Ñ3 V B Ds D2–4 T G1 3–5 M4 -नक्षत्रैर्, D6 G2 -सहितैर् (G2 °ते) (for -सदृशे) —b) D4 6 वारुणै; M1–3 दारुणे (for °णैः) —c) Ś1 अभि- (for अति) K4 वर्षेण, Ñ3 V1 -वृष्ट्या तु; D6 T1 2 G M4 -वृष्ट्या च, M1–3 -प्रवृष्टे (for -वृष्टेन) K2 अदृष्टेन बलाक्रम्यद्, K3 अतिवृष्ट्यैव लोकाना —d) G3 अगमद् (for अभवद्) T2 G1 विद्युद्रूपं भवद्वपु (sic)

16 a) Ś1 मेघाभैर्निष्प्रतीकारम्; V2 Ds2 मेघौघैर्निप्रभाकारैर्; D6 T1 2 G M4 मेघैर्निबद्ध(T1 M4 °बिद्ध)माकाशम्, M1–3 मेघौघविततं विश्वम् —b) V2 -तारकै. (for °कम्). —c) M1–3 -सूर्याभ- (M2 °भि-) (for सूर्यांशु-) Ñ1 सचन्द्रसूर्यान्तर्हितं, T1 चन्द्रसूर्यान्तर्हित च, G2 °र्यान्तरहितं. —d) Ś1 T1 M सुनिष्प्रभम्, K2 [अ]तिदारुणम्; D3 T2 G1 3 4 [अ]थ निष्प्रभम् (for [अ]तिनि°)

17 a) M4 हरिणा (for वा°). B Ds T2 G5 युक्तेन (for -मुक्तेन) D3 वारिणाशनियुक्तेन — After 17ab, D6 T1 2 G M ins

708* मेघयुक्तेन वातेन घूर्णितं विश्वतोमुखम् ।

—c) T1 सर्वशस् (for °तस्). —d) T2 भूयस् (for भूमिस्) D3 जलमयी (for तोय°). D5 M4 तथा (for यथा)

18 a) K1 (marg as in text) विजहुर्; V3 विरेजुर् (for विनेदुर्) —b) Ś1 D4 स्तोकका विरुता खगा·, K1 2 4 Ñ3 V1 3 D1–3 5 M4 तोयकाल(M4 °कल्प)रु(Ñ2 V1, 3 °र)ता खगा. K3 स्तोकका विरता गता·, Ñ1 3 तोयकल्प(Ñ3 °काल)रुता. खगा., B1 Dn Ds D6 T G1 4 स्तोककल्परु(D6 °र-, T1 °म)ता खगा B2 स्तोककालरुताः खगा, G2 स्तोकाल्परुदिता खगा, G3 5 तोककल्पतरा (G5 °भृता) खगाः. —c) K2 विवृद्धौ, G2 °त्ति, M4 प्रवृद्धा (for विवृद्धिं) —d) K2 अबला (for प्लवगा·) Ś1 मज्जनं, T2 G4 M1–3 संहतिं (for संप्लवं). K4 निर्झरप्लवसगता, D5 प्लवंगास्तु प्लव गताः; D6 G1–3 5 M4 प्लवंगा संह(G5 °ग)तिं गता.

19 a) T2 G1 4 मेघेन (for मेघानां) —b) K4 Ñ2 V3 पयसां (for पर्जन्य) —c) Ś1 [ए]व, T3 च (for [इ]व) K4 Ñ1 कम्पति, D6 कल्पन्ते (for कम्पन्ते)

20 b) N (except Ś1 D6) T1 3. 4 व्यक्तम् (for प्राप्ता च) G2 M4 [ए]कार्णवी (for °वा) —c) M4 वै गो (for गोप-). —d) Ś1 व्याहरन्तो, T2 G1 °रन्त (for °रन्ति). — After 20, all Mss (except Ś1 Ñ1 M1–3) ins

709* तेनोत्पाताम्बुवर्षेण गावो विप्रहता भृशम् ।

[D6 G1 -वातेन; T1, 2 G2 3 5 M4 -पातेन (for -वर्षेण). K4 ऽपि (for वि-) K1 G1 -हना (for -हता)]

21 a) Ś1 D3 हम्बारवै., K1 भम्भारावै·, D1 रम्भारवै.; D6 G5 हुम्फा°; T1, 2 G1–3 M1–3 हुम्भा°; G4 हम्फा° (for हम्भा°) —b) D6 न चेरु; T2 G1, 3 निश्चला; G5 न शेकुः (for न चेलु) M1–3 न शेकुश्चलितुं पदैः —c) K4 नि.क्रम्य; some Mss नि·कम्प- (for निष्कम्प-). K Ñ V B D1–5 G4 निष्कम्पसक्थि(K [marg as in text] °सर्व-, K2 V1 °शक्ति-; D5 °संधि-, G4 साक्षि)चरणा; D6 T2 G1–3 5 °म्पसाक्षिश्रवणा (T2 °सो) —d) Ś1 निष्प्रयत्ना; K2 °यत्नं; V2 °कम्प-;

काश्चित्प्राणाञ्जहुः श्रान्ता निपेतुः काश्चिदातुराः ।
काश्चित्सवत्साः पतिता गावः शीकरवेजिताः ॥ २२
काश्चिदाक्रम्य क्रोडेन वत्सांस्तिष्ठन्ति मातरः ।
विमुखाः श्रान्तसक्थ्यश्च निराहाराः कृशोदराः ॥ २३
पेतुरार्ता वेपमाना गावो वर्षपराजिताः ।
वत्साश्चोन्मुखका बाला दामोदरमुखाः स्थिताः ।
त्राहीति वदनैर्दीनैः कृष्णमूचुरिवार्तवत् ॥ २४
गवां तत्कदनं दृष्ट्वा दुर्दिनागमजं भयम् ।
गोपांश्चासन्नवदनान्कोपं कृष्णः समादधे ॥ २५
स चिन्तयित्वा संरब्धो दृष्टो योगो गवामिति ।
आत्मानमात्मना वाक्यमिदमाह प्रियंवदः ॥ २६
अद्याहमिममुत्पाट्य सकाननवनं गिरिम् ।
कल्पयेयं गवां स्थानं वर्षत्राणाय दुर्धरम् ॥ २७
अयं धृतो मया शैलो भूमीगृहनिभोपमः ।
त्रास्यन्ते सव्रजा गावो मद्वश्यश्च भविष्यति ॥ २८
एवं स चिन्तयित्वा तु विष्णुः सत्यपराक्रमः ।

---

some Mss नि प्रयत्न- (for निष्प°) —^{e}) Ś1 K1 हृष्टा; V1 कृष्ण- (for हृष्ट-)

22 ^{a}) K3 V3 D3 D1 4 शान्ता (for श्रान्ता). T4 काश्चित्प्राणांश्च सश्रान्ता —^{b}) S1 B1 3 D6 T1 G1 2 5 निषेदुः, K1 Ñ2 3 V3 T3 निष्पेतुः, K2 D1 नि पेतु, M2 विषेदु. (for निपेतु) —^{c}) M3 om पतिता. —^{d}) G1 शकट- (for शीकर-) D3 G2 -वीजिता, D1 corrupt, D2 G4 वेपिताः, T2 3 वेदिता, T4 M1–3 पीडिता (for -वेजिता.) K1 गाव. शीतेन पीडिता, M4 काश्चिच्छिरसि वेजिता.

23 T3 repeats 23^{ab} after 710* —^{a}) K4 कायेन ; M4 क्रोधेन (for क्रोडेन) T3 (second time) आक्रम्य गावः क्रोधेन M1–3 क्रोधे(M3 °डे)न काश्चिदाक्रम्य —^{b}) K3 वशास् (for वत्सास्) —^{c}) G5 विदु खाः (for विमुखा) K1 T3 श्रान्तसक्थिश्, K2 V D1 शा(V3 D1 श्रा)न्तशक्त्यश्, D4 शान्तसंध्यश्, T3 श्रान्तवक्त्राश् (for °सक्थ्यश्) T4 श्रान्तवक्त्राश्च नीहारा —^{d}) K4 निराहार-, T4 स्तम्भिताश्च (for निराहाराः) Ś1 M1–3 कृशा परा., D6 T1 2 G M4 कृशास्तथा (for कृशोदरा.)

24 ^{a}) D1 सर्वा (for आर्ता) —^{c}) M1–3 [ए]वोन्मुखा (for [उ]न्मुखका) Ś1 तत्र (for बाला) V1 B3 वत्साश्चोन्मुख्यकाका(V1 om का)रा, D6 T1 2 G M4 सवत्साश्चोन्मुखा गावो (D6 बाला) —^{d}) K1 -मुखे, K3 -पर (for -मुखा.) D6 T1 2 G M दामोदरमुपस्थिता —^{e}) S1 पाहि पाहीति वचनं, D6 त्राहीति देवं वदनै, T2 G1 3 4 M °ति दीनैर्वद(G4 °च)नै. ; G2 °ति देहैर्वदनै. —^{f}) K Ñ2 3 V B1 2 Dn D3 D1–5 T1 4 G5 इवार्दिता, Ñ1 T3 जला(T3 अथा)र्दिताः, B3 इवार्जिता ; D6 T2 G1–4 इवार्तका (G3 °तुराः) (for °र्तवत्) — After 24, T3 ins.

710* गवां पश्य महाबाहो वेदनां परमातुराः

— After the above, T3 repeats 23^{ab}.

25 T3 om 25^{ab} —^{a}) K3 4 Dn D1 तु (for तत्). G4 क्रन्दनं (for कदनं) —^{b}) Ś1 K Ñ2–3 V B Dn D1–5 महत् (for भयम्) T2 G1 दृष्ट्वा दुर्दिन(G1 °र्जन)जं भयम्. —^{c}) T1, 2 G1 3 M4 सन्न- (for [आ]सन्न-) K1 2 4 Ñ V B Dn D3 D1–5 T4 G5 M4 निधनान् (for -वद°). Ś1 K3 D6 गोपा(K3 °पा)श्च सन्नवदना (D6 °नान्) — After 25^{c}, T3 ins

711* गाश्चापि परमातुरा ।
रोषताम्रेक्षण श्रीमान्

—^{d}) D6 समादहे (for °धे) — After 25, D6 T1 3 4 G1–3 M4 ins

712* अहो धार्ष्ट्यं सुरपतेर्मामनादृत्य संप्रति ।
गवां वध कृतस्तस्य गोपानां च तथा कृत ॥

26 ^{a}) K4 Ñ3 V2 M4 सं- (for स) V3 संहृष्टो ; D6 T1 2 G1 2 4 सक्रुद्धो (for संरब्धो) —^{b}) K3 Dn T1 G5 मयेति च (for गवामिति). K1 2 4 Ñ V B D3 D1–5 T2–4 G1–4 M4 दृष्टोपायो मये(T3 °मे)ति च, D6 दृष्ट्वा प्रायो ममेति च —^{d}) K Ñ2 3 V B Dn D3 D1 3 4 T4 G5 ऊचे (for आह) D6 T2 4 G1 4 M4 प्रियं वच. (for प्रियंवदः) T3 इदमूचे जनार्दन

27 ^{a}) Ś1 K4 Ñ V3 B1 3 D3 D1 4 अथ, T1 G2–4 M4 यथा, T2 यदि (for अद्य) K1 2 V2 एनम् (for इमम्). D3 यथाहमेनमुद्यम्य —^{b}) Ñ1 D4 -गिरि वनम् (for -वनं गिरिम्). D1 सकाननमिमं गिरिम् — D6 om 27^{cd} —^{c}) Ś1 कर्षयेय, V2 कार°, M3 कल्ल° (for कल्प°) —^{d}) Ś1 गवां (for वर्ष-)

28 ^{a}) D1 अयं वृत्तो, M4 अयत्नतो (for अयं धृतो) D6 T1 2 G1 3 M1–3 महा (for मया) D3 अयं ध्रुवो महाशैल. —^{b}) K Dn D1 2 T4 G5 पृथ्वी-, D6 G2 व्रजे (for भूमी-) Ś1 -निभो महान् (for -निभोपम) Ñ V B D3 D3–5 T3 पृथ्वीगृहमिवापरम्, T1 2 G1, 3 4 M4 व्रजे गृहनिभो मया. —^{c}) D6 T2 G2 4 M4 त्रायन्ते (for त्रास्यन्ते) M1–3 जलदाद् (for सव्रजा) K3 Ñ1 2 B2 Dn D31 D4 5 T3 G1 5 गा वै (for गावो) K1 2 V2 B1 3 D32 D1 त्रास्यते सप्रजा गा (K1 °व्रजो गा ; K1 [marg.]. 2 °भयाद्गा, V2 °कलाद्गा) वै.

बाह्वोर्बलं दर्शयिष्यन्समीपं तं महीधरम् ।
दोर्भ्यामुत्पाटयामास कृष्णो गिरिरिवापरः ॥ २९
स धृतः संगतो मेघैर्गिरिः सव्येन पाणिना ।
गृहभावं गतस्तत्र गृहाकारेण वर्चसा ॥ ३०
भूमेरुत्पाट्यमानस्य तस्य शैलस्य सानुषु ।
शिलाः प्रशिथिलाश्चेलुर्निष्पेतुश्च सपादपाः ॥ ३१
शिखरैर्घूर्णमानैश्च सीदमानैश्च सर्वतः ।
विधूतैश्चोच्छ्रितैः शृङ्गैरगमः खगमोऽभवत् ॥ ३२
चलत्प्रस्रवणैः पार्श्वैर्मेघौघैरेकतां गतैः ।
भिद्यमानाश्मनिचयश्चचाल धरणीधरः ॥ ३३
न मेघानां प्रवृष्टानां न शैलस्याश्मवर्षिणः ।
विविदुस्ते जना रूपं वायोस्तस्य च गर्जतः ॥ ३४ C 3928 B 2 18. 35 P 2. 18. 35

— ^{d}) Ś1 D3 मद्वशश्, D6 मद्वाक्यं (for मद्वश्यश्) V2 गोपाश्चैव **शय

29 ^{a}) K3 4 V1 3 B1 D1 4 6 T2 4 G1 3 4 M स (for स) D3 च (for तु) — ^{b}) All Mss (except Ś1 G1 2 M1–3) कृष्ण (for विष्णु·) — After 29^{ab}, K4 ins

713* इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम् ।
दधार लीलया कृष्णश्छत्राकमिव बालक ॥
[= Bhāgavata P, 10 25 19]

— ^{c}) V1 3 D6 बाहोर् (for बाह्वोर्) Ñ1 दर्शयिष्येऽह (hypermetric), D2 दर्शयन्स (for °यिष्यन्) — ^{d}) Ś1 K1 3 Dn D1 समूलं त, K4 समीपस्थं, Ñ2 V B Ds1 D2 4 6 T G M4 °पे त, M1–3 समैक्षत (for समीपं तं) Ñ1 गोपानां हर्षवर्धन , D3 समीपे त महागिरिम् — ^{f}) Ś1 K3 Dn [अ]चलः (for [अ]परः) — After 29, D6 S ins

714* समूलविटपस्कन्धश्चचाल स महागिरि· ।
घणाघणकृत· शैल सप्राण इव नि श्वसन् ॥

[(L 1) D6 -विद्रुम- (for -विटप·) D6 T4 G2 4 5 M4 च (for स) D6 महागिरिम्, M4 महीधर (for महागिरि) — (L 2) D6 खणापर्णकृत. शैल , T2 4 घणावाणि(T4 °णा)कृत शैल , M1–3 खणाखणीकृत शैल (for ^{a})]

30 ^{a}) G4 संहतो (for संगतो) D6 T1 G1–3 5 M स धृत सह तोयौघैर् — ^{b}) V2 दिवि (for गिरि·). — ^{c}) D6 G2 -भागगतस् (for -भावं गतस्) M4 तात (for तत्र) Ś1 गृहैकत्वं गतः सर्वो — ^{d}) D2 गृह्याकारेण, D3 6 T4 G1–3 गुहा° (for गृहा°) B2 3 वर्ष्मणा (for वर्चसा)

31 ^{a}) Ś1 भूमाव् (for भूमेर्) — ^{b}) Ś1 D6 T1. 2 G1 2 4 5 सानुजा , M4 °गा (for °षु). K4 शैलस्य स्वेषु सानुषु, D3 शैलस्यास्य च सा°. — M3 reads 31^{cd} and M1 2 repeat it after 715* — ^{c}) D3 च शिथिलाश्, T1 प्रमुदिताश्, T2 G1 4 5 M1 (both times) 2 (first time) प्रमथिताश् (for प्रशिथिलाश्) Ś1 Ñ1 पेतुर्, K1 B3 चेरुर् (for चेलुर्) G2 M4 शि(M4 शै)ला· प्रमथिताश्चैव — ^{d}) Ś1 M1 2 निपे- (last two both times)तुश्चैव पादपा , K1 D2 3 विनिष्पे तुश्च पा° ; K4 निष्पेतुस्तत्र पा°, V1 निपेतुश्चलपा°, M4 निपेतुश्च सदा वराः — After 31, D6 S ins,

715* रक्षिष्यन्गोधन विष्णुर्गोपानां गोपतिर्हरि. ।
गोमध्यस्थितगोविन्दो गोपान्रक्षन्सगोकुलान् ॥
दधार गोधन विष्णुर्गोधर च विलम्बयन् ।
गोपान्विस्मापयन्गोपो गोमार्गे सस्थितो हरिः ।
भाद्य वपुश्च गृह्णानो लोकानामीश्वरेश्वर. ॥ [5]
व्यर्थं चकार गोविन्दो गोधरस्य समीहितम् ।
गोवर्धनस्यास्य गिरे खे खणायितविग्रह. ॥

[(L 1) M4 निरीक्षन (for रक्षिष्यन्) T1 M4 गोधनो ; G2 M3 गोगन , M1 2 गोधर (for गोपाना) — (L 2) M1. 2 -मध्यस्थ स (for °स्थित) — (L 3) D6 दधार विष्णुर्गोवर्ध (for ^{a}) D6 गोकुल (for गोधर) G4 विडम्बयन् (for विल°). — (L 4) D6 गिरि (for हरि) — (L 5) M1–3 लोकानामीश्वर स्थित (for ^{b}) — (L 6) T4 यत्न (for व्यर्थं) — (L 7) T1 खगत्वगिनविग्रह , T2 G1 खे घनायित°, G4 खे गणाधिप° ; M3 खगणायित°, M4 क्षणखण्डित° (for ^{b})]

— After the above, M1 2 repeat 31^{cd} and M3 reads 31^{cd}

32 ^{a}) Ñ2 शिथिलैर् (for शिखरैर्) Ś1 घूर्ण्यमानैश्; D1 4 चूर्ण° ; M4 सीद° (for घूर्ण°) — ^{b}) M4 घूर्णमानैश् (for सीद°) Ś1 T2 G1 4 सर्वश , K3 Ñ2. 3 (marg) V Dn2 D1. 5 T4 पादपै (for सर्वत) K1 2 D2 3 शतशाखैश्च (D3 °शश्चैव) पादपै ; K4 Ñ3 B Dn1 Ds D4 T3 शीर्यमाणैश्च पादपै (B Ds सर्वश) — ^{c}) K2 Ñ3 V1 B2 3 Ds2 विवृतैश्, Ñ2 Dn T3 4 विधू°, D2 निविष्टैश्, D6 T1 2 G1–4 M विकृतैश्, G5 विक्ष° (for विधू°) K3 4 D1 5 [उ]त्त्रुतैश्, D2 T3 4 G3 M3 [उ]च्छ्रित (for °तैः) D3 विधूतैश्चाप्लुतै शृङ्गैर् — ^{d}) K4 अगम्य (for °म·) Ñ1 खमयो (for खगमो).

33 ^{a}) K1 D1 बलप्र- , K4 जलप्र- , D2 M4 चलप्र-, D4 चरत्प्र (for चलत्प्र·) Dn D6 पार्श्वे (for पार्श्वैर्) — ^{b}) G4 रेणुतां (for एकतां). D4 5 गत (for गतै) — Ds1 om. 33^{cd} — ^{c}) D6 T1 2 G M भिद्यमानो(G2 4 °ना)शनिश्च- (T3 M4 °शि)तैश् — ^{d}) चचार (for °ल). K2 स मही· (for धरणी·) — After 33, Ś1 repeats 15^{ab}

34 ^{a}) D3 मेघानां वि- (for न मेघानां). K3. 4 Ñ1 प्रवि-

मेघैः शिखरसंधानैर्जलप्रस्रवणान्वितैः ।
मिश्रीकृत इवाभाति गिरिरुद्दामबर्हिणः ॥ ३५
आप्लुतोऽयं गिरिः पक्षैरिति विद्याधरोरगाः ।
गन्धर्वऋषयश्चैव वाचो मुञ्चन्ति सुस्वराः ॥ ३६
स कृष्णतलविन्यस्तो मुक्तमूलः क्षितेस्तलात् ।
रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः ॥ ३७
कानिचिच्छादितानीव संकीर्णार्धानि कानिचित् ।
गिरेर्मेघं प्रविष्टानि तस्य शृङ्गाणि चाभवन् ॥ ३८

गिरिणा कम्प्यमानेन कम्पितानां तु शाखिनाम् ।
पुष्पमुच्चावचं भूमौ व्यशीर्यत समन्ततः ॥ ३९
निःसृताः पृथुमूर्धानः स्वस्तिकार्धविभूषिताः ।
द्विजिह्वपतयः क्रुद्धाः खेचराः खे समन्ततः ॥ ४०
आर्तिं जग्मुः खगगणा वर्षेण च भयेन च ।
उत्पत्योत्पत्य गगनात्पुनः पेतुरवाङ्मुखाः ॥ ४१
रेजुश्चारोषिताः सिंहाः सजला इव तोयदाः ।
गर्गरा इव मथ्यन्तो नेदुः शार्दूलपुंगवाः ॥ ४२

ष्टाना, D_n प्रवृद्धानां, D_1 प्रवृत्तानां, D_4 G_2 प्रहृष्टाना, T_1 प्रसृ°; M_3 विवृ° (for प्रवृ°) — [b]) $K_{2, 4}$ $T_{3, 4}$ [आ]त्म-, D_2 च (for [अ]श्म-) $\tilde{N}_1$ स शैलस्याश्मवर्षिणाम् (sic), D_6 $T_{1, 2}$ G M_4 शैलाना चाश्मवर्षिणाम् — After 34[ab], M_{1-3} ins

716* वायोश्च घूर्णमानस्य विद्युतां भ्रमतामपि ।
विष्णुतेजोभिभूतानामदृश्यन्त वपूंषि च ॥
[(L 1) M_3 [आ]पूर्ण- (for घूर्ण-)]

— [c]) $\tilde{N}_{1, 2}$ V_2 $B_{1, 3}$ D_n D_s T_3 न विदुस्, M_{1-3} विदुस्तत् (for विविदुस्) D_6 T_1 G_{2-5} M_4 विदुस्तत्तेजसा रूपं — [d]) $\tilde{N}_1$ तेषां (for वायोस्) K_4 $\tilde{N}_3$ V गर्जितैः, D_6 T_{1-3} G M_4 गर्जितम्, M_{1-3} गर्जनम् (for °त)

35 [a]) $K_{1, 2, 4}$ N V B D_n D_s D_{1-5} मेघैः सशै($\tilde{N}_3$ V_1 $B_{2, 3}$ D_n D_s $D_{2, 3}$ च शै)लसस्थानैर्, $T_{3, 4}$ मेघोघैः शै(T_4 °घैः सशै)लसंछन्नैर् — [b]) B_2 D_n D_5 T_1 नीलैः, M_{1-3} गिरि- (for जल-) $Ś_1$ जलप्रस्रवणार्दितैः, $K_{1, 3, 4}$ $\tilde{N}$ $V_{2, 3}$ $B_{1, 3}$ D_s $D_{1, 4, 6}$ $T_{3, 4}$ G °र्पितैः. — [c]) K_4 छत्रीकृत (for मिश्री°) — [d]) K_1 (marg as in text) $_3$ B_2 D_n $D_{1, 5}$ बर्हिवान्, K_4 T_3 -बर्ह-वान्, $\tilde{N}_2$ V $B_{1, 3}$ D_4 T_4 -बर्हिमान्, D_3 -बर्हिभिः, T_1 $G_{3, 4}$ M_4 -वर्षिभिः, T_2 G_1 -वर्षिण (for -बर्हिण)

36 [a]) K_2 अप्लवो (for आप्लुतो) D_6 $T_{1, 2}$ G वर्षैर्, M_4 वाक्यैर् (for पक्षैर्) — [c]) $M_{1, 2}$ मुनयश् (for -ऋष°) N (except $Ś_1$ D_6) गन्धर्वाप्सरसश्चैव — [d]) K_1 B D_{s2} $D_{1, 4}$ ऽमुञ्चन्त (for मुञ्चन्ति) K $\tilde{N}$ V B D_n D_s $D_{1, 3-5}$ T_3 सर्वशः, T_2 सुस्वरम्, T_4 सर्वतः, $G_{1, 3}$ सस्वरम् (G_3 °रा) (for सुस्वरा)

37 [a]) K $\tilde{N}_{2, 3}$ $V_{1, 3}$ B D_n D_{2-4} T_3 हस्ततल-, $\tilde{N}_1$ D_s बाहुबल-, V_2 कृष्णकर- (for कृष्णतल-) $Ś_1$ -सन्यस्तो (for -वि°) — [b]) M_3 -मूलं (for -मूल) $Ś_1$ तल, D_3 बलात्, G_2 M_4 स्थलात् (for तलात्) — [c]) $Ś_1$ रीतिं, K_4 D_3 भित्तीर्; V_2 वीथीर्, D_6 गिरिर्; G_4 इति (for रीतीर्). — [d]) $Ś_1$ -राजतीम्; K_2 °सा, K_3 °नी (for °तीः)

38 [a]) $K_{1, 2, 4}$ $\tilde{N}$ V B D_n D_s D_{1-5} $T_{1, 3, 4}$ शिथिलानि, K_3 $M_{1, 3}$ शोधितानि, D_6 छालि°, T_2 $G_{1-3, 5}$ छेदि°, M_4 लोलि° (for छादि°) — [b]) $K_{1, 2, 4}$ $\tilde{N}$ V B D_n D_s D_{1-5} $T_{3, 4}$ संछिन्नार्धानि कानिचित्, K_3 छिन्नार्धानीव का°. — [c]) K_4 $\tilde{N}_{2, 3}$ V_1 $B_{1, 3}$ D_{n2} $D_{1, 3, 4}$ T_3 G_4 गिरेर्मेघ-; D_{n1} गिरिमध्ये (for गिरेर्मेघं) K_{1-3} $\tilde{N}_1$ $V_{2, 3}$ B_2 D_s $D_{2, 5}$ $T_{1, 2, 4}$ $G_{1-3, 5}$ M गिरेर्मेघप्रवृष्टानि — [d]) $Ś_1$ शृङ्गाणि विबभुस्तदा

39 [a]) $Ś_1$ गिरिणा कम्प्यमानानि, K_{2-4} $\tilde{N}$ V B D (except D_6) $T_{3, 4}$ G_2 °णा कम्पमानेन — [b]) B D_{s2} D_2 T_3 G_4 च, D_3 सु- (for तु) — [c]) D_6 T_2 G_{1-3} M_4 पुष्पाणि (for पुष्पम्) K_2 भूयो (for भूमौ) — [d]) D_1 T_2 $G_{2, 4}$ व्यशीर्यन्त; M_4 व्यकीर्यन्त (for व्यशीर्यत) $Ś_1$ शीर्यता निलजीवितम् (sic).

40 [a]) K_2 D_6 निःस्वनाः, G_2 निर्वाता (for निःसृताः) D_3 पद्म- (for पृथु-) — [b]) K_3 स्वस्तिकाङ्क-, D_2 °कार्धैर् (for °कार्ध-) D_6 T_2 G_{2-5} M_4 -विभूषणाः (for °षिता) — [c]) $Ś_1$ बद्धाः (for क्रुद्धाः) — [d]) $\tilde{N}_2$ V_1 D_6 T_1 G_{2-5} M_{1-3} खचराः (for खे°) $\tilde{N}_2$ V_3 D_3 ते, G_2 खं (for खे) $Ś_1$ D_{s1} (by corr) ससृजुः क्रोधजं विषम्

41 [c]) T_2 उत्प्लुत्योत्प्लुत्य गगनात्

42 [a]) K_3 $B_{2, 3}$ D_s $D_{4, 5}$ $T_{3, 4}$ G_2 रेसुश्च; K_4 $\tilde{N}_3$ V_1 D_1 G_3 M_4 नेदुश्च, $\tilde{N}_1$ गुहासु, $\tilde{N}_2$ B_1 रेमुश्च; $V_{2, 3}$ वेमुश्च; D_n चेलुश्च, D_6 चेरुश्च, T_1 सेदुश्च (for रेजुश्च) K_{2-4} $\tilde{N}_{1, 3}$ V_3 D_n $D_{1, 3, 6}$ $T_{1, 3, 4}$ $G_{2, 3}$ $M_{1, 2, 4}$ रोषिताः (for [आ]रो°) $Ś_1$ रुषिता रुरुदुः सिंहाः, T_2 $G_{1, 4, 5}$ नेदुश्च रोहिताः सिंहाः, M_3 रेसुश्च शोषिताः सिंहाः — [b]) G_1 सु- (for स-) — [c]) V_3 गह्वराः; T_2 $G_{1, 3}$ घर्घरा (for गर्गरा). $\tilde{N}_1$ G_3 मथ्यन्ते, T_1 मध्यस्था; M_4 नर्तन्तो (for मथ्यन्तो) K_4 निर्भरा इव नश्यन्ते — [d]) D_3 -विक्रमाः (for -पुंगवाः)

43 [a]) K_4 समुद्भूतैः, $\tilde{N}_1$ महीभूतैः, T_2 G_3 समैर्भूतैः (for समीभूतैः) — [b]) B_3 [अ]त्यति- (for °न्त-) $Ś_1$ समैश्चात्यन्त-

विषमैश्च समीभूतैः समैश्चात्यन्तदुर्गमैः ।
व्यावृत्तदेहः स गिरी रम्य एवोपलक्ष्यते ॥ ४३
अभिवृष्टस्य तैर्मेघैस्तस्य रूपं बभूव ह ।
स्तम्भितस्येव रुद्रेण त्रिपुरस्य विहायसि ॥ ४४
बाहुदण्डेन कृष्णस्य विधृतं सुमहत्तदा ।
नीलाभ्रपटलच्छन्नं तद्गिरिच्छत्रमाबभौ ॥ ४५
स्वप्नायमानो जलदैर्निमीलितगुहामुखः ।
बाहूपधाने कृष्णस्य प्रसुप्त इव खे गिरिः ॥ ४६
निर्विहंगरुतैर्वृक्षैर्निर्मयूररुतैर्वनैः ।
निरालम्ब इवाभाति गिरिः स शिखरैर्वृतः ॥ ४७
पर्यस्तैर्घूर्णमानैश्च प्रचलद्भिश्च सानुभिः ।
मज्जगणीव शैलस्य वनानि शिखराणि च ॥ ४८
उत्तमाङ्गगतास्तस्य मेघाः पवनवाहनाः ।
त्वर्यमाणा महेन्द्रेण तोयं मुमुचुरक्षयम् ॥ ४९
स लम्बमानः कृष्णस्य भुजाग्रे सघनो गिरिः ।
चक्रारूढ इवाभाति देशो नृपतिपीडितः ॥ ५०
स मेघनिचयस्तस्थौ गिरिं तं परिवार्य ह ।
पुरं पुरस्कृत्य यथा स्फीतो जनपदो महान् ॥ ५१
निवेश्य तं करे शैलं तुलयित्वा च सस्मितम् ।
प्रोवाच गोप्ता गोपानां प्रजापतिरिव स्थितः ॥ ५२
एतद्देवैरसंभाव्यं दिव्येन विधिना मया ।
कृतं गिरिगृहं गोपा निवातशरणं गवाम् ॥ ५३

C 3947
B 2. 18 54
P 2. 18. 54

मुत्तमै — ^{c}) D3 व्यावृत्तदेहशृङ्गैस्तैर् — ^{d}) K Ñ V2 B Dn Ds D1 3–5 T1 3 4 G1 अन्य (for रम्य) T1 M4 लभ्यते (for लक्ष्यते)

44 ^{a}) K4 -वृष्ट्यास्य, T1 मृष्ट स (for वृष्टस्य) — ^{b}) K3 4 D1 तथा (for तस्य) Ñ1 तु (for ह) — ^{c}) V2 रोषेण, T3 वज्रेण (for रुद्रेण)

45 ^{a}) Ś1 दण्डं तु (for -दण्डेन) — ^{b}) Ñ1 सुमहांस् (for °हत्) S1 सर्वाश्चर्यमयं शुभम्, D6 व्यायतं गिरिपञ्जरम्; T1 2 G M4 व्यायताङ्गुलिपञ्जर(G4 °ञ्चक)म् — ^{c}) M4 नीलाभ्रपटसंछन्न — ^{d}) Ñ1 गिरिच्छत्रमिवाबभौ

46 ^{a}) T4 शय्यायमानो जलदैर् — ^{b}) B3 -गुहाम्बरः; Ds1 °मुखम्, D3 महासुख (for -गुहामुख·) — ^{c}) K1 2 G1 बाहूपधानं कृष्णस्य, D2 6 T2 G3 5 M °पधान कृ(D2 °नात्कृ)ष्णस्य — ^{d}) V2 संसुप्त (for प्र°)

47 ^{a}) T1 निर्विहंगै (for °हग-) — ^{b}) Ñ3 वनम्; V1 घनम्, Dn2 D1 4 घनै; M4 खगै. (for वनै) — ^{d}) Ñ2 3 D4 5 T1 G1 3 5 स्व-, M4 च (for स) V2 B1 ख(B1 खे)-चरैर् (for शिखरैर्) Ś1 वरै, D6 T2 G M3 4 स्वकै, M1 2 घनै (for वृत) Ñ1 B3 3 Ds स गिरि खेचरैर्वृत.

48 ^{a}) S1 पूर्णैस्तैर् (for पर्य°) D4 पूर्यमाणैश् (for घूर्णमानैश्) — ^{b}) S1 प्रलम्बद्भिश्, D6 T2 G1 4 प्रस्फुर°, G3 5 M4 प्रस्खल° (for प्रचल°) K1 2 साधुभि (for सानुभि). G2 प्रस्फुरद्भिश्च बाहुभि — ^{c}) G1 च (for [इ]व)

49 ^{a}) K2 -युतास् (for गतास्) — ^{c}) Ś1 चोद्यमाना; D2 3 T2 G1 4 5 M4 प्रेर्यमाणा, D6 G2 वार्य° (for त्वर्य°) — ^{d}) D3 अञ्जसा (for अक्षयम्)

50 ^{a}) Ñ1 लम्बमानस्तु कृष्णस्य — ^{b}) K3 D4 संहतो, T2 G1 दधतो, G4 सहितो. M4 स महा (for सघनो). D2 भुजाग्रशयने गिरि — ^{c}) D5 T1 2 G1 3 5 M4 दुर्गारूढ; T3 चक्ररूप (for चक्रारूढ) — ^{d}) V1 -पालित., G4 -पीडनात् (for -पीडित).

51 ^{b}) V1 तु (for तं) V2 प्रविगाह्य (for परिवार्य). T4 G5 M4 च (for ह) T1 गिरि तु परिपाल्य च. — ^{c}) M4 पुर (for पुरं) — ^{d}) K1 2 D5 स्फीतं, D6 T2 G1 2 4 5 भीतो, T1 स्थितो (for स्फीतो) — After 51, Ñ1 reads 54^{ab}, repeating it in its proper place.

52 ^{a}) D6 T1 2 G1 2 4 तत् (for तं) — ^{b}) K3 D4 5 T4 तोलयित्वा, T3 धार° (for तुल°) M1 3 तु (for च) Ś1 Ds तोलयित्वा च संमितम्, K1 2 Dn D2 3 6 T2 G M2 तोलयित्वा तु सस्मि(K1 Dn स्मि-, K2 D3 संम)तम्; T1 M4 तोलयित्वा स (M4 तु) विस्मितः — ^{c}) M1–3 लोकानां (for गोपाना) — ^{d}) Ś1 प्रभुः, V1 D3 [आ]स्थित; T2 स्थितम्, G3 [अ]पर· (for स्थित)

53 ^{a}) D3 असमाध्यं (for °भाव्यं) G4 एतद्देवैशसंभाव्यं — ^{d}) Ñ3 B1 Dn Ds2 D3 5 निर्वातं; V D6 G5 निवातं; B2 निवास-; Ds1 T1 विवात- (for नि°) Ñ1 निवातकवचं भवान — After 53, K4 ins

717* न त्रास इह व कार्यो मद्धस्ताद्रि निपातने ।
वातवर्षभयेनालं तत्त्राणं विहितं हि वः ॥
[= Bhāgavata P, 10 25 21).]

54 Ñ1 reads 54^{ab} for the first time after 51. — ^{a}) K4 क्षितिं (for क्षिप्रं). — ^{b}) K4 हि हिम-; Ñ2 V3 एव हि; D6 T1 2 G1–3. 5 M3 इह वि-, G4 इव वि- (for इह हि). — ^{c}) T3 विवातेषु, some Mss. निर्वातेषु (for निवा°).

क्षिप्रं विशन्तु यूथानि गवामिह हि शान्तये ।
निवातेषु च देशेषु निवसन्तु यथासुखम् ।
यथाव्रजं यथायूथं यथासारं च वै सुखम् ॥ ५४
विभज्यतामयं देशः कृतो वर्षनिवारणः ।
शैलोत्पाटनभूरेषा महती निर्मिता मया ।
त्रैलोक्यमप्युत्सहते त्रसितुं किं पुनर्व्रजम् ॥ ५५
ततः किलकिलाशब्दो गवां हम्भारवाश्रितः ।
गोपानां तुमुलो जज्ञे मेघनादश्च बाह्यतः ॥ ५६
प्रविशन्ति ततो गावो गोपैर्यूथप्रकल्पिताः ।
तस्य शैलस्य विपुलं प्रदरं गह्वरोदरम् ॥ ५७
कृष्णोऽपि मूले शैलस्य शैलस्तम्भ इवोच्छ्रितः ।
दधारैकेन हस्तेन शैलं प्रियमिवातिथिम् ॥ ५८
ततो व्रजस्य भाण्डानि युक्तानि शकटानि च ।
विविशुर्वर्षभीतानि तद्गृहं गिरिनिर्मितम् ॥ ५९
अतिदैवं तु कृष्णस्य दृष्ट्वा तत्कर्म वज्रभृत् ।
मिथ्याप्रतिज्ञो जलदान्वारयामास वै विभुः ॥ ६०
सप्तरात्रे तु निर्वृत्ते धरण्यां विगतोत्सवे ।
जगाम संवृतो मेघैर्वृत्रहा स्वर्गमुत्तमम् ॥ ६१
निवृत्ते सप्तरात्रे तु तिष्ये स्कन्ने शतक्रतौ ।
गताभ्रे विमले व्योम्नि दिवसे दीप्तभास्करे ॥ ६२

— ^{d}) V3 G3 निविशन्तु (for निवसन्तु) — V3 reads 54^{ef} on marg — ^{e}) K1 3 Ñ V B Dn Ds D1–5 यथाश्रेष्ठं, K4 °स्वेच्छ (for °व्रजं) K2 यथाश्रेष्ठं यथारूप — ^{f}) K Ñ2 3 V B Dn Ds D1–5 T4 यथा, Ñ1 च तै (for च वै) T3 यथास्थानं यथासुखम्

55 ^{a}) Ś1 अयं घोष., Ñ1 यथोद्देशं (for अयं देश) — ^{b}) G4 M4 -निवारणम् (for °रण.) K Ñ V B D (except D6) T1 4 G3 कृतं वर्षनिवारणम्, T3 कृतं वर्षेण वारणम् — After 55^{cd}, Ds D5 Bom Poona eds ins

718* यूथशश्च विभज्याथ वसध्वं गोपसत्तमाः ।
पञ्चक्रोशप्रमाणेन क्रौशैक विस्तरो महान् ॥

[Bom Poona eds om line 1 —(L 2) Bom Poona eds क्रोशैक- (for °कं)]

— ^{e}) M3 [उ]त्सहेत (for °हते) — ^{f}) K Ñ V B D (except D6) T1 3 4 G3 रक्षितु (for त्रसितुं)

56 ^{a}) D1 T1 G2–5 M1 3 4 किलिकिला-, D3 किलकला- (for °किला-) — ^{b}) T1 2 G1 2 M हुम्भा- (for हम्भा-) Ś1 D6 G3 5 गवां हुम्फा(Ś1 हम्बा, G3 हुम्बा)रमिश्रित., K Ñ V B Dn Ds D1–6 T3 4 गवां ह(K1 भ)म्भारवै सह, G4 गवां हुम्फारव श्रुत. — ^{d}) M3 -नादं (for -नादश्च) T3 वैद्युत (for बाह्यतः)

57 ^{a}) K Ñ V1 3 B2 D1 2 4 5 T1 4 M4 प्राविशन्त (for प्रविशन्ति) D6 T2 G M1–3 प्राविशन्त यथा (M1–3 तदा) गावो — ^{b}) D1 यूथे, D3 वत्स- (for यूथ-) Ś1 -प्रकल्पितैः; T4 -प्रकीर्तिता (for -प्रकल्पिता) B1 गोपैर्यूथोपकल्पिता — ^{c}) Ñ1 शिखरं, T3 4 विवरं (for विपुलं) — ^{d}) Ś1 उदरं, K2 प्रचरं, K4 कन्दरं; Ñ1 T3 4 विपुल; Ñ2 उदारं, Ñ3 V1 Dn Ds D4 5 विवरं, V3 B विमल, D1–3 प्रवर (for प्रदरं) V2 रुचिरं गर्गरोदरम्, G2 प्रदरं गहनो°.

58 ^{a}) Ñ1 हि (for ऽपि) Ś1 D6 T2 G2 3 5 M4 मूलं (for मूले) G(ed) ऽप्य गिरे (for शैलस्य) K1 D2 3 कृष्णोऽपि शैलमूलस्य — ^{b}) D3 नील-, M4 मूल- (for शैल-) Ñ1 [उ]च्छ्रितम्, T2 स्थित (for [उ]च्छ्रित)

59 ^{b}) B1 मुक्तानि (for यु°) — ^{c}) D6 G2 -भूतानि T2 G1 3–5 M4 -रुग्णानि (for -भीतानि) — ^{d}) G6 तं (for तद्) Ś1 T4 गृहं गृह-, Ñ1 गिरिं गृह- (for गृहं गिरि-)

60 ^{a}) D3 आतिदेवं, G2 एवमेतत्, G6 आतिदैवं (for अ°) V2 तत्कार्यं, B1 M1–3 तत्कर्म, T4 तत्सर्वं (for कृष्णस्य) — ^{b}) V2 B1 T3 4 M1–3 कृष्णस्य (for तत्कर्म) — ^{c}) D6 T1 2 G1–3 5 -प्रयत्नो (for -प्रतिज्ञो) D3 बलवान् (for जलदान्) — ^{d}) Ñ1 धारयामास (for वा°) Ś1 स प्रभु, V3 T3 4 वै प्रभु., D6 T1 2 G1 3–5 M वीर्यवान्, G2 देवराट् (for वै विभु)

61 T2 om (hapl) 61^{a}–64^{b} D6 G om 61 — ^{a}) K1 2 ऽतिनिर्वृत्ते, Ñ2 V3 D4 निवृत्ते तु, M1–3 विनिर्वृत्ते (for तु नि°) Ś1 स ससरात्रे निर्वृत्ते — ^{b}) B3 M4 धरण्या विगतोत्सवै (M4 °व), T1 °ण्या विकलोत्सवै — ^{c}) K4 Ds1 D1 स (for स) — ^{d}) B Ds एव च (for उत्तमम्)

62 T2 om 62 (cf v l 61) Ñ1 om 62^{a} G1 reads 62^{a}–64^{a} on marg — ^{a}) K1 3 4 V1 T3 निर्वृत्ते (for निवृत्ते) — ^{b}) K Ñ3 V1 2 B1 Dn Ds D1–5 T1 M4 नि प्रयत्ने; D6 G2–5 निर्गते च (G4 तु), M1–3 वृष्टिस्कन्ने (for तिष्ये स्कन्ने) — ^{c}) K2 V3 गताभ्र- (for °भ्रे) D4 6 T1 G2 5 M निर्मले (for विमले)

63 T2 om 63 (cf v l 61) — ^{b}) D6 T3 4 G2 4 5 M प्रति- (for परि-) K3 Dn2 Ds यथागतम्, V3 कृतश्रमा. (for गत°) Ś1 Dn1 प्रतिजग्मुर्यथागतम् — ^{c}) K2 V2 3 B2 3 D2 3 G3 5 स्थानं गतो, Ñ1 2 स्थानगतो, T3 4 स्थानं

गावस्तेनैव मार्गेण परिजग्मुर्गतश्रमाः ।
स्वं च स्थानं ततो घोषः प्रत्ययात्पुनरेव सः ॥ ६३

कृष्णोऽपि तं गिरिश्रेष्ठं स्वस्थाने स्थावरात्मवान् ।
प्रीतो निवेशयामास श्रुवाय वरदो विभुः ॥ ६४

इति श्रीहरिवंशे एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

वैशंपायन उवाच ।
धृतं गोवर्धनं दृष्ट्वा परित्रातं च गोकुलम् ।
कृष्णस्य दर्शनं शक्रो रोचयामास विस्मितः ॥ १
स निर्जलाम्बुदाकारं मत्तं मदजलोक्षितम् ।
आरुह्यैरावतं नागमाजगाम महीतलम् ॥ २
स ददर्शोपविष्टं वै गोवर्धनशिलातले ।
कृष्णमक्लिष्टकर्माणं पुरुहूतः पुरंदरः ॥ ३
तं दृश्य बालं महता तेजसा दीप्तमव्ययम् ।
गोपवेषधरं विष्णुं परिजज्ञे पुरंदरः ॥ ४
तालस्कन्धवनश्यामं स तं श्रीवत्सलक्षणम् ।
पर्याप्तनयनः शक्रः सर्वैर्नेत्रैरुदैक्षत ॥ ५
दृष्ट्वा चैनं श्रिया जुष्टं मर्त्यलोकेऽमरोपमम् । C 3965 B 2. 19. 6 P 2. 19. 6

पुनर् (for स्थानं ततो) D5 जग्मु , D6 घोष (for घोष) G4 स्वयं च स्थानतो घोष — d) S1 हि , Ñ1 D4 ह (for स) D6 नन्दे व्रजनिवासिन

64 T2 om 64ab (cf v l 61) — a) D1 गिरिं (for गिरि-) — G1 om 64b — b) Ś1 K4 Ñ2 3 V1 2 B2 3 Ds2 T3 स्वे (for स्व-) K3 D1 स्वे स्थाने स्थाप्य चात्मवान् , Ñ1 G3 स्वस्थाने स्थाप्य वीर्यवान् , D5 6 T1 G 4 5 °ने स्थाप्य चात्मन , M1 2 (inf lin as in text) °ने पूर्ववद्विभु — c) M4 प्रीत्या (for प्रीतो) — d) K3 Dn Ds G5 M1–3 शिवाय , D3 वासाय (for श्रुवाय)

Colophon — *Mention of the Epic* K3 Ñ2 Ds2 T3 — *Mention of Khila* Ś1 K3 Ñ2 3 V B Dn Ds D1 — *Sub-parvan* D4 पारिजात , T4 आश्चर्यपर्व — *Adhy name* Ś1 K2–4 Ñ1 3 D1 3 G3 गोवर्धनोद्धरणम् , K1 Ñ3 V B Dn Ds D2 4–6 T1 2 G1 2 M4 गोवर्धनधारणम् — *Adhy no* (figures, words or both) K3 D1 G2 4 71 ; Ñ3 V1 T1 G3 5 M4 74 ; V2 B2 75 , V3 Dn Ds2 T2 G1 73 , D3 79 , D4 72 , T3 80 , T4 69 , M1–3 70 — *Śloka no* Dn 66 , Ds2 D3 4 67

62

1 a) G3 चैव (for दृष्ट्वा) — d) B1 सस्मित , D3 वृत्रहा (for विस्मितः)

2 G2 om 2ab — a) D6 स निर्जलाम्बुकारं च — b) M3 मुक्तं (for मत्तं) D2 -जलोच्छ्रितम् (for °क्षितम्) — c) Ś1 [ऐ]रावणं , Dn1 °वते (for °वत) K2 Ñ2 Ds नाम (for नागम्) — d) K2 जगाम महतीतलम्

3 a) Dn1 [अ]थ (for [उ]प-) T1 हि , M4 तद् (for वै) — B3 om 3c–5b — c) K3 अकृष्ट- , D5 T2 G M वैकृत- (for अक्लिष्ट-)

4 B3 om 4 (cf v l 3) T1 om (hapl) 4 — a) S1 D6 T2 G2 5 M4 संदृश्य , K Ñ V2 3 B1 2 Dn Ds D1, 3–5 T3 4 G1 3 4 तं वीक्ष्य (for तं दृश्य) V1 D2 तं वीक्ष्यमाण महता — b) M3 तपसा (for तेजसा) D6 T2 G3–5 M4 युक्तम् (for दीप्तम्) — c) S1 वेश- (for -वेष-) Ñ1 दृष्ट्वा (for विष्णु) — d) K Ñ V B1 2 Dn Ds D1–5 T3 4 प्रीतिं लेभे , D5 T2 G M परिजह्रे (for °जज्ञे)

5 B3 om 5ab (cf. v l 3). — a) Ñ1 (marg) -जल- , M1 2 -तल- , M3 -तल (for -वन-) K1 3 Ñ2 Ds1 D1 2 4 6 तं साम्बुजलदश्याम , K2. 4 Dn तं साम्बुदज(Dn1 °त)ल° , Ñ3 V B1. 2 Ds2 D3 5 तं साम्बु(B2 D3 सोऽम्बु)-जद्लश्या(V1 3 °लं श्या)म , T1 2 G1–3 M4 तमम्बुजद(T2 G1 M4 °दज)ल° , T3. 4 जलदश्यामलं कृष्णं ; G4 तं नीलजलदश्यामं ; G5 तमम्बुजवल° — b) K Ñ2 V2. 3 B1 2 Dn Ds D2 4 5 T1 G3 4 कृष्ण , D1 शुभ (for स तं). Ñ3 V1 कृष्णं राजीवलोचनम् , D3 कृष्णं श्रीवत्सभूषणम् , D6 T2–4 G1 2 5 M4 श्रीवत्सकृतलक्षणम् — c) D3 T4 कृष्णं ; T2 G1 2. 5 M1–3 श्रीमान् (for शक्र.) D6 G3. 4 पर्याप्तनयनै. श्रीमान् ; T1 M4 °दर्शन. श्रीमान् , T3 सहस्रनयन. कृष्णं — d) S1 सर्व- (for सर्वैर्) T2 G1 अक्षैर् (for नेत्रैर्). K1 D5 उदैक्षित , K3 उदीक्ष्यते (for उदैक्षत) D3 सर्वनेत्रैरवैक्षत

6 a) D6 T1 2 G M4 युक्तं (for जुष्टं). — b) K2 मृत्यु- (for मर्त्य-) Dn1 नरोपमम् ; D2 नरोत्तमम् (for ऽमरोपमम्). G2 मर्त्यलोकेन्द्रमव्ययम् — After 6ab, D5 T1. 2 G M4 ins. :

सूपविष्टं शिलापृष्ठे शक्रः स व्रीडितोऽभवत् ॥ ६
तस्योपविष्टस्य सुखं पक्षाभ्यां पक्षिपुंगवः ।
अन्तर्धानगतश्छायां चकारोरगभोजनः ॥ ७
तं विविक्ते नगगतं लोकवृत्तान्ततत्परम् ।
उपतस्थे गजं हित्वा कृष्णं बलनिषूदनः ॥ ८

स समीपगतस्तस्य दिव्यस्रगनुलेपनः ।
रराज देवराजो वै वज्रपूर्णकरः प्रभुः ॥ ९
किरीटेनार्कवर्णेन विद्युद्विद्योतकारिणा ।
अथ दिव्येन मधुरं व्याजहार स्वरेण तम् ॥ १०
कृष्ण कृष्ण महाबाहो ज्ञातीनां नन्दिवर्धन ।

719* सुराणां कार्यसिद्ध्यर्थं नित्यं कर्मसु निष्ठितम् ।
[T_1 G_3 नित्य- (for नित्य)]

— ^{c}) $T_{3\ 4}$ उपविष्ट (for सू°) V_1 शैल- (for शिला-) — ^{d}) $Ś_1$ $K_{1.\ 2}$ D_4 सु , K_4 om , $D_{2\ 3}$ M_4 स- (for स) Some Mss व्रीळितो (for व्रीडितो)

7 ^{a}) $Ś_1$ $K_{1\ 2}$ $Ñ_{2\ 3}$ $V_{1\ 3}$ B_2 D_5 D_2 T_4 मुखं, M_{1-3} मुखे (for सुख) — ^{c}) K_1 $Ñ$ D_8 $D_{5\ 6}$ T_1 $G_{2\ 3}$ अन्तर्धान , G_4 °य (for °न-) V_3 -गतश्चायं (for °श्छाया) T_4 अन्तर्धाय गतश्चायं — After 7, D_6 S (except $T_{3\ 4}$) ins .

720* छायया च तया युक्त केशव यज्ञरूपिणम् ।
[G_1 छायाया (for छायया) $M_{\ 3}$ सहमा (for च तया) T_1 छायया च समायुक्त (for ^{a}). D_6 -पूरुषम् (for -रूपिणम्)]

8 ^{a}) D_2 विविक्तं (for °क्ते) S_1 गिरि- , K Ñ V B D (except D_3) T_{2-4} G वन- (for नग-) $K_{1\ 2}$ -गते (for -गतं) T_1 M_4 तं विविक्तेष्वनुग(M_4 °वन)तं — ^{b}) $Ñ_2$ -कारकम् (for -तत्परम्) — ^{c}) T_3 रुषं (for गजं) D_6 $T_{1\ 2}$ G M_4 त्यक्त्वा (for हित्वा) — After 8, G_4 ins 721*

9 G_4 om 9^a–10^b B_1 repeats 9^a 10^b, and line 1 of 721* after 18^c — ^{a}) $M_{2\ 3}$ श्रीमान् (for तस्य·) M_1 समीपमागत श्रीमान् — ^{b}) $V_{1\ 3}$ स्रगन्ध- (for -स्रगनु-) — ^{d}) D_3 विभु (for प्रभु)

10 For the repetition in B_1, cf v l 9 G_4 om 10^{ab} (cf v l 9) — ^{a}) K Ñ $V_{1\ 2}$ $B_{2\ 3}$ D (except D_3) $T_{3.\ 4}$ -तुल्येन (for -वर्णेन) — ^{b}) K Ñ $V_{1\ 3}$ B_1 (both times) $_{2\ 3}$ Dn Ds $D_{1\ 3-5}$ $T_{1\ 3\ 4}$ G_3 M_4 विद्युदुद्द्योतकारिणा — N (except $Ś_1$) T $G_{1-3\ 5}$ M_4 ins after 10^{ab}. G_4 after 8

721* कुण्डलाभ्यां स दिव्याभ्यां सततं शोभितानन ।
पद्मस्तबकलम्बेन देवभूषणभूषित ॥
सहस्रपत्रकान्तेन देहभूषणकारिणा ।
ईक्षमाणः सहस्रेण नेत्राणा कामरूपिणाम् ।
त्रिदशाज्ञापनार्थेन मेघनिर्घोषकारिणा ॥

[D_3 om (hapl) lines 1–3 G_4 om lines 1–2 B_1 repeats line 1 after the repetition of 10^{ab} — (L 1) V_2 वज्राभ्या, G_3 दीप्ताभ्या (for दिव्याभ्यां) $K_{1\ 2}$ D_2 सततं द्योतितानन (for ^{b}). — $D_{2\ 6}$ T_2 $G_{1-3\ 5}$ M_4 om line 2. $Ñ_{2.\ 3}$ B_1 $T_{1.\ 3\ 4}$ transp lines 2 and 3. — (L 2) $Ñ_2$ -लब्धेन , V_3 -वर्णेन , B_3 -युक्तेन (for -लम्बेन) $Ñ_2$ V_2 B Dn Ds $T_{1\ 3\ 4}$ हारेणोरसि भूषित (for ^{b}) — K $V_{1\ 3}$ $B_{2\ 3}$ D_1 om. (hapl) line 3 — (L. 4) $K_{1\ 2}$ प्रेक्ष्यमाण , K_3 $V_{1\ 3}$ ईक्ष्य° , K_4 प्रेक्ष° , Ds_1 वीक्ष्य° , Ds_2 वीक्ष° (for ईक्ष°). T_3 वीक्षमाण सहस्रैस्तैर् (for ^{a}) K_1 नेत्राभ्या , $T_{3\ 4}$ नेत्रैस्तं (for नेत्राणा) K_3 V_3 -रूपिणम् , D_3 -रूपिणा (for °णाम्). K_2 नेत्राभ्या कामरूपिणा (for ^{b}) — D_6 T G M_4 ins after line 4 M_{1-3} after 10^{ab}

721 A* प्रणाममकरोच्छक्र क्षन्तव्यमिति चाब्रवीत् ।
तुष्टाव च हरिं विष्णु गोपवेषविभूषितम् ॥
नमस्ते देवदेवेश भूतभावनभावन ।
हिरण्यरेतसे तुभ्य नम सोमप्रदायिने ॥
नमो वेदैकतत्त्वार्थ तन्निबोधन बोधन ।
नम प्रणववाच्याय वाचकाय नमो नम ॥
नमस्ते विश्वरूपाय नमो लोकहिताय ते ।
नमो गोपविरूपाय नमो गोधरधारिणे ॥
नम पुराणरूपाय नमस्ते मधुसूदन ॥
किं वानेन जगन्नाथ नमस्कारेण केशव ।
या यास्तु देवदेवस्य मूर्तयो मूर्तिमत्तर ।
नमस्ताभ्यस्तथा विष्णो सर्वाभ्य सर्वकामद ॥
क्षन्तव्य मम देवेश कृत गोपालनन्दन ।
अज्ञानादथ वा ज्ञानाद्रोषाद्वा यदुनन्दन ॥
समर्थेष्वसमर्थेषु रोष प्रस्फुरति प्रभो ।
न केनचिद्भवाञ्शास्य शास्ता सर्वस्य वै प्रभो ॥
त्वन्निमित्तमिद सर्वमैन्द्र मम सुदुर्लभम् ।
त्वत्प्रसादाज्जगन्नाथ देवानामीश्वरो यत ॥
ततश्च देवदेवेश क्षन्तव्य दास इत्यहम् ।
इत्युक्त्वाथ पुनर्वाक्य व्याजहार शचीपति ॥
कृष्ण कमलपत्राक्षमबाल बालरूपिणम् ।
अतसीपुष्पसंकाश श्रीवत्सकृतलक्षणम् ।
उपविष्ट शिलापृष्ठे कृत्वा कर्मातिमानुपम् ॥
न हि दासेषु कोपोऽस्ति स्वामिना स्वामिसत्तम ।

Colophon

[Before line 1, G_1 reads lines 9–10 — (L 2) D_6 विभु , M_3 हरिर् (for हरिं) — (L 5) M_3 -तत्त्वार्थं (for °र्थ) T_3 नमस्ते देवतत्त्वार्थ (for ^{a}) $G_{1.\ 2}$ तन्निबोधति बो(G_2 °व तपो)धन , M_3 °बाधन बाधन (for ^{b}) — (L 6) D_6 -वाक्याय (for -वाच्याय) — M_{1-3} om (hapl) lines

अतिदैवं कृतं कर्म त्वया प्रीतिमता गवाम् ॥ ११
मया सृष्टेषु मेघेषु युगान्तावर्तकारिषु ।
यत्त्वया रक्षिता गावस्तेनास्मि परितोषितः ॥ १२
स्वायंभुवेन योगेन यच्चायं पर्वतोत्तमः ।
धृतो वेश्म इवाकाशे को ह्येनेन न विस्मयेत् ॥ १३
प्रतिषिद्धे मम महे मयेयं रुषितेन वै ।
अतिवृष्टिः कृता कृष्ण गवां वै सप्तरात्रिकी ॥ १४
सा त्वया प्रतिषिद्धेयं मेघवृष्टिर्दुरासदा ।
देवैः सदानवगणैर्दुर्निवार्या मयि स्थिते ॥ १५
अहो मे सुप्रियं कृष्ण यत्त्वं मानुषदेहवान् ।
समग्रं वैष्णवं तेजो विनिगूहसि गोपितः ॥ १६
साधितं देवतानां हि मन्येऽहं कार्यमव्ययम् ।
त्वयि मानुष्यमापन्ने युक्तेनैवं स्वतेजसा ॥ १७ C 3979
सेत्स्यते वीर कार्यार्थो न किंचित्परिहास्यते । B 2.19.20 P 2.19.20

7^{b}–8^{a}. — (L 8) M4 -विस्पाग (for °पाद) T2 G1 3 गोवह्न-, T4 भूरू- (for गोरू-) D3 नमो गोपदाय च (for ^{b}) — (L 9) G2 नमस्ते विश्वमाजिणे (for ^{b}) — (L 10) T3 नपना वाय केशव (for ^{b}) — (L 11) M1–3 देवेश (for -देवस्य) T3 4 या यान्तु तव देवेश (for ^{a}) G2 मूर्त्या तु (for मूर्तये) T3 मूर्तय परमात्मन (for ^{b}) — (L 12) M2 सदा (for तथा) — (L 13) T3 कृष्णो गोपनन्दन (for ^{b}) — (L 14) G2 यज्ञ (for अथ) M2 दोपाद् (for रोषाद्) — (L 15) T2 G2 समर्येनासमर्येषु (for ^{a}) T2 प्रस्फुटति ; M4 °रिन (for °रति) T3 प्रभु (for प्रभो) — T3 4 G4 om (hapl) line 16 — (L 16) D6 शस्य, M4 शक्त (for शास्य) M3 हि, M4 च (for वै) — (L 17) D6 T1 नन्निमित्तम् (for त्व°) G2 च (for सु-) — (L 19) G1 2 तु (for च) T2 क्षन्तव्यो (for °व्य) D6 ईश (for दास) — T3 4 M1–3 om lines 20–23 Before line 20, T1 ins वैशंपायन — (L 20) M4 स (for [अ]थ) — (L 21) G2 बाल बालकरूपिणम् (for ^{b}) — (L 22) T2 G2 -सदृशं (for -सकाश) T1 -वक्षसम् (for -लक्षणम्) — (L 23) T1 कर्म कृत्वा (by transp) — (L 24) T3 स्वामिन (for °ना) — Colophon om in T3 4 — *Adhy name* D6 G2 3 M4 महेन्द्राभिगमनम् — *Adhy no* T1 G3 5 M4 75, T3 G1 74, G2 4 72, M1–3 71]

— Before line 5, D6 T1 2 4 G1 3 4 M ins वैशंपायन T4 om line 5 — (L 5) K2 त्रिदशाधिपति सोऽथ, Ñ1 °ज्ञापितो वीरो, Ñ2 V2 B Ds D4 6 T2 G1 2 5 °ज्ञापनोत्थेन (T2 G1 5 °त्थान), G4 त्रिदशाज्ञापनोऽर्थाना (for ^{a}) B Ds -घोषिणा, G4 -कारिणम् (for °णा) K2 मेघाना घोपकारिण (for ^{b})]

— Before 10^{cd}, some Mss ins वैशंपायन उवाच — ^{c}) T4 G2 भूय स (G2 सु-) (for दिव्येन) Ñ3 वै सन्तो (for मधुरं) — ^{d}) D6 T1 2 G1 2 4 5 M स्वरेण स (M1–3 वै), T4 सुरेश्वर ; G3 स्वतेजस (for स्वरेण तम्) Ds2 मधुरेण स्वरेण च

11 Before 11, D4 ins इन्द्र उवाच — ^{a}) M1–3 जगन्नाथ (for महाबाहो) — ^{b}) M1–3 जगता भूषणाच्युत — ^{c}) T1 अखिल, T2 आदिदेव, Bom. Poona eds अतिदिव्य (for °दैव) K2 अप्यनर्दैवतं कर्म — ^{d}) V1 2 G2 प्रीतिमता (for °ता) T1 M4 त्वया प्रीतिग(M4 °ति ग)ता वयम्

12 ^{a}) S1 यथा (for मया) K Ñ V B D T [उ]त्सृष्टेषु (for सृष्टेषु) — ^{b}) Ñ1 V1 T1 2 G3–5 M4 युगान्तावर्तकादिषु.

13 K2 om 13–23 — ^{a}) G2 M3 स्वयंभुवेन S1 रूपेण (for योगेन) T1 M4 त्वया भुवि नियोगेन — ^{b}) Ś1 K3 Ñ V B D T G1 3–5 M4 यश्चायं, K4 यथायं (for यच्चायं) — ^{c}) K1 3 4 Ñ2 3 V B D (except D6) T3 4 G4 M4 वेश्मवद् (for वेश्म इव) — ^{d}) S1 K3 D3 T1 G4 [अ]नेन (for [ए]तेन)

14 K2 om 14 (cf v l 13) — ^{a}) K3 Ñ1 B3 D6 T2 G M3 4 मखे, K4 हते, T1 महीं (for महे) T3 स्वयं तु प्रतिषिद्धेन — ^{b}) K4 मयोक्ते, D3 मया च ; T1 मयैव (for मयेय) M3 मयेद रक्षितेन वै (sic) — ^{c}) G5 अद्य (for अति-) — ^{d}) G1 4 गता (for गवा) K3 4 B1 Dn2 Ds2 D5 6 T3 G3 5 M1 सास- (for सप्त-) Dn1 -रात्रिका (for °की)

15 K2 om 15 (cf v l 13) — ^{a}) G2 4 या (for सा) Ñ2 प्रतिविद्धा (for °षिद्धा) S1 [अ]पि ; M1–3 [इ]ह (for [इ]यं) — ^{b}) K4 (marg as in text) दुराकृता (for °सदा)

16 K2 om 16 (cf v l 13) — ^{a}) T3 यत्त्वं (for कृष्ण) — ^{b}) Ñ1 V2 यस्त्व, T1 त्वं च ; M1–3 त्व हि (for यत्त्वं) D4 (marg as in text) देहभृत्, T4 -रूपवान् (for -देह°) B T3 मानुषेषु च देहवान् — ^{d}) Ñ2 विनिगृह्णासि रोषित, D6 S (except T3 4) त्वय(M4 क्ष)सृजस्त्वं हि रोषितः (G2 माधव).

17 K2 om 17 (cf v l 13) — ^{a}) K1 साधितं कृष्ण देवाना — Ds1 reads 17^{d}–18^{b} after 21^{c}. — ^{d}) K1, 3 Ñ3 V1 B2 Dn Ds D1–3 6 T1 2 M1 युक्ते चैव ; K4 युक्तेनेदं, Ñ1 °न च, V2 3 B1 3 D4 T3 M2. 3 युक्ते चैवं ; D5 G M4 युक्तेनैव ; T4 युक्तं चैवं (for युक्तेनैवं).

देवानां यद्भवान्नेता सर्वकार्यपुरोगमः ॥ १८
एकस्त्वमसि लोकानां देवानां च सनातनः ।
द्वितीयं नानुपश्यामि धुरं यस्ते समुद्वहेत् ॥ १९
यथा हि पुंगवः श्रेष्ठो मग्ने धुरि नियुज्यते ।
एवं त्वमसि देवानां मग्नानां द्विजवाहन ॥ २०
त्वच्छरीरगतं कृष्ण जगत्प्रहरणं त्विदम् ।
ब्रह्मणा साधु निर्दिष्टं धातुभ्य इव काञ्चनम् ॥ २१
स्वयं स्वयंभूर्भगवान्बुद्ध्याथ वयसापि वा ।
न त्वानुगन्तुं शक्तो वै पङ्गुर्द्रुतगतिं यथा ॥ २२
स्थाणुभ्यो हिमवाञ्श्रेष्ठो ह्रदानां वरुणालयः ।
गरुत्मान्पक्षिणां श्रेष्ठो देवतानां भवान्वरः ॥ २३
अपामधस्ताल्लोको वै तस्योपरि महीधराः ।
नागानामुपरिष्टाद्भूः पृथिव्युपरि मानुषाः ॥ २४
मनुष्यलोकादूर्ध्वं तु खगानां गतिरुच्यते ।
आकाशस्योपरि रविर्द्वारं स्वर्गस्य भानुमान् ॥ २५
देवलोकः परस्तस्माद्विमानगहनो महान् ।

18 For the sequence in Ds1, cf v l 17 K2 om 18 (cf v l 13) Ñ1 reads 18-20 on marg — a) K3 D4 देव, Ñ1 Dn2 D1 5 सर्वं, D3 चैव, G5 M2 3 वीर्यै (for वीर) Ñ2 कार्यं वै (for कार्यार्थी) — c) K4 M4 एव (for नेता) — After 18c, B1 repeats 9a–10b and line 1 of 721* — d) K1 3 Dn2 कार्ये, T4 -काम- (for कार्य-)

19 K2 om 19 (cf v l 13) — ab) M3 अपि (for असि) K1 3 4 Ñ V B Dn Ds D1–5 T3 M4 transp लोकानां and देवाना — K1 reads 19c–20d twice — c) Ñ3 V1 2 B2 Dn D4 5 नात्र, T3 न तु, T4 तु न (for नानु-) D2 -पश्याम, D3 °मो (for °मि) — d) Ñ1 स सेवित, V1 समुद्धरेत्, M3 °द्वहन् (for °द्वहेत्) Bom Poona eds G(ed) यस्तेषां च धुरं वहेत्

20 For the repetition in K1, cf v l 19 K2 om 20 (cf v l 13) M4 om 20ab — a) Ñ2 (marg as in text) G2 तथा (for यथा) — b) V2 T1 G4 ह्यग्रे, B1 भग्ने, D3 भूमेर्, D6 T2 G1–3 5 लग्ने, M1 3 जनैर् (for मग्ने) K3 V1 2 B2 3 D1 T4 नियोज्यते (for नियु°) Ñ1 3 Dn D5 T3 भग्ने (Dn T3 ह्यग्रे) धुरि नियोज्यते, D2 मग्नायां धुरि युज्यते — c) Ś1 तेषां; M1–3 तथा (for एवं) Ñ2 V1 M1–3 अपि, T2 G2 3 5 M4 इह (for असि) K1 (both times) D2 भूताना (for देवानां) — d) K4 पक्षि- (for द्विज-) K3 Ñ1 2 B2 D1 2, 4 -वाहन (for °न) Ś1 मग्नानां सत्रवाहन, K1 (both times) लोकानां च सनातन.; D3 भूतानां द्विजवाहन, D6 T1 2 G M आर्ता(T2 G1 मर्त्या)नां कार्यवाहन (D6 M4 °नम्).

21 K2 om 21 (cf v l 13) — a) D1 त्वच्छरीरमिदं कृष्ण — b) K1 4 D2 3 प्रवहण, K3 Ñ3 V1 2 B Dn Ds D4 T3 4 प्रकरणं, D6 T1 2 G1 3–5 M प्रभवते; G2 प्रवद्वृते (for प्रहरणं). D5 लोकानां प्रवणं त्विदम् — c) G4 धातृ- (for साधु) G1 ब्राह्मणान्साधु निर्दिष्टान् (sic) — After 21c, Ds1 reads 17d–18b.

22 K2 om 22 (cf v l 13) — a) M4 भूताना (for भगवान्) D4 स्वयभूर्भगवानेव, G(ed) स्वयभूर्भगवाञ्श्रेष्ठो — b) Ś1 वा, K1 D2–4 T2 [अ]पि, Ñ3 (marg) V1 D6 T1 G च (for [अ]थ) Ñ2 V3 वचसा (for वयसा) T2 G1 च, T3 ह (for वा) — c) K1 पारं न (for न त्वानु-) K3 4 Ñ V B D (except D6) T3 4 शक्नोति, T1 शक्तो वा (for शक्तो वै) — d) G2–5 दूर- (for द्रुत-) T2 -गतो (for गतिं)

23 K2 om 23 (cf v l 13) — a) D6 S (except T3 4) शैलाना (for स्थाणुभ्यो) G2 शैलो (for श्रेष्ठो) — c) M3 गरुड (for गरुत्मान्) — d) K1 3 4 Ñ1 3 V B Dn Ds D1–3 5 M4 देवाना च (K1 हि, M4 त्वं) (for देवताना). Ñ2 देवाना च भगवान्वर (hypermetric), D4 देवाना भगवान्वर, D6 T1 2 G देवाना हि भवान्प्रभु (G4 °भो), T3 4 देवानां (T4 स देवो) भगवान्हरि.

24 a) K3 V1 B2 M3 लोका वै, D3 लोकोऽस्ति; M4 लोकाना (for लोको वै) K1 अपोऽधस्ताल्लोकोऽयं (submetric) — b) K4 महीरुहा, D2 °धरान्, T3 °धर (for °धरा) — c) K3 Dn1 D2 3 G2 M3 नगानाम् (for ना°) K2 V2 उपरिष्टाच्च, B5 °नां (for °द्भू) — d) K1 पृथिव्योपरि, T2 G1 3 भूमेरु° (for पृथिव्यु°) V1 M1 3 मानवा; T4 मानुष (for °षाः) D6 G2 4 5 M4 भूमेरुपरि मानुष (M4 °षम्).

25 a) K4 G4 मानुष्य- (for मनुष्य-) Dn1 -लोकादूर्ध्वे; D3 -लोकस्योर्ध्वे (for लोकादूर्ध्वं) K1 च; K4 हि, T1 वै (for तु) — b) M1 2 स्वर्गिणा (for खगानां) — c) M4 द्वारं (for रविर्).

26 b) K1–3 Ñ V B D (except D6) T G4 M3 -गमनो (for -गहनो) — c) M3 [अ]यं (for [अ]हं), K1 (*sup lin* as in text) V3 देव (for कृष्ण) K2 वचनाद् (for देवानाम्) — d) K4 V2 इन्द्रो (for ऐन्द्रे). K1 2 Ñ1 D6 G1 2 4 5 M प्रणिहित (for विनि°). B1 परे (for पदे). G3 ऐन्द्रेण प्रहित. पदे — After 26, D6 T1 2

यत्राहं कृष्ण देवानामैन्द्रे विनिहितः पदे ॥ २६
स्वर्गादूर्ध्वं ब्रह्मलोको ब्रह्मर्षिगणसेवितः ।
तत्र सोमगतिश्चैव ज्योतिषां च महात्मनाम् ॥ २७
तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि ।
स हि सर्वगतः कृष्ण महाकाशगतो महान् ॥ २८
3 For the sequence in T2 G1, cf v l 1 — ^{a}) Ś1 G4 5 सनिष्पेषैर्, D1 सुनिष्पेष, T2 स पुष्पेषु, G2 सनिष्पेषाज् (for सनिष्पेषं) — ^{b}) K4 Ñ1 2 V2 3 B1 2 Ds D1 2 G1 [ओ]ष्ठ (for [ओ]ष्ठौ) — ^{c}) D1 गर्जिताविद्धलाङ्गूलः — After 3, G3 repeats 2^{cd}

4 ^{a}) Ñ2 M4 -निर्वाण (for -निर्माण-) — ^{b}) G2 प्रमदाद् (for प्रमाणाद्) V1 त्वरितवि- (hypermetric) (for दुरति-) — T3 4 repeat 4^{cd} after 5^{ab} — ^{c}) T3 (second time) -मात्राव- (for -मूत्रोप-) D6 T1 2 G1–3 5 M -दिग्धाङ्गो (for -लिप्ता°)

5 ^{a}) V1 स्थूणमुखो, M1–3 स्थूलशिरा (for °मुखो) — After 5^{ab}, T3 4 repeat 4^{cd} — ^{c}) Ś1 Ds2 D6 G1 3 5 M2–4 विषाणवल्गि(Ś1 °लम्बि)तगति(M4 °तनु)र्; K3 °णावस्थितगतिर् — ^{d}) K4 लम्बिना (for लम्बता) T2 G2 5 M4 कर्ण- (for कण्ठ)

6 ^{a}) Ś1 K3 D1 2 4 6 G2 गवां यूथेषु चपलस्, K1 2 V B1. 2 Ds D3 गवारूढेषु च°, Ñ2 3 गवा कण्ठेषु च°, T1 2 G1 3–5 M4 गवामारोह(T2 G1 °हार)च°, T3 M1–3 गवामुद्वेगजननस्, T4 युद्धे जनकटाक्षेषु — ^{b}) G5 तट- (for तरु-) K4 तरुघाताञ्चितानन., T2 G1 तटभेदाङ्किता°, M4 तटापाताङ्किता° — ^{c}) D4 -सज्जो, T3 -स्थिर- (for -सज्ज-) — ^{d}) Ś1 K2 4 वृषो वृषभसूदन, K1 वृषो वृषभदानव.

7 ^{b}) Ñ2 अरिष्टो दानवाकृति — T3 transp 7^{d} and 8^{b} — ^{d}) K3 गोष्ठं वि-, V B2 D2 गोष्ठानि, D3 गोष्ठेऽस्मिन् (for गोष्ठान्वि) B1 गोष्ठेष्वटति दारुण.

8 ^{a}) B Ds D1 पातयन्स (for °यानो) T1 गर्भं (for गर्भान्) — T3 transp 7^{d} and 8^{b} — ^{b}) K4 D1 धृष्टो; D4 5 T1 हृष्टो (for दृप्तो) K2 ऽगच्छद् (for गच्छति). Ś1 K3 Ds D4 6 T2 G2–4 M1. 3 4 [अ]नार्तवत् (for °र्तवम्). T3 दृप्तोऽगच्छत्तदा व्रजम् — ^{c}) Ś1 K1 3 4 Ñ2 5 V1 3 Dn D1–4 T2–4 G1 3–5 भञ्जमानश्, D5 6 T1 जृम्भमाणश् (for भजमानश्) D3 तु (for च) — ^{d}) Ñ1 गृष्टय, D5 पृष्ठ्यां सं-, D6 T1 2 G1 2 5 गृष्टीश्च (for गृष्टीः सं) G3 M1–3 गृष्टीश्च प्रचचाल ह

9 ^{a}) V3 सिंह- (for शृङ्ग) — ^{b}) M1–3 प्रहारी (for प्रहरन्) B3 Ds D2 6 दुर्दम. (for दुर्मद) — ^{c}) T2 G3 4 गोष्ठे न च (for गोष्ठेषु न) — ^{d}) Ś1 युद्धात्स, K2 4 Ñ2. 3 V B Ds D1–4 T3 4 युद्धेन (for युद्धं स) Dn D5 विना युद्धेन गोवृषं (D5 भारत) — After 9, K1 2 D2–4 ins

737* कस्यचित्त्वथ कालस्य स वृष केशवाग्रत ।
आजगाम बलोद्रग्रो वैवस्वतवशे स्थित: ॥

K1 D2–4 cont K3 4 Ñ V B Dn Ds D1 5 6 T G M4 ins after 9

738* स तत्र गास्तु प्रसभं बाधमानो मदोत्कट ।

[D3 सतत (for स तत्र) B2 3 सतत, T1 वृषभो, G2 प्रहसन् (for प्रसभ) T2 सबवान (for बाधमानो)]

— After the above, K1 3 4 Ñ V B Dn Ds D1–5 T3 4 M4 read 11^{cd}, while D6 T1 G2 3 5 read the same, repeating it in its proper place

10 [illegible]2 om 10–11 T2 G1 4 om (hapl) 10^{a}–11^{b} — ^{b}) V2 3 Ds D4 गा वै, D6 G2 3 5 M4 गाश्च (for गाव) — ^{d}) K4 Ñ2 3 V B D (except D6) T3 4 वशे (for -पथे)

11 K2 om 11, T2 G1 4 om 11^{ab} (for all, cf v. l 10) — ^{b}) T4 वर्धमानो (for नर्द°) K3 4 Dn D1 महासुर (for °वृष) — Ś1 om 11^{cd} K1 3 4 Ñ V B Dn Ds D1–5 T3 4 M4 read 11^{cd} after 738*, while D6 T1 G2 3 5 read the same for the first time after 738* — ^{c}) D1 निर्गव, D6 T1 G2 5 (all second time) M1–3 गोवृषो, G3 (first time) नि सृतिं, G3 (second time) गोव्रजे (for निर्वृष) D2 घोषं (for गोष्ठं) — ^{d}) G2 (first time) निर्वंशं (for निर्वंत्स-). — V2 B1 D4 T2 G1 M

चकार निर्वृषं गोष्ठं निर्वत्सशिशुपुंगवम् ॥ ११
तालशब्देन तं कृष्णः सिंहनादैश्च मोहयन् ।
अभ्यधावत गोविन्दो दैत्यं वृषभरूपिणम् ॥ १२
स कृष्णं गोवृषो दृष्ट्वा हृष्टलाङ्गूललोचनः ।
रुषितस्तलशब्देन युद्धाकाङ्क्षी ननर्द ह ॥ १३
तमापतन्तमुद्वृत्तं दृष्ट्वा वृषभदानवम् ।
तस्मात्स्थानान्न व्यचलत्कृष्णो गिरिरिवाचलः ॥ १४
स वृषः कक्षयोर्दृष्टिं प्रणिधाय धृताननः ।
कृष्णस्य निधनाकाङ्क्षी तूर्णमभ्युत्पपात ह ॥ १५
तमापतन्तं प्रमुखे प्रतिजग्राह दुर्धरम् ।
कृष्णः कृष्णाञ्जननिभं वृषं प्रतिवृषोपमः ॥ १६
स संसक्तस्तु कृष्णेन वृषेणेव महावृषः ।
मुमोच वक्त्रजं फेनं नस्ततोऽथ स शब्दवत् ॥ १७
तावन्योन्यावरुद्धाङ्गौ युद्धे कृष्णवृषावुभौ ।
रेजतुर्मेघसमये संसक्ताविव तोयदौ ॥ १८
तस्य दर्पबलं हत्वा कृत्वा शृङ्गान्तरे पदम् ।
अपीडयदरिष्टस्य कण्ठं क्लिन्नमिवाम्बरम् ॥ १९
शृङ्गं चास्य पुनः सव्यमुत्पाट्य यमदण्डवत् । C 4119 B 2.21.21 P 2.21.21

---

ins after 11 D6 T1 G2 3 5 after the second occurrence of 11^{cd}

739* तमारादभिधावन्तं नर्दमान महावृषम् ।
[M4 अथ (for अभि-). V2 B1 D4 स(B1 त)मानान्न महाकाय (for ^{a})]

12 G4 om 12^{ab} —^{a}) K2-4 Dn D1 3 4 6 T1 G2 5 M तल- (for ताल-). —^{b}) V2 D5 -नादेन (for -नादैश्च). S1 K3 Dn D4 सिंहनादेन रोषयन् —Ś1 om 12^{cd} — After 12, M3 reads 14^{cd}

13 ^{a}) Dn1 T2 गोवृष (for °षो) K2 स कृष्णो गोवृष दृष्ट्वा —^{c}) S1 K2, 3 D1, 3 T4 G2 रोषितस् (for रु°) K1 4 Ñ V B Dn Ds D2 4 G3 रोषितस्तालशब्देन —^{d}) Dn1 D6 T1 2 G1-3 M युद्धकाङ्क्षी (for युद्धा°)

14 B1 reads 14–15 after 63 24 —^{a}) K Ñ2 3 V2 3 B2 3 Dn Ds D1-4 T G3 दुर्वृत्त, Ñ3 (marg) V1 नर्दन्तं, D5 निर्वृत्तं (for उद्वृत्त) —^{b}) K Ñ V B Dn Ds D1 3-5 T1 3 4 रूपिणम् (for -दानवम्) D2 दृष्ट्वा च वृषरूपिणम् — M3 reads 14^{cd} after 12 —^{c}) Ñ1 [अ]विचलन्, M3 चलित. (for व्यचलत्) D5 T1 G2, 5 M4 तस्मान्नाप्य(D5 °न्न व्य)चलत्कृष्णो —^{d}) T1 G2 5 वीरो, M4 धीरो (for कृष्णो) K2 4 V1 D2 [अ]पर' (for [अ]चल) D5 स्थितो गिरिरिवापर.

15 For the sequence in D1, cf v 1 14 —^{a}) Ś1 कुक्षिगां (for कक्षयोर्) K Ñ V B2 3 D (except D6) T3 4 स कुक्षौ (D2 सनद्धो, D2 [marg] सक्रुद्धो) वृषभो दृष्टि, G2 स वृषश्चपलाक्रान्तं —^{b}) D3 6 [उ]द्धृतानन , Ca धुता° (for धृता°) ❀ Ca धुतानन कम्पितमुख । ❀

16 ^{a}) N (except D6) T4 वेगेन (for प्रमुखे). —^{b}) K4 दुर्मदम्, D2 (marg as in text) दुर्दमम्, D6 T1 2 G1-3 5 M4 पाणिना (for दुर्धरम्) —^{c}) K3 Ds1 (by corr) D1 5 T3 M1-3 -निभो (for निभं) D5 T1 2 G M4 कृष्ण कृष्णाम्बुदाकारं (G3 °रो) —^{d}) D5 वृष प्रतिवृषं यथा

17 ^{a}) K3 प्रसंसक्तम्, Ñ1 G3 स संहृष्टम्, Ñ3 (marg) V1 सुसंहृष्टम्, D5 स संयुक्तम्, D5 a1 G 5 स संसृ(T1 °वृ-, G5 °सृ)ष्टस्, M4 संसृष्ट स (for स संसक्तस्) K4 D5 कृष्णो वै (for कृष्णेन) T1 2 G1 संस्पृष्टस्तु स कृष्णेन, T3 स सयुक्तस्तु वेगेन, G4 स संस्पृष्टस्तु कृष्णो व —^{b}) D2 च (for [इ]व) —^{c}) T2 G1 मुमोच गर्जस्रम्भेण, M1-3 °च वक्त्रात्फेन स —^{d}) K3 नि स्वन स (corrupt), Dn D5 नस्तश्चाथ ; D5 नस्त' सोऽथ, T3 4 घनस्तोयं (for नस्ततोऽथ) S1 शुंशुंकारकृतानन , K1 2 4 D2 स सूत्कार(D2 ससक्तार्थ)कृताानन ; D1 नर्दयन्धनशब्दवत् ; D6 T1 2 G M सशब्दो रक्त(G2 दीर्घ)लोचन .

18 ^{a}) K2 [अ]न्योन्य च (for °न्याव-) T3 4 -रुद्धासौ, M4 -धृताङ्गौ (for -रुद्धाङ्गौ) S1 उभौ तावत्तनद्धाङ्गौ —^{b}) D3 -महावृषौ (for वृषावुभौ) —^{c}) S1 वन- (for मेघ-) —^{d}) Ñ2 (marg) V1 सहसाव् (for ससक्ताव्).

19 Ñ2 om 19^{ab} —^{a}) K4 D3 4 6 T1 2 G1 2 5 M4 दर्पं (for दर्प) K2 हित्वा, V2 D6 T1 2 G1, 3 5 M दृष्ट्वा (for हत्वा) —^{b}) K3 शृङ्गोत्तरे, D3 शृङ्गवरे (for शृङ्गान्तरे) — Ñ2 om 19^{cd} —^{c}) B D5 सोऽपीडयद्, D2, 4 5 T2 3 G1 3-5 आपी° (for अपी°) —^{d}) Ñ1 वक्त्र (for कण्ठं) S1 कण्ठसूत्रं पुन. पुन.

20 ^{a}) S1 सत्यग्, Ñ1 श्रीमान्, D2 सद्य (for सव्यम्). —^{b}) T1 G M [आ]यस- (for यम-). D6 उत्पाट्य स दण्डवत — S1 om 20^{cd}. —^{c}) K3 वक्त्रं (for वक्त्रे). K4 तेनैवास्याहनद्वक्त्रं —^{d}) K1 D3 T1 G2-5 भृशाहतः ; K2 4 Ñ V B D5 D1-4 T3 वृषो हतः ; Dn वृषो वर (for भृशं हत)

तेनैव प्राहरद्वक्त्रे स ममार भृशं हतः ॥ २०
विभिन्नशृङ्गो भग्नास्यो भग्नस्कन्धश्च दानवः ।
पपात रुधिरोद्गारी साम्बुधार इवाम्बुदः ॥ २१
गोविन्देन हतं दृष्ट्वा दृप्तं वृषभदानवम् ।
साधु साध्विति भूतानि तत्कर्मास्याभितुष्टुवुः ॥ २२
स चोपेन्द्रो वृषं हत्वा कान्तवक्त्रो निशामुखे ।
अरविन्दाभनयनः पुनरेव रराज ह ॥ २३
तेऽपि गोवृत्तयः सर्वे कृष्णं कमललोचनम् ।
उपासांचक्रिरे हृष्टाः स्वर्गे शक्रमिवामराः ॥ २४

इति श्रीहरिवंशे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

वैशंपायन उवाच ।
कृष्णं व्रजगतं श्रुत्वा वर्धमानमिवानलम् ।
उद्वेगमगमत्कंसः शङ्कमानस्ततो भयम् ॥ १
पूतनायां हतायां च कालिये च पराजिते ।
धेनुके प्रलयं नीते प्रलम्बे च निपातिते ॥ २
धृते गोवर्धने चैव विफले शक्रशासने ।
गोषु त्रातासु च तथा स्पृहणीयेन कर्मणा ॥ ३
ककुद्मिनि हतेऽरिष्टे गोपेषु मुदितेषु च ।
दृश्यमाने विनाशे च संनिकृष्टे महाभये ॥ ४
कर्षणेन च वृक्षाभ्यां बालेनाबालकर्मणा ।

---

21 [a]) Ś$_{1}$ G$_{5}$ विभग्न-, K$_{1\,3\,4}$ Ñ$_{1\,3}$ V$_{1\,2}$ B$_{1\,2}$ Dn Ds D$_{1\,3\,4}$ T$_{2\,4}$ स भिन्न-, Ñ$_{2}$ V$_{3}$ स च्छिन्न-; B$_{3}$ D$_{2\,5}$ स भग्न- (for विभिन्न-) K$_{2}$ स भिन्नशृङ्गो भिन्नास्यो —[b]) Ś$_{1}$ दारुण॰ (for दानव॰) —[c]) D$_{1}$ पपात रुधिरोद्गारं

22 [b]) D$_{4-6}$ T$_{2}$ G$_{1-3\,5}$ M$_{4}$ दुष्ट (for दृप्त) B$_{2}$ गोवृष- (for वृषभ-) K$_{4}$ [अ]रिष्ट वृषरूपिणम् —[d]) D$_{3}$ तत्कृतानि (for तत्कर्मास्य) D$_{6}$ T$_{2}$ G$_{1\,3-5}$ M$_{1-3}$ [अ]तीव, T$_{1}$ [अ]स्याति- (for [अ]स्याभि) S$_{1}$ तुष्टुवुश्च जगत्पतिम्, V$_{2}$ तस्य कर्माणि तुष्टुवु, G$_{2}$ M$_{4}$ कर्म त(M$_{4}$ ॰मैत)च्चातितु॰

23 [a]) B$_{3}$ गोपेन्द्रो (for चो॰) G$_{4}$ हतं दृष्ट्वा (for वृषं हत्वा) —[b]) K$_{1\,3,\,4}$ Ñ$_{2\,3}$ V B Dn Ds D$_{2-5}$ T$_{2\,4}$ -चन्द्रे (for -वक्त्रो) —[d]) K Ñ$_{2\,3}$ V$_{1}$ B Dn D$_{1-4}$ रराम, Ñ$_{1}$ V$_{3}$ Ds D$_{5}$ ररास, T$_{3\,4}$ चचार (for रराज) V$_{2}$ व्रजमेव जगाम ह

24 [a]) K$_{1\,2}$ Ñ$_{2\,3}$ V B$_{1\,3}$ Ds D$_{2-5}$ T$_{1\,2}$ G M तु (for ऽपि) Ś$_{1}$ ते गोपा निवृत्ताः सर्वे, D$_{6}$ ते तु गोवृषभाः सर्वे, T$_{3\,4}$ हते तु वृषभे सर्वे —[c]) D$_{6}$ कृष्णं (for हृष्टा) —[d]) K$_{3}$ B$_{3}$ Dn$_{1}$ D$_{1\,6}$ सर्वे (for स्वर्गे) Ñ$_{1}$ शक्र देवगणा इव

Colophon — *Mention of the Epic* K$_{3}$ Ñ$_{2}$ Ds$_{2}$ T$_{3}$ — *Mention of Khila* S$_{1}$ K$_{3}$ Ñ V B Ds$_{1}$ D$_{1\,3}$ — *Sub-parvan* T$_{4}$ आश्चर्यपर्व — *Adhy name* T$_{2}$ M अरिष्टवधः — *Adhy no* (figures, words or both). K$_{3}$ D$_{1}$ M$_{1-3}$ 74, Ñ$_{3}$ V$_{1}$ G$_{1}$ 77, V$_{2}$ B$_{2}$ T$_{1}$ G$_{3\,5}$ M$_{4}$ 78, V$_{3}$ Dn D$_{32}$ T$_{2}$ 76, D$_{3}$ 82, D$_{4}$ G$_{2\,4}$ 75, T$_{3}$ 84, T$_{4}$ 71 — *Śloka no* Dn Ds$_{2}$ G$_{1}$ 24, D$_{3}$ 25, D$_{4}$ 26, T$_{2}$ 23

65

1 [a]) K$_{2}$ T$_{3\,4}$ दृष्ट्वा (for श्रुत्वा). —[b]) Ś$_{1}$ D$_{1}$ यथा (for इव) K$_{2}$ [अ]रुणम्, D$_{3}$ T$_{4}$ [अ]चलम् (for [अ]न॰) —[d]) Ś$_{1}$ कृष्णात्कमललोचनात्

2 [a]) Ś$_{1}$ D$_{6}$ T$_{2}$ G$_{2-5}$ M$_{4}$ तु (for च) T$_{3}$ हतायां पूतनाया च —[b]) V$_{3}$ ऽपि (for च) —[c]) D$_{3}$ निधनं (for प्रलयं) —[d]) V$_{2}$ वि- (for च) M$_{4}$ पराजिते (for निपातिते)

3 [a]) K$_{1\,2}$ चापि, K$_{3\,4}$ Ñ$_{2\,3}$ V B D (except D$_{6}$) T$_{3\,4}$ G$_{4}$ शैले (for चैव) —[b]) D$_{4\,5}$ T$_{1}$ M$_{1-3}$ निष्फले (for विफले) —[c]) M$_{4}$ तृप्तासु (for त्रातासु)

4 [b]) D$_{6}$ T$_{2}$ G$_{1\,2\,4\,5}$ M$_{4}$ [अ]तिगुणेषु, G$_{3}$ [अ]धिगुणेषु; M$_{1-3}$ द्विगुणेषु (for मुदितेषु)

5 [a]) K Ñ$_{2}$ V$_{2\,3}$ Dn D$_{1-3\,5}$ T$_{3\,4}$ कर्षणे वृक्ष(D$_{3}$ दृक्ष)योश्चैव, Ñ$_{1}$ ॰णेनापि वृक्षस्य; Ñ$_{3}$ (marg as in text) V$_{1}$ B D$_{3}$ वृक्षयो कर्षणेनापि, D$_{4}$ यमलार्जुनयोश्चैव, D$_{6}$ कर्षणे-

अचिन्त्यं कर्म तच्छ्रुत्वा वर्धमानेषु शत्रुषु ॥ ५
प्रासारिष्टमिवात्मानं मेने स मथुरेश्वरः ।
विसंज्ञेन्द्रियभूतात्मा गतासुप्रतिमोऽभवत् ॥ ६
ततो ज्ञातीन्समानाय्य पितरं चोग्रशासनः ।
निशि स्तिमितमूकायां मथुरायां जनाधिपः ॥ ७
वसुदेवं च देवाभं कङ्कं चाहूय यादवम् ।
सत्यकं दारुकं चैव कङ्कावरजमेव च ॥ ८
भोजं वैतरणं चैव विकद्रुं च महाबलम् ।
भयेसखं च राजानं विपृथुं च पृथुश्रियम् ॥ ९
बभ्रुं दानपतिं चैव कृतवर्माणमेव च ।
भूरितेजसमक्षोभ्यं भूरिश्रवसमेव च ॥ १०
एतान्स यादवान्सर्वानाभाष्य शृणुतेति च ।
उग्रसेनसुतो राजा प्रोवाच मथुरेश्वरः ॥ ११
भवन्तः सर्वकार्यज्ञाः सर्वशास्त्रविशारदाः ।
न्यायवृत्तान्तकुशलास्त्रिवर्गस्य प्रवर्तकाः ॥ १२
कर्तव्यानां च कर्तारो लोकस्य विबुधोपमाः ।
पर्वता इव निष्कम्पा वृत्ते महति तस्थुषः ॥ १३
अदम्भवृत्तयः सर्वे गुरुकर्मसु चोद्यताः ।
राजमन्त्रधराः सर्वे सर्वे धनुषि पारगाः ॥ १४
यशःप्रदीपा लोकानां वेदार्थानां विचक्षवः । C 4138 B 2 22 15 P 2 22. 15

ऽर्जुनवृक्षाभ्यां, G2 सकर्षणेन वृ° — b) Ñ1 कृष्णेनाकृष्टकर्मणा, Ñ2 3 V2 3 B Ds D4 शकटस्य तथैव च — c) D3 स्मृत्वा (for श्रुत्वा) — d) D6 G2 वाध्यमानेषु शत्रुषु

6 a) K1 प्रासोऽरिष्टम्, D4 प्रास रिष्टम् (for प्रासारिष्टम्) — b) Ś1 मनसो भूतमीश्वर (sic), D5 मेने तमसुरेश्वर — c) K2 विकलेन्द्रियभूतात्मा, M1–3 सविज्ञे° — d) K Ñ V B Dn Ds2 D1–5 T3 4 बभौ (for ऽभवत्) Ds1 पावकप्रतिमो बभौ

7 a) Dn1 ज्ञाती (for ज्ञातीन्) K4 समासाद्य, D6 T1 °नीय, T2 G1 °हूय (for °नाय्य) — b) K2 4 D1 T2–4 G1 -शासनम् (for °न) — c) Ñ2 निशा- (for निशि) K2 स्वनित- (for स्तिमित-) K4 -भूताया (for -मूकाया) G4 स निस्तिमितमूकात्मा

8 b) K1 2 4 Ñ1 3 V2 3 B Dn D1–5 T4 कङ्कं, Ñ2 V1 T3 कसद्य (for कङ्क) M1–3 दानव. (for यादवम्) K3 D6 T1 2 G M4 कङ्क चा(T1 कङ्कं त्वा-, G1 3 कंसश्चा-, G5 कम्बं चा)हूय दानव (K3 G2 M4 °वम्), D3 कङ्क चाहूय यादवान् — c) D3 सात्यकि (for सत्यक) K1 2 बाहुक, K3 दर्पक, D4 चाहुकं (for दारुकं) Ś1 सात्यकिं मधुकं चैव, G2 सत्य चाणूरक चैव — d) D1 5 T2 G1 3 कसावरजम्, G2 जिह्वा°, M4 कम्पा°, some Mss कङ्का° (for कङ्का°)

9 T4 repeats 9^{ab} after 11^{ab} — a) Ś1 चैव रणं, T2 G1 4 वैतरणीं, G3 °णिं (for °णं) G3 [अ]पि (for [ए]व) — b) K4 विकुण्डु, T4 (second time) त्रिकथ, G5 M4 विद्रुक (for विकद्रु) — c) K3 D4 भागशङ्कं, K4 भयसेन, Ñ3 V1 3 जयद्रथं, B1 भयशङ्कं, D1 भयेशङ्क; D6 हयेसखं, T2 G1 भयेलख, T3 4 जयसख्य; M1 भयेसुख (for °सख). D2 धर्मज्ञं (for राजानं) Ś1 भयं मगध धर्मज्ञ; K1 2 D5 भये(K2 °य)शङ्कं च धर्मज्ञं, D3 भयं शङ्ख च कर्मज्ञं, G2 हरे सख च धर्मज्ञं — d) M3 त्रिप्रिय (for विपृथुं) D5 पृथुप्रियम्, M4 पृथुं तथा (for पृथुश्रियम्)

10 a) K4 यदुपतिं (for दान°) — b) Ñ2 V1 3 T4 -कर्माणम् (for -व°) — G4 om (hapl) 10^{cd} — c) G3 5 -श्रवसम् (for तेज°) — d) K1 2 हरि- (for भूरि) B1 G2 3 -तेजसम् (for -श्रव°)

11 a) Ñ2 V3 वै (for स) M4 एतान्सर्वान्समाहूय — b) G2 आहूय (for आभाष्य) — After 11^{ab}, T4 repeats 9^{ab}

12 a) Ś1 -कार्येषु, B3 -शास्त्रज्ञा (for -कार्यज्ञा) — b) K3 4 Ñ V1 3 Dn D1–5 T3 4 वेदेषु परिनिष्ठिता, V2 B Ds सर्ववेदेषु निष्ठिता — c) D5 -वृत्ताश्च (for °न्त-) — d) D1 त्रिवर्गसं-, M2 3 °र्गाणां (for °र्गस्य)

13 b) D5 लोके च (for लोकस्य) K1 [इ]ति, K3 [अ]पि (for वि) D2 (marg as in text) लोकस्य च विधिक्षमा — d) Ś1 वृत्ते च महति स्थिता — For 13^{cd}, K Ñ2 3 V1 3 B D (except D6) T3 4 subst.

740* तस्थिवासो महावृत्ते निष्कम्पा इव पर्वता ।

14 a) G1 आरम्भ-; M1–3 अदम्भ- (for अदम्भ-). — b) G1 चारिता, G3 5 चोदिता (for चोद्यता) N (except Ś1 D6) T2–4 सर्वे गुरुकुलोषिता (K1 °लोद्वहा; Ñ2 °लायिता.) — c) D6 G M साम- (for राज) Ś1 -धर्मपरा; D1 2 M2 -मन्त्रप(D1 °क)रा (for °धरा)

15 T3 om 15–16 — a) T4 शास्त्र- (for यश°-) Ñ3 D3 -प्रदीप्ता (for °पा) — b) B3 वेदार्थाश्च (for °र्थानां) Ñ3 (marg.) V1 2 D6 G1 2 4 5 M विचक्षणा°, T2 विशारदाः (for विचक्षव.) G3 सर्वार्थानां विचक्षणा. — c) T4 निसर्गस्था; M3 विसर्गज्ञा (for नि°).

आश्रमाणां निसर्गज्ञा वर्णानां क्रमपारगाः ॥ १५
प्रवक्तारः सुनियता नेतारो नयदर्शिनः ।
भेत्तारः परराष्ट्राणां त्रातारः शरणार्थिनाम् ॥ १६
एवमक्षतचारित्रैः श्रीमद्भिरुदितोदितैः ।
द्यौरप्यनुगृहीता स्याद्भवद्भिः किं पुनर्मही ॥ १७
ऋषीणामिव वो वृत्तं प्रभावो मरुतामिव ।
रुद्राणामिव वः क्रोधो दीप्तिरङ्गिरसामिव ॥ १८
व्यावर्तमानं सुमहद्भवद्भिः ख्यातकीर्तिभिः ।
धृतं यदुकुलं वीरैर्भूतलं पर्वतैरिव ॥ १९
एवं भवत्सु युक्तेषु मम चित्तानुवर्तिषु ।
वर्धमानो ममानर्थो भवद्भिः किमुपेक्षितः ॥ २०
एष कृष्ण इति ख्यातो नन्दगोपसुतो व्रजे ।
वर्धमान इवाम्भोदो मूलं नः परिकृन्तति ॥ २१
अनमात्यस्य शून्यस्य चारान्धस्य ममैव तु ।
कारणान्नन्दगोपस्य स सुतो गोपितो गृहे ॥ २२
उपेक्षित इव व्याधिः पूर्यमाण इवाम्बुदः ।
नदन्मेघ इवोष्णान्ते स दुरात्मा विवर्धते ॥ २३
तस्य नाहं गतिं जाने न योगं न परायणम् ।
नन्दगोपस्य भवने जातस्याद्भुतकर्मणः ॥ २४
किं तद्भूतं समुत्पन्नं देवापत्यं न विद्महे ।
अतिदेवैरमानुष्यैः कर्मभिः सोऽनुमीयते ॥ २५
पूतना शकुनी बाल्ये शिशुना स्तनपायिना ।

---

16 T3 om 16 (cf v l 15) M1 2 om 16^{ab} —^{a}) D8 प्रवेत्तार· (for प्रवक्तार) K1 सुनिपुणा, Ñ B1 Dn D5 T1 G3 सुनियतां, B3 °यमान्, T3 4 सुनीतानां (for सुनियता) —^{b}) K3 T4 -दर्शना, B1 3 Dn Ds D3 5 6 T1 G -दर्शिनाम्, M4 दर्शने (for -दर्शिन) —^{c}) D6 G1 2 5 भोक्तार (for भेत्तार) —^{d}) K2 शतानां (for त्रातार) D6 S (except T3 4, T2 om) त्रातार. शरणैषिणाम्

17 ^{a}) T3 4 अन्यत्र, G1 अक्षय- (for °त-) T2 यश-प्रदीपचारित्रै —^{b}) Ś1 भवद्भिरुचितोदितै, K4 D6 T1 2 G1–3 M4 श्रीमद्भिरुदितैर्गुणै (K4 °स्तथा), D3 °द्भिर्यदुनन्दनै, T3 4 °द्भिरुदितोपमै

18 M3 om 18^{b}–19^{a} T3 4 om (hapl) 18^{cd} D5 reads 18^{c}–19^{d} on marg —^{c}) S1 K1 2 D1 6 T2 च, K4 सं· (for व.) G2 M4 कोपो (for क्रोधो) —^{d}) D3 4 दृष्टिर् (for दीप्तिर्) K2 आङ्गिरसाम्

19 M3 om 19^{a} (cf v l 18) —^{a}) Ś1 B1 तु (for सु-) K1 2 4 Ds D1 4 5 व्यावृत्त(K4 D5 प्रवर्त)मानं सुम(K1 2 तु म)हद्, D6 T1 2 G M1 2 4 व्यावर्तमानै-रनिशं —^{b}) B2 3 Ds पुण्य (for ख्यात-). Ñ1 भवद्भिः पुण्यकीर्तितै, D2 भवद्भिर्यदुनन्दनै. —^{c}) M4 श्रुतं (for धृतं)

20 Ś1 om 20^{ab} —^{a}) V3 D5 युद्धेषु (for युक्तेषु) —^{b}) Ñ1 D6 G2 M1–3 वृत्तानु (for चित्तानु-) D3 -वृत्तिषु (for -वर्तिषु) —^{c}) M3 वर्तमानो (for वर्ध°) K4 मम द्वेषी, Ñ1 Ds D1 6 T2 4 G1 2 5 M4 महानर्थो (for ममा°) T1 वर्तमानो महानर्थो — D3 om (hapl) 20^{d}–21^{c} —^{d}) M1–3 युष्माभि (for भवद्भि) Ś1 K1 उपेक्ष्यते, K2 अपेक्षते, G2 उपेक्षितम् (for °त)

21 D3 om 21^{abc} (cf v l 20). —^{c}) T1 Bom Poona eds G(ed) [अ]म्भोधिर् (for °दो) —^{d}) Ñ2 नूनं (for मूल).

22 ^{a}) K1 (*sup lin*) Ds2 D4 (*sup lin* as in text) शूरस्य, D6 T2 G1 3–5 M4 मूर्खस्य, T3 4 मूढस्य (for शून्यस्य) G2 अन्यमान्यस्य मूर्खस्य, M1–3 अनपत्यस्य शूरस्य —^{b}) D3 कार्यान्धस्य (for चारा°) —^{d}) T3 4 वर्धते (for गोपितो) Ñ3 व्रजे, G3 ऽभवत् (for गृहे) M1–3 सुतो गुरुरुपेक्षित

23 ^{a}) K4 इति (for इव) —^{b}) Ñ2 B2 Ds1 T1–3 G1 3–5 [अ]म्बुधि, V2 [उ]दधि, Ds2 D3 M4 [अ]म्बुभि· (for °द·) —^{d}) T1 G1 सु- (for स) Ś1 M4 विवर्धित. (for °र्धते)

24 G3 5 transp 24^{ab} and 24^{cd} —^{a}) K4 न चैव (for तस्य न) T3 बलं (for गतिं) —^{b}) M1–3 [अ]गतिं (for योगं) N (except Ś1 Ñ1 D6) T3 4 पराक्रमम्, G4 च कारणम् (for परायणम्) — T2 G1 4 om 24^{cd} —^{c}) D2 सदने (for भवने)

25 ^{a}) K4 तद्रूपं, B1 त्वद्वृत्तं, B2 M4 त्वद्भुतं, M1–3 तु भूतं (for तद्भूतं) N (except Ś1 D6) समु(K3 मह)द्भूतं (for समुत्पन्नं) —^{b}) D3 देवो दैत्यो, D6 M1 3 देवक्या तन (for देवापत्यं) T2 G3 देवक्यानकदुन्दुभे, G1 4 5 M4 देवक्या नानुविद्महे —^{c}) Ś1 न मनुष्ये, K2 अमानुषै (for °ष्यै) D6 अतिदैव न मानुष्यै —^{d}) D3 -मन्यते (for -मीयते) — After 25, G1 ins 741*

26 G1 om, 26, —^{a}) D1 3, 6 M1–3 शकुनिर् (for

स्तनपानेप्सुना पीता प्राणैः सह दुरामदा ॥ २६
यमुनायां ह्रदे नागः कालियो दमितस्तथा ।
रसातलचरो नीतः क्षणेनादर्शनं ह्रदात् ।
नन्दगोपसुतो योगं कृत्वा च पुनरुत्थितः ॥ २७
धेनुकस्तालशिखरात्पातितो जीवितं विना ॥ २८
प्रलम्बं यं मृधे देवा न शेकुरभिवीक्षितुम् ।
बालेन मुष्टिनैकेन स हतः प्राकृतो यथा ॥ २९
वासवस्योत्सवं भङ्क्त्वा वर्षं वासवरोषजम् ।
निर्जलं गोकुलं कृत्वा धृतो गोवर्धनो गिरिः ॥ ३०
हतस्त्वरिष्टो बलवान्विशृङ्गश्च कृतो व्रजे ।
अबालो बाल्यमास्थाय रमते बाललीलया ॥ ३१
प्रबन्धः कर्मणामेष तस्य गोव्रजवासिनः ।
संनिकृष्टं भयं चैव केशिनो मम च ध्रुवम् ॥ ३२
भूतपूर्वश्च मे मृत्युः स नूनं पूर्वदैहिकः ।
युद्धकाङ्क्षी हि स यथा तिष्ठतीव ममाग्रतः ॥ ३३
क्व च गोपत्वमशुभं मानुष्यं मृत्युदुर्बलम् । C 4157 B 2 22 34 P 2 22 34

°नी) — ^{b}) M_2 स्तन्य- (for स्तन) D_6 -पायनी (for -पायिना) K $\tilde{N}_{2\ 3}$ V B Dn Ds D_{1-5} T_{2-4} G_4 शिशुनोत्तानशायिना — ^{c}) T_3 $G_{2\ 3}$ M_4 स्तन्य- (for स्तन-) K_2 ततस्तेन स्तनौ पीतौ — D_3 $T_{1\ 2}$ G_{2-5} $M_{2\ 4}$ G(ed) ins after 26 G_1 after 25

741* तथैव तेन बालेन पादाङ्गुष्ठेन लीलया ।
शयने वै शयानेन शकटं परिवर्तितम् ॥
तथा बालेन बलिना वने जातौ बृहत्तरौ ।
समूलविटपौ भग्नौ सहजौ यमलार्जुनौ ॥

[G_1 om lines 1–2 — (L 1) D_6 पादेन (for बालेन) — (L 2) M_4 शिशुत्वे तु (for शयने वै) — (L 4) D_6 T_1 M_4 सहसा , M_2 सहितौ (for सहजौ)]

27 ^{a}) $K_{1\ 2}$ $\tilde{N}_{2\ 3}$ V $B_{2\ 3}$ Dn Ds D_{2-6} T $G_{4\ 5}$ M यमुनाया (for °यां) — ^{b}) D_6 कालीयो T_3 तदा (for तथा) — ^{c}) $Ś_1$ M_2 -तलं , D_6 T_2 $G_{1\ 3\ 5}$ $M_{1\ 3\ 4}$ -गतो (for -चरो) M_1 नाग (for नीत) — ^{d}) $Ś_1$ D_6 $T_{1\ 2}$ G M_4 जले , K_2 तदा (for ह्रदात्) M_{1-3} क्षणेनादृश्यतां गतः — ^{f}) K_2 $\tilde{N}_2$ B_2 Dn_2 $D_{1\ 5}$ T_1 G_3 स , $K_{3\ 4}$ Dn_1 G_2 [आ]शु (for च)

28 ^{a}) D_2 धेनुक (for °कस्) — ^{b}) D_2 पातितं (for °तो) — After 28, D_6 S (except $T_{3\ 4}$) ins

742* तस्याग्रजो महावीर्यो बलभद्रो दुरात्मवान् ।

[T_2 अस्य (for तस्य)]

29 ^{a}) $Ś_1$ प्रलम्बो (for °म्बं) K_3 स , D_6 च (for यं) K_4 रणे (for मृधे) — ^{b}) M_{1-3} अपि (for अभि-) $\tilde{N}_3$ V_1 -वर्तितुम् (for -वीक्षि°) $Ś_1$ K $\tilde{N}_{1\ 2}$ $V_{2\ 3}$ Dn Ds D_{1-5} $T_{3\ 4}$ न शेकुरतिवर्तितुम् — ^{c}) V_3 Dn_2 D_2 G_2 बलेन ; M_{1-3} तेनैव (for बालेन)

30 ^{a}) T_4 सुखं (for [उ]त्सवं) K_2 B_3 D_3 T_3 भुक्त्वा ; D_6 G_5 भित्त्वा , T_2 G_{1-4} M_4 हत्वा (for भङ्क्त्वा) — ^{b}) D_3 जल (for वर्षं) T_1 -रोषितम् (for -रोषजम्) — $\tilde{N}_2$ om . 30^c–34^b — ^{c}) D_6 गोधन (for गोकुल) K $\tilde{N}_{1\ 3}$ V B Dn Ds D_{1-5} $T_{3\ 4}$ G_4 निर्जित्य गो गृ' D_3 °त्यामां गृ)हार्थाय — After 30, T_2 $G_{1\ 4}$ ins 743*

31 $\tilde{N}_2$ om 31 (cf v l 30) T_2 $G_{1\ 4}$ om 31^{ab}. — ^{b}) $K_{2\ 4}$ $\tilde{N}_3$ V_2 $B_{1\ 2}$ D_1 $T_{3\ 4}$ $G_{2\ 3}$ निःशृङ्गश् (for विशृ°) $\tilde{N}_1$ मृधे (for व्रजे) D_2 विगर्व(marg as in text)श्च ततो व्रजे , D_5 निशृङ्गश्च हतो व्रजे — D_3 T_1 $G_{2\ 3\ 5}$ M ins after 31^{ab} T_2 $G_{1\ 4}$ after 30

743* केन वा नररूपेण शक्यो गोवर्धनो गिरि ।
उद्धर्तुं गोव्रजे सत्य न जातेऽप्यद्भुतं नत ॥
इदमत्यद्भुतं सर्वं वर्षं वासवनिर्मितम् ।
निवारितं सप्तदिन किमतःपरमद्भुतम् ॥

[T_2 $G_{1\ 4}$ om (hapl) line 1 — (L 2) T_2 G_1 गोवृषो ; G_4 गोवृषे (for °व्रजे) T_1 G_3 M_{1-3} त्वद्भुतं ; T_2 G_1 ऽत्य° (for ऽद्°) — (L 3) D_6 G_4 अप्यद्भुत (for अत्य°) T_1 G_3 M_{1-3} सत्यं (for सर्वं)]

— ^{c}) D_6 स बालो , G_5 अबाल्यो (for °लो) — ^{d}) N (except $Ś_1$ D_3 , $\tilde{N}_2$ om) $T_{1\ 3\ 4}$ G_4 शिशु (for बाल-).

32 $\tilde{N}_2$ om 32 (cf v l 30) — ^{a}) $T_{3\ 4}$ प्रभावः ; (for प्रबन्ध) K $\tilde{N}_3$ $V_{1\ 3}$ $B_{2\ 3}$ Dn $D_{1\ 4\ 5}$ G_4 एवं (for एष) $Ś_1$ प्रवृद्धवर्मणामेव (sic); D_6 प्रवृद्धा कर्मणा तस्य ; T_1 प्रबद्धकर्मणामेषां (sic), G_3 प्रवृद्ध' कर्मणानेन — ^{b}) D_6 एते गो- ; M_2 तस्याहो (for तस्य गो-) — ^{c}) $Ś_1$ फलं (for भय) D_6 $T_{1\ 2}$ G M_4 [अ]पि (for [ए]व) — ^{d}) D_6 $T_{1\ 2}$ G M वा (for च)

33 $\tilde{N}_2$ om 33 (cf v l 30) — ^{a}) M_{1-3} हि (for च) $Ś_1$ नो (for मे) — ^{b}) D_5 G_3 सततं , $T_{3\ 4}$ समानं (for स नूनं) $\tilde{N}_3$ V B Dn Ds पौर्व- (for पूर्व-). G_2 स नूनं भूतदेहिक — ^{c}) $K_{1\ 2}$ युद्धाकाङ्क्षी (for युद्ध°). K_3 D_1 $G_{3\ 5}$ च स ; T_1 M_4 स्वयम् (for हि स). T_1 इह ; T_2 G_1 तथा , M_4 इव (for यथा). K_4 $\tilde{N}_3$ V B Dn Ds D_{2-5} $T_{3\ 4}$ G_4 M_{1-3} युद्धाकाङ्क्षी च स (V_2 B_2 Dn_1 D_3 T_3

क च देवप्रभावेन क्रीडितव्यं व्रजे मम ॥ ३४
अहो नीचेन वपुषा छादयित्वात्मनो वपुः ।
कोऽप्येष रमते देवः श्मशानस्थ इवानलः ॥ ३५
श्रूयते हि पुरा विष्णुः सुराणां कारणान्तरे ।
वामनेन तु रूपेण जहार पृथिवीमिमाम् ॥ ३६
कृत्वा केसरिणो रूपं विष्णुना प्रभविष्णुना ।
हतो हिरण्यकशिपुर्दानवानां पितामहः ॥ ३७
अचिन्त्यं रूपमास्थाय श्वेतशैलस्य मूर्धनि ।
भवेन च्याविता दैत्याः पुरा तत्रिपुरं घ्नता ॥ ३८
पालितो गुरुपुत्रेण भार्गवोऽङ्गिरसेन वै ।
प्रविश्य चासुरीं मायामनावृष्टिं चकार ह ॥ ३९
अनन्तः शाश्वतो देवः सहस्रवदनोऽव्ययः ।
वाराहं रूपमास्थाय उज्जहारार्णवान्महीम् ॥ ४०
अमृते निर्मिते पूर्वं विष्णुः स्त्रीरूपमास्थितः ।
सुराणामसुराणां च युद्धं चक्रे सुदारुणम् ॥ ४१
अमृतार्थे पुरा चापि देवदैत्यसमागमे ।

स च) यथा (Ds1 T3 तथा, D3 यदा), G2 युद्धकाले समुत्पन्ने — d) K3 4 Ñ3 V B D (except D6) M4 [इ]ह, Ñ1 T3 च (for [इ]व) K2 [अ]श्रुत: (for [अ]व्रत:)

34 B3 reads 34^{ab} twice — a) B3 (second time) देवत्वम् (for गोप°) D2 (marg as in text) क च गोप मनुष्याभं — D4 om 34^{bc} — b) Ś1 मानुष (for °ष्यं). D3 क च (for मृत्यु-). K2 3 T3 4 -दुर्लभम् (for -दुर्बलम्) B1 3 (both times) Ds D5 मानुष्यं प्राप्य दु(D5 °ष्यमति-दु)र्लभम्; D6 T1 2 G M °ष्यं सुखदुर्लभम् — c) K2 देवत्व- (for °प्र-) K4 -भावैश्च, D1 -भावोऽयं (for -भावेन). — d) D3 वने (for व्रजे) K3 भवेत्, G4 मया (for मम).

35 b) M1–3 छादयति (for °यित्वा) — M4 om 35^{cd}. — c) Ñ1 M1–3 को ह्येष, D1 गोष्ठेषु, T2 G1 4 5 गोपेषु (for कोऽप्येष) — After 35, D5 ins. :

744* अहो यादवश्रेष्ठा वै कथयन्तु समाहिता· ।

While D6 T1 2 G M1–3 ins after 35

745* इदमप्यपरं मन्ये श्रोतव्यं यदुपुंगवा ।
यथा मम तथा यूयं जानीथ सकलं वच: ॥

[(L 2) M1–3 त(M1 य)था यादि (for यथा मम)]

36 K2 om 36^{b}–37^{b}. — b) V1 सुराणां कार्यगौरवे, G3 °णां कार्यसिद्धये. — c) Ś1 K1 [इ]ह; D6 T2 G1–3 5 M [ए]व (for तु) — d) D5 च महीम् (for पृथिवीम्) — After 36, D6 T1 2 G1–3 5 M G (ed) ins .

746* देवराजाय तु तदा दत्तवान्किल केशव ।

37 K2 om 37^{ab} (cf v l 36) — G(ed) cont. after 746* D6 T1 2 G M ins after 37

747* हत्वा तु दानवं संख्ये राजानं कृतवान्हरिः ।

[D6 T1 M1–3 तं (for तु) D6 T1 G3 M1 2 हरिम् (for हरि)]

38 a) K1 Ñ2 3 V3 B2 Dn D2 5 6 T2–4 G1 2 M4 अचिन्त्य- ; K2 अन्यत्तद् (for अचिन्त्यं). — b) D6 T1 2 G M -पर्वत- (for -शैलस्य) — c) K1 Ñ1 B1 व्याधिता, K1 (sup lin) 2 Ñ2 V1 B2 D3–5 बाधिता, D4 T3 4 घातिता; D2 पोथिता (for च्याविता) K4 भवेन घातितो दैत्य· — d) K1 3 4 V2 B2 D1 4 तं, V1 च (for तत्) D6 T4 पुरा तु त्रिपुरं घ्नता (D6 °त), T1 2 G1 3–5 M4 पुरा त्रिपुरघातिना

39 a) K1 2 Ñ1 2 3 (marg as in text) V2 3 B Dn Ds D4 5 T3 4 चालितो, K4 घातितो, D1 3 वारितो (for पालितो) K3 चालितो गुरुरूपेण — b) G5 च (for वै) Ñ1 भार्गवोऽङ्गिरसैस्तथा — c) Ñ2 3 V B Dn Ds D2–5 T3 दार्दुरीं, D1 दौर्दुरीं, T4 दारुकी (for चासुरीं)

40 a) M4 जायते (for शाश्वतो) — b) K4 Ñ V B Dn Ds D4 T1 4 -शिरसो (for वदनो) — d) K Ñ2 3 V B D (except D6) T1 G3 4 M1–3 प्रोज्जहार (for उ°). — After 40, D6 S (except T3 4) ins

748* सभूधरवनामुर्वीं शक्राय प्रददौ हरिः ।

41 a) D6 T2 G1 3 5 मथिते (for निर्मिते) — b) T4 श्री- (for स्त्री-) T1 4 G2 M1–3 आश्रित: (for आस्थित). — After 41^{ab}, G2 ins 749* — G2 om 41^{c}–42^{d}. — c) T चासुराणां (for असु°) B2 असुराणां सुराणां च.

42 G2 om 42 (cf v l 41) — a) G4 अमृतार्थं (for °र्थे) D6 देवो (for चापि) — b) M4 देवैर्दैत्यै समागतैः. — c) T3 चापि, T4 om (for विष्णुर्). — d) G5 M4 कूर्मरूप (for अकूपार) D1 3 स्मृतम्, D1 (sup lin as in text) स्मृति· ; D5 T4 M1 2 श्रुत:, M3 श्रुतम् (for श्रुतिः)· — N (except Ś1) T G1 3–5 M4 ins. after 42 G2 after 41^{ab}

749* वपुर्वामनमास्थाय निन्दनीय पुरा वपु ।
त्रिभि क्रमैस्तु त्रीँल्लोकाञ्जहार त्रिदिवालयम् ॥

[(L 1) Ñ1 B3 Ds सैव, V2 सैव, D2 3 स च; D4 पुनर्; D6 T2 3 G1. 2 4 5 पुरा, T1 M4 रूप (for वपुर्) K2 4 B2 D1 4. 5 T1. 3 G2. 4 नन्दनीय (for नि°) D5. 6 T2 G1, 4 M4

दधार मन्दरं विष्णुरकूपार इति श्रुतिः ॥ ४२
चतुर्धा तेजसो भागं कृत्वा दाशरथे गृहे ।
स एव रामसंज्ञो वै रावणं व्यशसत्तदा ॥ ४३
एवमेष निकृत्या वै तत्तद्रूपमुपागतः ।
साधयत्यात्मनः कार्यं सुराणामर्थसिद्धये ॥ ४४
तदेष नूनं विष्णुर्वा शक्रो वा मरुतां वरः ।
मत्साधनेप्सया प्राप्तो नारदो मां यदुक्तवान् ॥ ४५
अत्र मे शङ्कते बुद्धिर्वसुदेवं प्रति प्रभो ।
अस्य बुद्धिविशेषेण वयं कातरतां गताः ॥ ४६
अहं हि खट्वाङ्गवने नारदेन समागतः ।
द्वितीयं स हि मां विप्रः पुनरेवाब्रवीद्वचः ॥ ४७
यत्त्वयानुष्ठितो यत्नः कंस गर्भकृते महान् ।
वसुदेवेन ते रात्रौ कर्म तद्विफलीकृतम् ॥ ४८
दारिका या त्वया रात्रौ शिलायां कंस पातिता ।
तां यशोदासुतां विद्धि कृष्णं च वसुदेवजम् ॥ ४९
रात्रौ व्यावर्तितावेतौ गर्भौ तव वधाय वै ।
वसुदेवेन संधाय मित्ररूपेण शत्रुणा ॥ ५०
सा तु कन्या यशोदाया विन्ध्ये पर्वतसत्तमे ।
हत्वा शुम्भनिशुम्भौ द्वौ दानवौ नगचारिणौ ॥ ५१
कृताभिषेका वरदा भूतसंघनिषेविता । C 4176 B 2 22. 5? P 2 22 53

पुनर् (for पुरा) K V2 3 B2 Dn Ds1 (*sup lin*) D1 बले , T3 4 च य , M4 पुन (for वपु) — T4 om line 2 — (L 2) Ñ3 D6 T2 G3–5 त्रिविक्रमैस् (for त्रिभि क्र°) V2 B1 D3 च त्रीँल्लोकान् , Ds चरँल्लोकान् , D4 च लोकाना (for तु त्रीँल्लोकान्)]

43 ^{a}) K2 D6 G2 चतुर्थं (for °र्धा) — ^{c}) V2 एष (for एव) G2 यो (for वै) — ^{d}) S1 जघ्निवास् , K4 V D6 T1 2 G M4 व्यनशत् , D1 4 व्यहनत् , D3 M1 2 व्यधमत् , M3 व्यमथत् (for व्यशसत्) T3 4 रावणं च व्यनाशयत् — After 43, D6 S (except T3 4) ins

750* स एव भगवान्विष्णुर्भूत्वा भार्गवनन्दन ।
परश्वधेन शातेन जघान कृतवीर्यजम् ॥
त्रि सप्तकृत्व. पृथिवीं हत्वा क्षत्रियपुंगवान् ।
हयमेधे तदा यज्ञे काश्यपाय ददौ किल ॥

[(L 1) T1 M1–3 -सभव (for नन्दन) — (L 2) D6 T2 परशुना निशातेन , G1 परशुना निहता तेन (hypermetric), M1–3 परशुना निशितेनाजौ (hypermetric) (for ^{a}) — (L 4) T1 M महा- , G1 तथा (for तदा) G3 महीम् (for किल)]

44 ^{a}) D6 T2 G M2 3 एव (for एष) K4 विकृत्या , D4 (*sup lin*) G5 M2 3 निकृत्वा (for °त्या) Ñ1 एष एव निकृत्वा वै — ^{b}) D1 चैतद् (for तत्तद्) Ś1 इहागत , D6 T2 G M4 समाश्रित: , T3 इवाश्रित (for उपागत) V3 तत्तद्रूपत्वमागत: — ^{c}) Ñ V3 B1 D5 T1 3 G3 M4 साधयित्वा , T2 G1 4 5 धारयति (for साध°) — ^{d}) K3 G3 कार्यं (for अर्थ-)

45 ^{a}) Ñ3 V1 T4 M4 एव (for एष) K3 वै (for वा) D3 तदयं मे वन विष्णु: — ^{b}) K4 D1 सक्रोधो (for शक्रो वा) N (except Ś1) S (except T1 M1–3) पति (for वर) — ^{c}) K1 जातो (for प्राप्तो) Ś1 K2 अह्मा वधे(K2 तत्साधने)प्सया जातो , V3 Ds D2 3 5 6 T1–3 G1 3–5 M4 मत्साध(G1 3 5 °द)नेच्छया प्राप्तो , G2 पूर्वमेव हि संप्राप्तो — ^{d}) Ś1 T2 G1 4 वा , K3 om (for मां) V3 B3 प्रयुक्तवान् , D6 T1 2 G1–4 M यथो° (for यदु°).

46 ^{a}) T3 4 सगता (for शङ्कते) — After 46^{a}, T4 ins 762* In T4, the portion from 65 46^{b} to 66 25^{d} is lost — ^{b}) Ś1 T2 G2–5 M4 प्रभुम् , K1–3 Ñ2 3 V1 2 B Ds D3–5 T3 ध्रुवम् , K4 V3 Dn D1 2 ध्रुवा (for प्रभो) — ^{c}) K4 D3 बुद्धेर् (for बुद्धि-) — ^{d}) D3 वयं सर्वे प्रतारिताः

47 T4 om 47 (cf v l 46) — ^{a}) Ś1 कण्टक- , D4 गन्धर्व- (for खट्वाङ्ग-) K4 अहं हि च पुरोद्याने — ^{b}) M4 समागमम् (for °गत) — ^{c}) Dn1 द्वितीये स , D4 5 स द्वितीयं (by transp), T1 G2 M4 हि द्वितीये T2 G2 M4 स , T3 G3–5 तु (for हि) Ś1 M1 2 मा (for मां)

48 T4 om 48 (cf v l 46) — ^{a}) K3 4 Ñ2 3 V B Dn Ds D1–5 T1 3 G4 M1 3 यस् (for यत्) V3 D5 हि कृतो (for [अ]नुष्ठितो) — ^{b}) Ñ2 3 V1 -क्षये , M4 -वधे (for -कृते) — ^{c}) D6 T2 G1 3 5 रात्रौ तु , G2 तं रात्रौ , M1–3 रात्रौ हि (for ते रात्रौ) — ^{d}) V1 om कर्म T2 G1 5 विफलं (for °ली-)

49 T4 om 49 (cf v l 46) — ^{a}) M4 च (for या) — ^{b}) D3 विनि- (for कंस). Ś1 K1 2 4 B2 घातिता (for पा°)

50 T4 om 50 (cf v l 46) — ^{b}) D2 M4 उभौ (for गर्भौ)

51 T4 om 51 (cf v l 46) — ^{a}) Ś1 V1 G2 यशोदाया (for °या) — ^{b}) K1 2 D6 विन्ध्य- (for विन्ध्ये) K4 विन्ध्ये च पर्वतोत्तमे , D3 विन्ध्यपर्वतसंनिधौ — ^{c}) K2 तौ , K4 D6 T2 G2–5 च , M1–3 तु (for द्वौ) — ^{d}) Ś1 वन-

अर्च्यते दस्युभिर्घोरैर्महापशुबलिप्रिया ॥ ५२
सुरापिशितपूर्णाभ्यां कुम्भाभ्यामुपशोभिता ।
मयूराङ्गदचित्रैश्च बर्हभारैश्च भूषिता ॥ ५३
हृसकुक्कुटसंनादं वनं वायसनादितम् ।
छागयूथैश्च संपूर्णमविरुद्धैश्च पक्षिभिः ॥ ५४
सिंहव्याघ्रवराहाणां नादेन प्रतिनादितम् ।
वृक्षगम्भीरनिबिडं कान्तारैः सर्वतो वृतम् ॥ ५५
दिव्यभृङ्गारचमरैरादर्शैश्च विभूषितम् ।
देवतूर्यनिनादैश्च शतशः प्रतिनादितम् ।
स्थानं तस्या नगे विन्ध्ये निर्मितं स्वेन तेजसा ॥ ५६

रिपूणां त्रासजननी नित्यं तत्र मनोरमे ।
वसते परमप्रीता दैवतैरपि पूजिता ॥ ५७
यस्त्वयं नन्दगोपस्य कृष्ण इत्युच्यते सुतः ।
अत्र मे नारदः प्राह सुमहत्कर्म कारणम् ॥ ५८
द्वितीयो वसुदेवाद्वै वासुदेवो भविष्यति ।
स हि ते सहजो मृत्युर्बान्धवश्च भविष्यति ॥ ५९
स एव वासुदेवो वै वसुदेवसुतो बली ।
बान्धवो धर्मतो मह्यं हृदयेनान्तको रिपुः ॥ ६०
यथा हि वायसो मूर्ध्नि पद्म्यां यस्यैव तिष्ठति ।
नेत्रे तुदति तस्यैव वक्त्रेणामिषगृद्धिना ॥ ६१

(for नग-)

52 T4 om 52 (cf v l 46) — ᵇ) M1–3 -यूथ (for -संघ-) — ᶜ) K3 D3 अर्थ्यते (for अर्च्यते) K4 यादवैर् (for दस्युभिर्). — ᵈ) Ś1 पशुयकृत्- , Ñ1 V3 D5 T3 बलिपशु- , T1 -पशुचय , T2 G -परशुधृत् (T2 G3 °कृ), M -पशुसुरा- (M4 °पते.) (for -पशुबलि-) D6 महापरशुधारिणी

53 T4 om 53 (cf v l 46) — ᵃ) D3 सुधा- (for सुरा-) T2 -विहित- ; G1 -पिहित- (for -पिशित) — ᵇ) Ś1 K1 D1 3 4 6 कुण्डाभ्याम् , K3 भण्डा° (for कुम्भा°) G5 अति- (for उप-) K2 4 कुण्डलाभ्यां च शोभिता; Ñ1 कुण्डलाभ्यामलंकृता — T3 om (hapl) 53ᶜᵈ — ᶜ) K1 3 4 D1 T2 G2 4 मयूराङ्ग(K3 °रग)जचित्रैश्च , G1 °ङ्गविचित्रैश्च — ᵈ) K Ñ2 3 V B D (except D6) वि- (for च)

54 T4 om 54 (cf v l 46) — ᵃ) V3 D1 5 हृष्ट- (for हृस-) Some Mss -कुर्कुट (for -कुक्कुट-) — ᵇ) D6 G2 खग- ; T2 G1 3 5 खड्ग- (for वनं) Ś1 -सेवितम् (for -नादि°) — ᶜ) K V Dn D1 2 G4 मृग- , Ñ2 3 (marg) G1 M1–3 नाग- , M4 खग- (for छाग-). V3 -सघैश् (for -यूथैश्) D6 T1 2 G2 3. 5 नागयूथै(T1 °पूगै)श्च संकीर्णम् — ᵈ) Ñ2 V1 D3 5 अधिरूढैश् (for अविरुद्धैश्) T2 G1 विरुतैश्चैव पक्षिभिः

55 T4 om 55 (cf v l 16) — ᶜ) D6 T1 G M4 -निखिलं , T2 -निनदं (for -निबिडं) — ᵈ) T3 पर्वतैर् (for सर्वतो)

56 T4 om 56 (cf v l 46) — ᵃ) V3 Dn2 D5 -भृङ्गारु- , G2 -भृङ्गैश्च (for -भृङ्गार-) D6 T2 G1 4 5 M4 दिव्यशृङ्गाररचनैर् — ᵇ) M4 श्वापदैश् (for आदर्शैश्). K Ñ2 3 V Dn D1–5 T3 उप- (for च वि-). D6 T1 2 G श्वापदै(D5 आदर्शै)श्च निषेवितम्. — Ñ2 om (hapl) 56ᶜᵈ. — ᵉ) Ñ1 M1 दिव्ये (for विन्ध्ये) — ᶠ) K1 2 D2 3 कर्मणा , M4 चेतसा (for तेजसा)

57 T4 om 57 (cf v l 46) Ñ2 om 57ᵃᵇ — ᵃ) V2 शत्रूणां (for रिपूणां) K4 रिपूणां त्रासिनी नित्यं — ᵇ) K4 शृङ्गे (for नित्यं) Ds2 तस्य (for तत्र) Ś1 K1 2 Ñ3 V1 2 Dn D2 3 5 मनोरमा (for °मे) Ñ1 भक्तानां चोपकारिणी — ᶜ) D6 T1 2 G1 3–5 M1–3 आस्ते सा (for वसते) Dn2 परमं (for °म) G2 आस्ते सा परमं प्रीता — ᵈ) Ñ1 3 V1 2 B D4 6 T3 G4 5 M अभि- , D3 अति- (for अपि). K3 देवैरपि च पूजिता

58 T4 om 58 (cf v l 46) — ᵃ) B2 (marg as in text) T2 G1 M4 त्वया (for त्वयं) — ᶜ) D3 तत्र (for अत्र) — ᵈ) Ñ1 B D3 -कार्य- (for कर्म) K Ñ2 3 V1 2 D1 2 4 5 दारुणम् (for कार°) D3 तन्महत्कर्म दारुणम् , T3 तस्य वै कर्म दारुणम्

59 T4 om 59 (cf v l 46) — ᵃ) V2 द्वितीयो वासुदेवस्य , M1–3 वसुदेवाद्द्वितीयो वै — D6 T1 2 om. (hapl) 59ᶜᵈ — ᶜ) K1 G1 ह ते , K2 च मे (for हि ते) G2-5 M1–3 सहसा , M4 भवता (for सहजो) — ᵈ) K4 वै (for च)

60 T4 om 60 (cf v l 46) — ᵃ) D1 6 T1 G2 3 एष (for एव) M1–3 स एष देवदेवो वै — ᶜ) G4 नित्यं (for मह्य) — ᵈ) T1 [अ]न्तरो (for °को) D2 3 हृदयेनान्तकोपम.

61 T4 om 61 (cf v l. 46) — ᵃ) D6 T1 2 G5 M4 यथेह , T3 यदा हि , G1 यदेह , G2. 3 M1–3 यथैव (for यथा हि) D2 पद्मयां (for मूर्ध्नि) — ᵇ) K2 तस्य (for यस्य). K1. 3 Ñ2. 3 V B Dn D3 D1 3–5 T3 4 [अ]व- , K4 [उ]प- , G3 [इ]ह (for [ए]व). Ñ3 V1. 2 B3 D3 D5 -तिष्ठते (for

वसुदेवस्तथैवायं सपुत्रः सहबान्धवः ।
छिनत्ति मम मूलानि भुङ्क्ते च मम पार्श्वतः ॥ ६२
भ्रूणहत्यापि संतार्या गोवधः स्त्रीवधोऽपि वा ।
न कृतघ्नस्य लोकोऽस्ति बान्धवस्य विशेषतः ॥ ६३
पतितानुगतं मार्गं निषेवत्यचिरेण सः ।
यः कृतघ्नोऽनुबन्धेन प्रीतिं वहति दारुणाम् ॥ ६४
नरकाध्युषितः पन्था गन्तव्यस्तेन दारुणः ।
अपापे पापहृदयो यः पापमनुतिष्ठति ॥ ६५
अहं वा स्वजनः श्लाघ्यः स वा श्लाघ्यतरः सुतः ।
नियमैर्गुरुवृत्तेन त्वया बान्धवकाम्यया ॥ ६६

हस्तिनां कलहे घोरे वधमृच्छन्ति वीरुधः ।
युद्धव्युपरमे ते तु सहाश्नन्ति महावने ॥ ६७
बान्धवानामपि तथा भेदकाले समुत्थिते ।
वध्यते योऽन्तरप्रेप्सुः स्वजनो याति विक्रियाम् ॥६८
कलिस्त्वं हि विनाशाय मया पुष्टो विजानता ।
वसुदेव कुलस्यास्य यद्विरोधयसे भृशम् ।
अमर्षी वैरशीलश्च सदा पापमतिः शठः ॥ ६९
स्थाने यदुकुलं मूढ शोचनीयं त्वया कृतम् ।
वसुदेव वृथावृद्ध यन्मया त्वं पुरस्कृतः ॥ ७०
श्वेतेन शिरसा वृद्धो नैव वर्षशती भवेत् ।　C 4196 B 2 22 7 P 2 22 :

°ति) D2 यस्यायं स च तिष्ठति , D2 (marg) यस्य मूर्ध्नि च तिष्ठति . —^{c}) G2 नुदति (for तु°) —^{d}) B3 -गन्धिना , D3 6 T1 2 G1 2 4 5 M4 -गृध्नुना (for -गृद्धिना)

62 T4 om 62 (cf v l 46) —^{a}) V1 च (for [ए]-व) —^{b}) Ś1 ससुत , G5 स ह्यत्र (for सपुत्र.) K Ñ V B Dn Ds D1 2 4 5 सपु(D2 °मि)त्रज्ञातिबान्धव. , D3 ममापि ज्ञाति°. —^{c}) D6 T1 2 G1–3 5 M4 भिनत्ति (for छि°) —^{d}) M4 पश्यतः (for पार्श्वत·)

63 T4 om 63 (cf v l 46) —^{a}) T3 ब्रह्म- (for भ्रूण-) K2 च , B2 नि- ; G1 M3 हि (for [अ]पि) K1 2 4 सवार्या (for संतार्या) —^{b}) Dn1 च (for वा)

64 T4 om 64 (cf v l 46) —^{a}) G2 पतितेन (for पतितानु-) —^{b}) Ś1 निपतति (for निषेवति) —^{c}) K1 2 G5 यत् (for य·) G2 ऽति- (for ऽनु-) M1 2 यः कृतघ्नानुगस्तेन —^{d}) D2 3 T2 G1 3 5 M3 4 दारुण (for °णाम्). Ś1 करोति प्रीतिधारणम् , K1 (marg as in text) जातिं वहति कारणम् (sic), K2 यात्यन्धं चातिदारुणम्

65 T4 om 65 (cf v l 46) G1 om (hapl) 65^{ab} —^{a}) D5 नरकाभ्युत्थितः पन्था —^{c}) K2 G4 अपाप (for (for °पे) — After 65, D6 T1 2 G1–3 5 M1 2 ins

751* स याति नरकं घोरं पुनरावृत्तिदुर्लभम् ।

66 T4 om 66 (cf v l 46) —^{a}) T1 अयं (for अहं) Ś1 वः (for वा) —^{b}) Ś1 D2 सर्व- , K1 2 4 स च , D6 T2 G1 2 5 तव , T3 तदा (for स वा) M4 श्लाघ्यतम (for °तर·) K4 तत , D1 तथा , G4 स्मृत (for सुत·) —^{c}) Ś1 नियमे ; K1 2 D2 3 °तं (for °मैर्) Ñ V1 3 B Dn Ds D1 T2 3 G3 M4 गुण- (for गुरु-) K3 -वृत्ते च (for -वृत्तेन) K4 V2 D5 नियत (K4 °मे) गुणवृत्तेन (D5 °त्ते च) —^{d}) M1–3 -कामया (for -काम्यया). K1, 2 4 D2 3 त्वया नात्र विचारितम्

67 T4 om 67 (cf v l 46) —^{b}) K3 B2 Ds1 D4 अर्हन्ति , K4 गच्छन्ति , Ñ2 3 V1 D1 6 इ° (for ऋ°) —^{c}) Ś1 K3 तेषां , K1 2 D3 तत्र , M4 वै ते (for ते तु) —^{d}) K3 D4 सदा शान्तिर् (for सहाश्नन्ति)

68 T4 om 68 (cf v l 46) —^{b}) Ñ3 (marg) V1 भय- (for भेद-) —^{c}) T3 विद्यते (for वध्यते) K2 च (for यो) —^{d}) Ś1 K1 2 4 मार्दवम् (for विक्रियाम्) K3 Ñ V B D (except D6) T3 स्वजनो यदि वेतर

69 T4 om 69 (cf v l 46) —^{a}) Ñ V B Dn Ds D3–5 कालस् (for कलिस्) G1 विनाशोऽयं (for °शाय) —^{b}) Ñ2 3 (marg) V1 प्राप्तोऽसि (for पुष्टो वि-) — After 69^{ab}, T1 2 G M1–3 ins

752* गच्छ गच्छ यथाकामं वसुदेव नराधम ॥
तद्दत्त कृपणं पिण्डं यद्दत्त तव जानता ।
तच्छुभ्यो यदि दत्त स्याच्छ्रेयो मम भविष्यति ॥

[(L 1) G2 गृह (for the second गच्छ) — (L 2) G2 3 जानन. (for °ता) M1–3 यद्दत्त मम जानत. (for ^{b})]

— M4 om 69^{cd} —^{d}) Dn1 D4 यदि (for यद्वि-) D3 यदि रोचयसे मृधम् , D6 याद्विरोधवशे भृशम् —^{e}) K4 अमर्ष- (for °र्षी) M1–3 धर्षशीली (for वैरशीलश्) K2 अमर्षश्च कुशीलश्च —^{f}) K3 D6 T1 2 G M1–3 -रति (for -मति) K4 तु स. ; D6 भृशम् (for शठ)

70 T4 om 70 (cf v l 46) —^{a}) M1–3 इदं (for स्थाने) V1 यद्वद्दुलं (for यदुकुल) D2 मूढं , D6 T1 2 G M1 2 4 कृत्स्न , M3 सर्वं (for मूढ) Ñ2 स्थान यदुकुले मूढ —^{c}) Ś1 K2 B Ds Dn D1–4 G1 वृद्धो (for वृद्ध) —^{d}) K1 (*sup lin* as in text) 2 यन्मया च , D3 यो मयात्र

यस्य बुद्धिः परिणता स वै वृद्धतमो नृणाम् ॥ ७१
त्वं तु कर्कशशीलश्च बुद्ध्या च न बहुश्रुतः ।
केवलं वयसा वृद्धो यथा शरदि तोयदः ॥ ७२
किं च त्वं साधु जानीषे वसुदेव वृथामते ।
हते कंसे मम सुतो मथुरां पालयिष्यति ॥ ७३
छिन्नाशस्त्वं वृथावृद्ध मिथ्या ह्येवं विचारितम् ।
जिजीविषुर्न स ह्यस्ति यो हि तिष्ठेन्ममाग्रतः ॥ ७४
प्रहर्तुकामो विश्वस्ते यस्त्वं स्वस्थेन चेतसा ।
तत्ते प्रतिकरिष्यामि पुत्रयोस्तव पश्यतः ॥ ७५
न मे वृद्धवधः कश्चिद्द्विजस्त्रीवध एव वा ।
कृतपूर्वः करिष्ये वा विशेषेण तु बान्धवे ॥ ७६
इह त्वं जातसंवृद्धो मम पित्रा विवर्धितः ।
पितृष्वसुर्मे भर्ता च यदूनां प्रथमो गुरुः ॥ ७७
कुले महति विख्यातः प्रथिते चक्रवर्तिनाम् ।
गुर्वर्थं पूजितः सद्भिर्यदुभिर्धर्मबुद्धिभिः ॥ ७८
किं करिष्यामहे सर्वे सत्सु वक्तव्यतां गताः ।
यदूनां यूथमुख्यस्य यस्य ते वृत्तमीदृशम् ॥ ७९
मद्वधो वा जयो वाथ वसुदेवस्य दुर्णयैः ।
सत्सु यास्यन्ति पुरुषा यदूनामवगुण्ठिताः ॥ ८०
त्वया हि मद्वधोपायं तर्कयानेन वै मृधे ।

(for यन्मया त्वं) Ś1 पुर स्थित., M1–3 सुसत्कृत (for पुरस्कृत.) M4 यन्महत्त्वं पुरा कृतम्

71 T4 om 71 (cf v l 46) —^{b}) K3 Dn2 D4 वर्षशतैर्, D5 °शतो (for °शती) Dn1 को न वर्षशतैर्भवेत्, D3 नापि वर्षशताद्भवेत् —^{c}) M1–3 सुनिष्णाता (for परिणता) —^{d}) N (except Ś1 D6) T3 G2 वृद्धतरो, M4 प्रियतरो (for वृद्धतमो) M1–3 मत. (for नृणाम्) —After 71, Bom Poona eds ins

753* न तेन वृद्धो भवति येनास्य पलितं शिरः ।

72 T4 om 72 (cf v l 46) —^{a}) K2 यस् (for त्वं) Ñ1 V3 D5 5 T1 च (for तु) —^{b}) T1 न च (by transp)

73 T4 om 73 (cf. v l 46) —^{a}) V2 G2 किंचित्त्वं, D1 कच्चित्त्वं, T3 न किंचित् (for किं च त्वं) —^{b}) D3 एवमेव (for वसुदेव) —^{c}) D4 5 T1 3 मृते, Bom ed हृते (for हते).

74 T4 om 74 (cf v l 46) —^{a}) N (except Ś1 D6) T1 3 G3 4 -वृद्धो (for वृद्ध) —^{b}) Ś1 मया, K1 वृथा, K2 यथा (for मिथ्या) K3 4 Ñ2 V2 3 B1 D1 तु (for हि) B2. 3 D3 [ए]तद्, Dn1 G5 [ए]व (for [ए]वं) —^{c}) Ś1 मे; K1 Ñ1 V1 Dn D1 2 4 T3 सो (for स) K4 Ñ2 V3 B2 D5 6 T1 2 G1 3–5 M ऽपि (for हि) K2 जिजिपुर्यदि सो ह्यस्ति (sic), G2 जिगृक्षुर्न च सोऽप्यस्ति —^{d}) K1 2 4 V3 B1 2 D3 वै, K3 Ñ V1 B3 Dn D1 2 4 5 T1 3 G3 ऽत्र-, G5 ऽभि- (for हि) G5 -तिष्ठन् (for तिष्ठेन्) D3 यो दृष्टोऽभून्ममाग्रतः

75 T4 om 75 (cf v l 46) —^{a}) T3 स हन्तु- (for प्रहर्तु-) —^{b}) N (except Ś1 D6) T1 3 G4 दुष्टेन (for स्वस्थेन). —^{c}) D6 T2 G1 4 यत्, M3 तं (for तत्) K Ñ2. 3 V B Dn D3 D1 3–5 T3 -करिष्येऽहं (for °ष्यामि). —^{d}) Ś1 पुत्रेषु, D6 T1. 2 G पुत्रस्य (for पुत्रयोस्). M1–3 पुत्रे तव च पश्यतः

76 T4 om 76 (cf v l 46) G2 om. 76^{ab}. —^{b}) K4 तद्वत्, D6 विप्र- (for द्विज-) K1 3 4 Ñ3 V B D (except D6) T3 G3 च (for वा) M1–3 स्त्रीवधो गोवधोऽपि वा —^{c}) K2 V2 G2 4 M1 कृतपूर्वं, D6 M3 कृत पूर्वं, G5 कृतं पूर्वं (for कृतपूर्वः)

77 T4 om 77 (cf v l 46) —^{a}) T1 G4 5 जातु (for जात-) D1 -संबन्धो (for -संवृद्धो) M1–3 इह त्वं जातो वृद्धश्च —^{b}) Ñ2 मात्रा (for पित्रा) —^{c}) Ñ1 च; T1 2 G1–3 5 M त्वं (for मे) K3 4 Ñ2 3 V B Dn D3 D1–5 T3 G4 पितृष्वसुश्च मे भर्ता, D6 यत्त्वं स्वसुश्च भर्ता च —^{d}) Ś1 प्रभवो, K1 2 प्रवरो, M4 परमो (for प्रथमो)

78 T4 om 78 (cf v l 46) —^{a}) Ñ1 व्याख्यातः, D6 T1 2 G1–3 5 M1–3 विख्याते (for °तः). —^{b}) K3 प्रथमे; D6 T2 G M4 प्रथितः (for °ते) —^{c}) M1–3 गुरुवत् (for गुर्वर्थं) M4 सम्यग् (for सद्भिर्) —^{d}) Ñ1 V3 D3 D5 महद्भिर् (for यदुभिर्) M2 3 -काङ्क्षिभि· (for -बुद्धिभि).

79 T4 om 79 (cf v l 46) —^{a}) Ś1 Ñ1 किं करिष्याम (Ñ1 °मि) वै सर्वे —^{b}) D3 त्वं तु (for सत्सु) D3 G2 गतः (for गताः) —^{c}) D3 यदु- (for यूथ-) M4 यदूनां यदुवृद्धस्य —^{d}) K4 उत्तमम् (for ईदृशम्)

80 T4 om 80 (cf v l 46) —^{a}) V2 वधो वा मे (for मद्वधो वा) D1 6 विजयो (for वा जयो) —^{c}) D2 एते (for सत्सु) Ñ3 (marg as in text) प्राप्स्यन्ति (for यास्यन्ति) —^{d}) D6 T1 G1–3 5 M4 -कुण्ठिता, M1 3 -कुण्ठताम्, M2 (inf lin.) -कुण्ठनाम्; M3 -कुण्ठनम् (for -गुण्ठिता)

81 T4 om. 81 (cf v l 46). —^{a}) V3 मद्वधोपायात् (for °यं) —^{b}) K4 Ñ2 3 V B1 Da2 D1. 4–6 T3 G4 तर्क-

अविश्वास्यं कृतं कर्म वाच्याश्च यदवः कृताः ॥ ८१
अशाम्यं वैरमुत्पन्नं मम कृष्णस्य चोभयोः ।
शान्तिमेकतरे शान्तिं गते यास्यन्ति यादवाः ॥ ८२
गच्छत्वयं दानपतिः क्षिप्रमानयितुं व्रजात् ।
नन्दगोपं च गोपांश्च करदान्मम शासनात् ॥ ८३
वाच्यश्च नन्दगोपो वै करमादाय वार्षिकम् ।
शीघ्रमागच्छ नगरं गोपैः सर्वैः समन्वितः ॥ ८४
कृष्णसंकर्षणौ चैव वसुदेवसुतावुभौ ।
द्रष्टुमिच्छति वै कंसः सभृत्यः सपुरोहितः ॥ ८५
एतौ युद्धविदौ रङ्गे कालनिर्माणयोधिनौ ।
दृढप्रतिकृती चैव शृणोमि व्यायतोद्यमौ ॥ ८६
अस्माकमपि मल्लौ द्वौ सज्जौ जयधृतोत्सवौ ।
ताभ्यां सह नियोत्स्येते तौ युद्धकुशलावुभौ ॥ ८७
द्रष्टव्यौ च मयावश्यं बालौ तावमरोपमौ ।
पितृष्वसुः सुतौ मुख्यौ व्रजवासौ वनेचरौ ॥ ८८
वक्तव्यं च व्रजे तस्मिन्समीपे व्रजवासिनाम् ।
राजा धनुर्महं नाम कारयिष्यति वै सुखी ॥ ८९
संनिकृष्टे व्रजास्तत्र निवसन्तु यथासुखम् ।
जनस्यामन्त्रितस्यार्थे यथा स्यात्सर्वमव्ययम् ॥ ९०
पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च । C 4216 B 2 22 93 P 2 22 93

माणेन ; M_{1-3} चिन्तयानेन (for तर्क°). B_3 मे (for वै) K_3 तर्कमाणेन वैरिणाम् —^{c}) $Ś_1$ $T_{1\ 2}$ G_{3-5} M_4 वृत्तं , G_2 $M_{1\ 2}$ वृद्ध ; M_3 वृद्धं (for कर्म). D_6 अवश्यं त्वत्कृते वृद्ध —^{d}) $Ś_1$ याच्याश्च (for वा°) T_3 स्युर् (for च) $Ñ_{2\ 3}$ V B D_5 D_{2-4} T_3 यादवाः (for यदव॰)

82 T_4 om 82 (cf v l 46) —^{a}) D_6 $T_{1\ 2}$ G M अवश्यं (for अशाम्य) —^{c}) $Ś_1$ तयोर् (for शान्तिम्) $K_{1\ 2}$ D_2 चैव , G_2 शान्ते (for शान्तिं) —^{d}) $K_{1\ 2}$ हते (for गते) $K_{1\ 2}$ साधवः , $Ñ_1$ D_6 T_2 G M_{1-3} मानवा॰ (for यादवाः) — After 82, D_6 S (except T_3, T_4 om) ins

754* तिष्ठ वा गच्छ वा मूढ यथेष्टं मम पार्श्वत ॥
हन्तुं स्वजनमुद्वृत्त सोऽयं यदुकुलोद्वहः ।
मा भूदयं परीवादो लोके यादवसत्तमा ।
अन्यथा वधयोग्योऽसि नात्र कार्या विचारणा ॥

[(L 1) T_2 G_1 [अ]थ (for the first वा) — (L 2) T_3 G_1 इत्युक्त ; G_2 इत्युक्त्वा , G_3 M_{1-3} उद्युक्त , M_4 उद्युक्त (for उद्वृत्त) D_6 बन्धु स्वजनमित्युक्त , T_1 वृद्ध स्वजनमुद्युक्त (for ^{a}) D_6 $T_{1\ 2}$ $G_{1\ 2,\ 4\ 5}$ कंसो (for सोऽय) — (L 3) M_4 -सत्तमम् (for °मा)]

83 T_4 om 83 (cf v l 46) —^{a}) K $Ñ_{2\ 3}$ V Dn D_{1-5} T_3 M_{1-3} गच्छ दानपते क्षिप्रं (T_3 शीघ्र) —^{b}) $K_{1\ 3\ 4}$ $Ñ_{2\ 3}$ V Dn D_{1-5} T_3 ताविह , K_2 तमिह , M_{1-3} इह च (for क्षिप्रम्) G_3 आनीयतां (for आनयितुं) $Ś_1$ व्रजम् , K_2 D_6 G_2 $M_{1\ 2}$ व्रजान् , G_4 प्रजा (for व्रजात्) —^{d}) D_1 (*sup lin*) करदानाय शासनात्

84 T_4 om 84 (cf v l 46) —^{a}) M_{1-3} तु (for च) M_{1-3} हि (for वै) $Ś_1$ $K_{1\ 2}$ नन्दगोपश्च वाच्योऽसौ ($Ś_1$ °च्यो मे) —^{c}) G_3 नगरी (for °रं) —^{d}) K_3 $Ñ_3$ V_3 Dn $T_{1,\ 3}$ गोपै सह , V_1 सर्वगोपै (for गोपैः सर्वैः) $K_{1\ 2}$ समावृत (for समन्वित॰) K_4 D_1 गोपै॰ सह समन्तत॰

85 T_4 om 85 (cf v l 46) —^{a}) $Ś_1$ $K_{1\ 2}$ $Ñ_2$ D_3 T_1 कृष्णं सकर्षणं चैव —^{d}) K_3 सपुत्र (for सभृत्य)

86 T_4 om 86 (cf v l 46) —^{a}) G_2 यौ तौ (for एतौ) $Ñ_1$ युद्धवरौ (for °विदौ) —^{b}) D_6 $T_{1\ 2}$ G M -निर्मितौ (for योधिनौ) — M_4 om 86^c–87^d —^{c}) D_5 कृत- (for दृढ-) $Ñ_1$ -प्रतिकृतौ (for °ती) K $Ñ_{2\ 3}$ V Dn D_{1-5} T_3 दृढौ च कृतिनौ चैव (D॰ युद्धे) —^{d}) D_3 श्रूयेते (for शृणोमि) K_2 शृणोमि व्याकृतोद्यमः , D_6 T_2 $G_{1\ 3-5}$ M_{1-3} °मि व्यायतोद्धतौ

87 T_4 om 87 (cf v l 46) M_4 om 87 (cf v. l. 86) —^{a}) Ds_1 मित्रौ द्वौ , T_1 तौ मल्लौ , T_2 G_1 बालौ द्वौ , G_4 कालौ द्वौ (for मल्लौ द्वौ) —^{b}) K Ñ V B Dn D_5 D_{1-6} $T_{1\ 3}$ सज्जौ युद्धकृतोत्सवौ ($Ñ_1$ V_2 B D_5 D_4 °द्यमौ), D_6 T_2 $G_{1\ 2\ 4\ 5}$ सज्जौ (G_2 युद्धे) धृतजयो° ; G_3 सज्जौ चापि धृतायुधौ —^{c}) M_{1-3} नियुध्येते (for नियोत्स्येते) —^{d}) $Ś_1$ $D_{3\ 6}$ G_{3-5} नि , D_2 वा , G_1 सु- (for तौ)

88 T_4 om 88 (cf v l 46) —^{b}) M_{1-3} तौ बालाव् (by transp) $Ś_1$ बालौ तावपराजितौ , D_2 बालौ तौ च सुरोपमौ —^{c}) $K_{1\ 2}$ वीरौ (for मुख्यौ) $B_{2\ 3}$ पितृष्वसृसुतौ वीरौ —^{d}) $Ś_1$ वनवासौ , $Ñ_2$ व्रजवास- (for °सौ)

89 T_4 om 89 (cf v l 46) —^{a}) B_1 T_1 वने (for व्रजे) $Ś_1$ वक्तव्यौ च व्रजे चैव —^{b}) V_1 समाजे (for समीपे) — K_2 om 89^{cd} —^{c}) V_3 B_2 T_{1-3} $G_{1\ 3-5}$ M_{2-4} धनुर्मखं (for °महं) —^{d}) V_2 महत् , Dn_2 D_6 T_2 G सुखम् (for सुखी)

90 T_4 om 90 (cf v l 46) G_4 om. (hapl) 90^{ab}. —^{a}) D_6 $T_{1\ 2}$ $G_{1-3,\ 5}$ $M_{1,\ 2}$ संनिकृष्टा , M_4 °कृष्टं (for

यथाकामप्रदानाय भोज्याधिश्रयणाय च ॥ ९१
अक्रूर गच्छ शीघ्रं त्वं तावानय ममाज्ञया ।
संकर्षणं च कृष्णं च द्रष्टुं कौतूहलं हि मे ॥ ९२
ताभ्यामागमने प्रीतिः परा मम कृता भवेत् ।
दृष्ट्वा तु तौ महावीर्यौ तद्विधास्यामि यद्धितम् ॥ ९३
सान्त्वाम वाक्यं श्रुत्वैवं मम तौ परिभाषितम् ।
नागच्छेतां यथाकालं निग्राह्यावपि तौ मम ॥ ९४
सान्त्वमेव तु बालेषु प्रधानं प्रथमो नयः ।
मधुरेणैव तौ मन्दौ स्वयमेवानयाशु वै ॥ ९५
अक्रूर कुरु मे प्रीतिमेतां परमदुर्लभाम् ।
यदि वा नोपजप्तोऽसि वसुदेवेन सुव्रत ॥ ९६
एवमाकुश्यमानस्तु वसुदेवो वसूपमः ।
सागराकारमात्मानं निष्प्रकम्पमधारयत् ॥ ९७
वाक्शल्यैस्ताड्यमानस्तु कंसेनादीर्घदर्शिना ।
क्षमां मनसि संधाय नोत्तरं प्रत्यभाषत ॥ ९८
ये तु तं ददृशुस्तत्र क्षिप्यमाणमनेकशः ।
धिग्धिगित्यसकृत्ते वै शनैरूचुरवाङ्मुखाः ॥ ९९
अक्रूरस्तु महातेजा जानन्दिव्येन चक्षुषा ।

°कृष्टे) Ś1 व्रजास्तस्य, K1 2 व्रजास्ते तु, V3 वने ते तु (for व्रजास्तत्र) D5 T3 संनिकृष्टं वने ते तु, M3 °ष्टो व्रजस्तत्र — b) D3 वसतां च (for निवसन्तु) — c) G2 [अ]भिमतस्य, M4 [अ]पि हितस्य (for [आ]मन्त्रितस्य)

91 T4 om 91 (cf v l 46) — b) D3 वा (for च) Ś1 K4 D4 दध्नोऽथ मथितस्य च — c) K1 2 4 Ñ2 3 V1 B1 2 D2 4 G3 5 यथाकाम (for °म-) — d) T3 क्रयणाय (for -श्र°) D5 भोज्यविश्राणनाय च.

92 T4 om 92 (cf v l 46). — a) M4 शीघ्र (for गच्छ) M1–3 त्वं शीघ्र (by transp) — d) V2 मम (for हि मे)

93 T4 om 93 (cf v l 46) — a) K3 Ñ2 3 B Dn D3 D4 5 तयोर् (for ताभ्याम्) Ś1 तयोरागमनप्रीति, V1 तयोरानयने प्रीति, D3 ततो दानपते प्रीति', D6 T1 G2 आनयस्व मम प्रीति — b) D2 6 T1 2 G M परमा मे (T1 °मार्था) (for परा मम) K2 Ñ2 V3 D3 5 परमा (K2 D3 °मे) मत्कृता भवेत् — After 93^{ab}, M1–3 ins 756* and om 93^{c}–96^{b} — c) Ś1 T1 हि, D6 T2 G1–3 5 M4 च (for तु) G4 दृष्ट्वा च तौ महावीरौ — d) D6 T1 2 G1–3 5 M4 सं- (for तद्) K2 नन्वहम्, Ñ1 V3 D2 तद्धितम्, D6 T2 G1 2 4 5 M4 निश्चयम्, T1 G3 निश्चितम् (for यद्धि°) Ś1 संविधास्ये विनिश्चयम्*

94 T4 om 94 (cf v l 46) M1–3 om 94 (cf v l 93) — a) Ś1 च ; V2 B2 3 D3 4 [ए]व (for [ए]व) K3 D2 अथ दानपते श्रुत्वा, K4 स मद्वाक्यं तु श्रुत्वैवं, V3 Dn D3 D5 T3 शासन यदि वा श्रुत्वा, D1 स्वान्मे वाक्यं तु श्रुत्वैव, D6 T2 G1 4 एतद्वाक्यामृतं श्रुत्वा, T1 G2 3 5 एतद्वाक्यं मम श्रुत्वा, M4 तद्वाक्य मम च श्रुत्वा — b) G4 5 M4 यदि (for मम) D5 चै (for तौ) Ś1 G2 -भाषितौ (for °तम्) D6 T2 G1, 4 मम तौ बालकौ यदि — c) Ś1 यथाकामं (for °लं) — d) K2 निगृह्याव् (for निग्रा°) Ś1 D1 2 त्वया, Ñ1 V2 B Dn मया, D6 T1 G3 4 समम्, G1 समौ (for मम) D3 निग्राह्यौ हि च तौ मया, T2 G2 5 M4 निगृह्यावपि तौ समम्

95 T4 om 95 (cf v l 46) M1–3 om 95 (cf v l 93) — a) B1 शान्तम् (for सान्त्वम्) D2 एवं (for एव) T3 हि (for तु). K4 बाले तु (for बालेषु) — b) D2 वृद्धानां (for प्रधान) D3 परमो (for प्रथमो) Ś1 प्रधानं प्रथम नयम्. — c) V2 तौ बालौ, D2 मन्दौ तौ (by transp)

96 T4 om 96 (cf v l 46) M1–3 om 96^{ab} (cf v l 93) — b) Ñ1 मम सु (for परम-) D6 T1 2 G M4 महती च सुदुर्लभाम् — After 96, N (except Ś1) T1–3 G M4 ins

655* तथा कर्तव्यमेतद्धि यथा तावागमिष्यत ।

[D3 तथ्य (for तथा) V3 यथा तातागमिष्यति (for b)] — T1 2 G1 4 5 M4 cont D6 G2 3 ins after 98 M1–3 after 93^{ab}

756* इत्युक्त्वा विररामैव कंसः स मधुरेश्वर ।

97 T4 om 97 (cf v l 46) — a) K1 4 V3 D3 5 G(ed) एवमाक्षिप्यमाणोऽपि (K1 4 D3 °णस्तु); K2 °ख्याप्यमानस्तु — c) G4 सागरक्षिप्तमात्मानं

98 T4 om 98 (cf v l 46) — a) K1 2 D3 वाक्शरैस् (for वाक्शल्यैस्) V2 पीड्यमानस्, B3 T2 G तुद्य° (for ताड्य°) V3 M1–3 वाक्शल्यैस्तुद्यमानोऽपि, D6 वाक्यशल्यैस्तुद्यमान — d) B2 3 T3 G3 4 नोत्तरं प्रत्यपद्यत — After 98, D6 G2 3 ins 756*

99 T4 om 99 (cf v l 46) D6 T2 G1 3–5 om. 99^{ab}. — b) N (except Ś1 K1 B1 3 ; D6 om) T1 3 G2 अनेकधा (for °शः) — c) K1 2 D3 [ए]व ते सर्वे (for [अ]सकृत्ते वै) M1–3 धिगित्यसकृदेवैते. — d) D2 (*sup. lin,* as in

जलं दृष्ट्वेव तृषितः प्रेषितः प्रीतिमानभूत् ॥ १००
तस्मिन्नेव मुहूर्ते तु मथुरायाः स निर्ययौ ।
प्रीतिमान्पुण्डरीकाक्षं द्रष्टुं दानपतिः स्वयम् ॥ १०१

इति श्रीहरिवंशे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

वैशंपायन उवाच ।
क्षिप्तं यदुवृषं दृष्ट्वा सर्वे ते यदुपुंगवाः ।
निपीड्य श्रवणान्हस्तैर्मेनिरे तं गतायुषम् ॥ १
अन्धस्त्वनाविग्नमना धैर्यादविकृतं वचः ।
प्रोवाच वदतां श्रेष्ठः समासात्कंसमोजसा ॥ २
अश्लाघ्यो मे मतः पुत्र तवायं वाक्परिश्रमः ।
अयुक्तो गर्हितः सद्भिर्बान्धवेषु विशेषतः ॥ ३
अयादवो यदि भवाञ्शृणु तावद्यदुच्यते । C 4236 B 2 23.4 P 2.23 4

text) चक्रुर् (for ऊचुर्) M_{1-3} अधोमुखा (for अवाङ्मुखाः) — After 99, G(ed) reads lines 9-12 of 757*

100 T_4 om 100 (cf v l 46) D_5 om 100^{cd} — ^{d}) D_5 प्रीतिमानभवत्तदा — After 100, D_6 $T_{1\ 2}$ G M G(ed) ins

757* पश्यामि देवदेवेशं शङ्खचक्रगदाधरम् ।
योगिनां योगगम्यं तमीश्वरं सकलेश्वरम् ॥
पश्यामि बाल गोविन्द गोपवेषविभूषितम् ।
म्कर्षणसहायं तं पद्मपत्रनिभेक्षणम् ॥
अद्य मे सफल जन्म दृष्टो येन मया हरि ॥
मयूराङ्गदचित्राङ्ग तुम्बवीणाविमिश्रितम् ।
द्रक्ष्यामि लोकनाथं त गोपीस्तनविलालसम् ॥
यदि मा चक्षुषा सम्यक्प्रीतियुक्तेन पश्यति ।
तदानी सफल जन्म मम त पश्यतो हरिम् ॥
यं दृष्ट्वा मुनय· सर्वे विरमन्ते तपोबलात् ।
स मां वक्ष्यति किंचित्तु वचनं वाग्विदां वर ॥
एवं विचिन्त्य मनसा गन्तुं शीघ्रतरोऽभवत् ।

[M_{1-3} om line 4 — (L 5) G_4 om (hapl) lines 5^{b}–9^{a} — (L 7) T_2 $G_{1\ 5}$ तु (for त) D_6 T_1 G_3 M_4 G(ed) -विलासिनम् (for °लसम्) — G(ed) reads lines 9–12 after 99, and transp lines 9–10 and 11–12 — (L 9) M_4 यदा हि मम तज्जन्म (for ^{a}) G_4 सस्मित , M_3 मम तत् , M_4 सफल (for मम त) G(ed) हरि (for हरिम्) — (L 11) T_1 M_{1-3} पति (for वर) ; — (L 12) $M_{3\ 4}$ सचिन्त्य (for वि°)]

101 T_4 om 101 (cf v l 46) — ^{a}) V_3 Bom ed निशीथे (for मुहूर्ते)

Colophon om in $T_{3\ 4}$ — *Mention of the Epic* K_3 $\tilde{N}_2$ V_2 Ds_2 — *Mention of Khila* $Ś_1$ K_3 $\tilde{N}_{2\ 3}$ V B Ds $D_{1\ 3}$ — *Sub parvan* D_3 बालचरितम् — *Adhy name* $Ś_1$ $K_{1\ 2}$ अक्रूरप्रेषणम् , K_3 $\tilde{N}_1$ V_2 Ds_2 D_{3-5} अक्रूरप्रस्थानम् , K_4 $\tilde{N}_{2\ 3}$ V_1 B Dn Ds_1 $D_{1.2}$ अक्रूरप्रस्थापनम् ; D_6 $G_{2\ 3}$ M_4 कंसवाक्यम् — *Adhy no* (figures, words or both) : K_3 D_1 M_{1-3} 75 , $\tilde{N}_3$ G_1 78 , $V_{1\ 3}$ Ds_2 T_2 77 , V_2 B_2 T_1 $G_{3\ 5}$ M_4 79 , Dn_1 70 , D_3 83 , D_4 $G_{2.4}$ 76 — *Śloka no* Dn_1 102 , Ds_2 103 , D_4 104 , T_2 119 , G_1 123

66

1 T_4 om 1–25 (cf v l 65 46) — ^{a}) $K_{1\ 4}$ $\tilde{N}_1$ $V_{2\ 3}$ B_3 Dn $D_{1\ 5\ 6}$ $T_{1\ 3}$ G_3 क्षिप्रं (for क्षिप्तं) D_5 M_3 -कुलं (for -वृष) — ^{c}) K_4 D_{1-4} नि पीड्य ; M_{1-3} पिधाय (for निपीड्य) $Ś_1$ T_1 श्रवणं (for °णान्).

यत्राहमिव सत्त्वानि चरन्त्ययुतशो जले ॥ ३८
सोऽहं कुतूहलाविष्टो नदीं गङ्गामुपस्थितः ।
धन्यासि त्वं नदीश्रेष्ठे नित्यमाश्चर्यदर्शने ॥ ३९
या त्वमेवं महादेहैः श्वापदैरुपशोभिता ।
ह्रदिनी सागरं यासि रक्षन्ती तापसालयान् ॥ ४०
एवमुक्ता ततो गङ्गा रूपिणी प्रत्यभाषत ।
नारदं देवगन्धर्वं शक्रस्य दयितं द्विजम् ॥ ४१
नाहं धन्या द्विजश्रेष्ठ नाप्याश्चर्योपशोभिता ।
तत्र सत्ये निविष्टस्य वाक्यं मां प्रतिबाधते ॥ ४२ C 9635 B 2 110 43 P 2 110.43

om. 31^{bc} — ^{b}) $M_{1\ 3}$ ये चाग्रस्था (for यावन्तः स्थ) K_2 समाहिता. (for °गताः) $Ś_1$ यावन्त' समुपागताः — K_2 om (hapl) 31^{cd} — ^{c}) $Ś_1$ T_4 कृष्णस्य (for प्रश्नस्य)

32 ^{b}) $D_{2\ 3\ 5}$ $T_{1\ 2\ 4}$ G $M_{3\ 4}$ तीरे त्रिषवणाय वै ($D_{2,3}$ °र्थिक) — ^{c}) K_2 वसन्नेकः, V_2 G_2 चराम्येष, D_3 समागच्छं (for चराम्येक') — ^{d}) N (except $Ś_1$ $Ñ_1$) T_2 $G_{1\ 2\ 4,5}$ M_4 दृश्यमाने (for संदृश्यति)

33 ^{a}) K $Ñ_{2\ 3}$ V B D $T_{1\ 2}$ G M_4 अपश्यं गिरिकूटाभं — ^{d}) K $Ñ_{2\ 3}$ V B D T_4 G_2 तावद्विगुणमायतम्

34 ^{a}) $K_{1\ 4}$ Ñ $V_{1\ 3}$ B Dn_2 D_3 $D_{1\ 5\ 6}$ $G_{2\ 4}$ M_4 -सुश्लिष्टं, T_4 G_5 -संविष्टं (for -संश्लिष्टं). D_3 (marg as in text) चतुरस्रं च संश्लिष्ट — ^{b}) T_2 $G_{1\ 4}$ M_4 शैवाल-, Bom Poona eds. G(ed) चैव स- (for शैवल-) K_1 V_1 D_2 -पङ्किनम्, K_2 M_{1-3} °तम् (for -पङ्किलम्) T_1 G_3 क्लिन्नं तं शैवलाङ्कितम् — ^{c}) $T_{1\ 2}$ $G_{1\ 5}$ M_4 अतिधीरा($G_{1\ 5}$ M_4 °प्रिया)कृतिं कूर्मं — ^{d}) $T_{1\ 2\ 4}$ $G_{1\ 3-5}$ M महाद्रिनि- (for गजचर्म)

35 ^{a}) K_2 D_3 G_3 M_{1-3} स्पृश्य (for स्पृष्ट्वा). — ^{b}) K_5 अम्बु- (for जल-) — ^{d}) N (except $Ś_1$) G_2 ऽसि (for च)

36 ^{b}) $Ś_1$ समाहृतः (for °वृतः) — ^{c}) T_2 तोयं (for तोये) D_1 वससि (for चरसि). — ^{d}) $K_{1,4}$ V_3 $B_{2\ 3}$ Dn_1 Ds_1 $D_{1\ 4\ 6}$ कंचि(D_4 °स्त्रि)दन्यमचिन्तयन्, D_3 कंचिन्नयमचिन्तयन्.

37 ^{a}) D_3 [अ]म्बुधरः (for °चरः) K_2 उवाच वाचाम्बुधरः. — ^{b}) Ds_1 कूर्मो मानुषवागथ — ^{c}) $Ñ_1$ मम कृते; $T_{1\ 2}$ $G_{1\ 3-5}$ M मयि विभो (for मयि मुने) — ^{d}) $T_{1\ 2,4}$ $G_{1\ 3-5}$ M मुने (for विभो)

38 ^{a}) D_3 विस्तरा (for निम्नगा) — ^{c}) T_1 G_3 इह (for इव) — ^{d}) K $Ñ_{1\ 2}$ $V_{2\ 3}$ B D T_1 G_2 द्विज, $Ñ_3$ V_1 विभो, M_1 मुने (for जले)

39 ^{a}) $Ñ_1$ T_1 $G_{4\ 5}$ $M_{1\ 2\ 4}$ सोऽहं कौतूहलाविष्टो — Before 39^{cd}, G_3 ins नारद. — ^{c}) N (except $Ś_1$ $Ñ_1$) T_4 G_2 सरिच्छ्रेष्ठे (for नदीश्रेष्ठे) — ^{d}) $Ś_1$ -दर्शिनि, $K_{1\ 3\ 4}$ $Ñ_{2\ 3}$ V B D -भूषिता, K_2 -भूषिते (for -दर्शने)

40 ^{a}) V_2 B_2 या त्वमेव, B_1 यस्त्वमेवं (for या त्व°) K_1 महारौद्रै, T_4 °भागे, M_1 °भागै. (for °देहै.) D_3 $T_{1\ 2}$ $G_{1,3-5}$ M_{2-4} या त्व($G_{3\ 5}$ M_4 यस्त्व)मेवंविधैः सत्त्वैः (D_3 °धै रौद्रै) — ^{b}) $T_{1\ 2}$ $G_{1\ 3-5}$ M_{2-4} समन्ताद् (for श्वापदैर्) M_1 -सेविता (for -शोभिता) $Ś_1$ श्वापदैरभिसंवृता. — ^{c}) $Ś_1$ V_2 T_2 M_2 ह्लादिनी ; D_3 देवी त्वं (for ह्रदिनी). — ^{d}) T_2 $G_{4\ 5}$ M_4 रक्षन्ती तापसान्बहून्

41 ^{a}) V_2 उक्ते (for उक्ता) — ^{b}) $Ñ_1$ रूपिणी प्रत्यपद्यत. — K_2 $Ñ_1$ D_6 G_2 om. 41^{cd} $K_{1\ 3\ 4}$ $Ñ_{2,3}$ V B Dn Ds D_{1-5} $T_{2\ 4}$ $G_{1\ 4\ 5}$ M_4 read 52^{ab} after 41 and K_2 $Ñ_1$ D_6 G_2 after 41^{ab} repeating it in its proper place.

42 ^{b}) $T_{1,2}$ $G_{1\ 3-5}$ M नाश्चर्यैरुपशोभिता. — ^{d}) $Ñ_2$ -पद्यते, $D_{1\ 5}$ बोधते (for °बाधते) $Ś_1$ वाक्यं साध्विति भाति मे

लोकाश्चर्यकराच्छ्लाके धन्यश्चैवार्णवो द्विज ।
यत्राहमिव विस्तीर्णाः शतशो यान्ति निम्नगाः ॥ ४३
सोऽहं त्रिपथगावाक्यं श्रुत्वार्णवमुपस्थितः ।
आश्चर्यः खलु लोकानां धन्यश्चासि महार्णव ।
तेन खल्वसि योनिस्त्वमम्भसां सलिलेश्वरः ॥ ४४
स्थाने त्वा वारिवाहिन्यः सरितो लोकभावनाः ।
इमाः समभिगच्छन्ति पत्न्यो लोकनमस्कृताः ॥ ४५
समुद्रस्त्वेवमुक्तस्तु ततो मामब्रवीद्वचः ।
स्वं जलौघतलं भित्त्वा व्युत्थितः पवनेरितः ॥ ४६
मा मैवं देवगन्धर्व नास्म्याश्चर्यो द्विजोत्तम ।
वसुधेयं मुने धन्या यत्राहमुपरि स्थितः ।
ऋते तु पृथिवीं लोके किमाश्चर्यमतः परम् ॥ ४७
सोऽहं सागरवाक्येन क्षितिं क्षितितले स्थितः ।
कौतूहलसमाविष्टो ह्यब्रुवं जगतो गतिम् ॥ ४८
धरित्रि देहिनां योनिर्धन्या खल्वसि शोभने ।
आश्चर्या चासि भूतेषु महत्या क्षमया युते ॥ ४९
तेन खल्वसि लोकानां धरणी मनुजारणिः ।
क्षमा त्वत्तः प्रसूता च कर्म चाम्बरगामिनाम् ॥ ५०
ततो भूः स्तुतिवाक्येन सा मयोक्तेन लज्जिता ।
विहाय सहजं धैर्यमथ मां प्रत्यभाषत ॥ ५१
देवगन्धर्व मा मैवं संग्रामकलहप्रिय ।
नास्मि धन्या न चाश्चर्या पारक्येयं धृतिर्मम ॥ ५२

---

43 V3 om 43^{a}–44^{b} — ^{a}) K2 Dn2 T4 सर्वाश्चर्य- (for लोका°) Ś1 सर्वाश्चर्यमयो लोके

44 V3 om 44^{ab} (cf v l 43) B3 om 44^{c}–45^{d} — ^{c}) Ś1 K3 Ñ V2 G1 4 5 M2, 4 आश्चर्यं (for °र्यः) Ñ2 D2 3 सर्व-; T2 चासि (for खलु) M3 लोकेऽस्मिन् (for लोकानां) — ^{e}) N (except Ś1, B3 om) T1 2 4 G M4 येन (for तेन) Ś1 [अ]पि (for [अ]सि) — ^{f}) Ś1 अम्भसां निधिरेव च, T1 2 4 G1 3–5 M °सो विविधस्य च

45 B3 om 45 (cf v l 44) — ^{b}) K Ñ2 3 V2 3 B1 2 Dn Ds D1 3–6 G2 -पावनाः (for -भा°) — ^{d}) Cal. ed नद्यो (for पत्न्यो).

46 K3 om 46 — ^{a}) T1 2 4 G1 3–5 M3 4 स, M1, 2 संस् (for तु) — ^{b}) K1 सोऽब्रवीद्, K4 Ñ2 3 B1 2 Dn Ds D1 5 T4 G5 अवदद् (for अब्रवीद्) M1 2 ततो मामभ्यभाषत — ^{c}) M4 स (for स्वं) D4 स्वां जलौघतनुं भित्त्वा. — ^{d}) Ś1 प्रोत्थितः, K2 द्यु°; T1 2 G1–3 5 M मूर्तिमान् (for व्युत्थित)

47 ^{a}) K2 G2 वद (for देव-) T1 2 G1 3–5 M1 3 4 मा मैव वद देव(M3 विप्र)र्षे — ^{b}) K1 Ñ V B D G2 द्विजर्षभ, K4 द्विजश्रेष्ठ (for द्विजोत्तम) — ^{d}) D2 3 परिसं- (for उपरि) — ^{e}) T2 G1 भारते (for पृथिवीं) Ś1 ऋते हि पृथिवीलोकात् — ^{f}) B1 मयि स्थितम् (for अतः परम्)

48 ^{b}) Ś1 क्षितौ, G2 क्षिप्रं, M3 क्षणात् (for क्षितिं). Ñ1 पथे स्थितः, D4 (marg as in text) -तलोत्थित (for -तले स्थित). — ^{c}) K2 Ds2 D2 कुतूहल (for कौ°) — ^{d}) M1–3 ह्यब्रव (for ह्यब्रुव) Ñ2 जगतीं (for °तो) D3 हितम् (for गतिम्) Ś1 ह्यब्रुवं जगतीमहम्, D2 °वं धरणीं तत, T1. 4 अब्रवीज्जगतो निधिम्

49 ^{a}) Ś1 Ds D1 धरित्री (for °त्रि) D5 T1 4 G3 5 योने (for योनिर्) G1 धरित्रिं देहिनां योनिं, M1–3 धरे धरित्रि देहीनां — ^{b}) T1 2 4 G1 3–5 M1 2 4 त्वमपि, G2 असि खलु (by transp.) Ś1 धन्या खल्वपि शाश्वती — ^{c}) K1 V1 B1 Dn D2–4 आश्चर्य (for °र्या) T4 [अ]पि (for [अ]सि) K2–4 Ñ1 V3 B2 3 Ds D1 5 6 T1 G1–3 आश्चर्यं चापि भूतेषु — ^{d}) Ś1 युता (for युते) T1 2 4 G1 3–5 M महत्या (G1 °त्सु) क्षमयान्विते

50 ^{a}) K4 तत· (foı तेन) N (exoept Ś1) T1 2 4 G M4 भूतानां (for लोकानां) — ^{b}) D3 धारिणी (for धरणी) — ^{c}) K1 B1 D2 4 प्रभूता (for प्रसूता) — ^{d}) B3 T1 4 G3 M1 2 (*inf lin* as in text) -वासिनाम् (for -गामि°). Ś1 कर्मणान्तरगामिनाम्.

51 ^{a}) Dn Ds भूस्तेन, T4 भू· स्वस्ति·; G2 5 M4 भूमिस्तु (for भूः स्तुति-). — ^{b}) K1 3 4 Ñ V B Dn Ds D2, 3, 5, 6 G2 तेजिता, K2 वेजिता, D1 वर्जिता (for लज्जिता) Ś1 सागरोक्तेन वै नृपाः; T1 2 G1 3–5 M4 नारदोक्तेन लज्जिता, M1–3 सागरोक्तेन व्यज्जिता. — ^{c}) Ś1 K2 सहसा (for सहजं). D3 बध्वा च सहसा धैर्यम् — ^{d}) Ś1 तं (for मां) T1 2 G1, 3–5 M मही (M1–3 अथ) मामभ्यभाषत; Bom Poona eds. G(ed) प्रत्यक्षा मामभाषत

52 K1 3 4 Ñ2 3 V B Dn Ds D1–5 T2, 4 G1 4 5 M4 read 52^{ab} and K2 Ñ1 D6 G2 read it for the first time after 41 and 41^{ab} respectively — ^{a}) N (except Ś1) T2 4 G1 2 4 5 M4 (all first time) मा मैवं (K4 मैवं त्वं) देवग(K2 D2, 3 वद ग)न्धर्व. — ^{c}) D2 [अ]हं; G2, 5 [अ]स्मि

एते धन्या द्विजश्रेष्ठ पर्वता धारयन्ति माम् ।
एष्वाश्चर्याणि दृश्यन्ते एते लोकस्य सेतवः ॥ ५३
सोऽहं पृथिव्या वाक्येन पर्वतान्समुपस्थितः ।
धन्या भवन्तो दृश्यन्ते बह्वाश्चर्याश्च भूधराः ॥ ५४
काञ्चनस्याग्ररत्नस्य धातूनां च विशेषतः ।
तेन रत्नाकराः सर्वे भवन्तो भुवि शाश्वताः ॥ ५५
मम त्वेतद्वचः श्रुत्वा पर्वतास्तस्थुषां वराः ।
ऊचुर्मां सान्त्वयुक्तानि वचांसि वनशोभिताः ॥ ५६
ब्रह्मर्षे न वयं धन्या नाप्याश्चर्याणि सन्ति नः ।
ब्रह्मा प्रजापतिर्धन्यः स चाश्चर्यः सुरेष्वपि ॥ ५७
सोऽहं पितामहं गत्वा सर्वप्रभवमव्ययम् ।
तस्य वाक्यस्य पर्यायं पर्याप्तमिव लक्षये ॥ ५८
सोऽहं स्वयंभुवं देवं लोकयोनिं चतुर्मुखम् ।
पारंपर्यादुपगतः प्रणामावनताननः ॥ ५९
सोऽहं वाक्यसमास्यर्थं श्रावयाम्यात्मयोनिनम् ।
आश्चर्यो भगवानेको धन्यश्च जगतो गुरुः ॥ ६०
न किंचिदन्यत्पश्यामि भूतं यद्भवता समम् ।
त्वत्तः सर्वमिदं जातं जगत्स्थावरजंगमम् ॥ ६१ C 9655 B 2. 110 62 P 2. 110 62

(for [अ]स्मि) K2–4 Ñ2 3 V1 B Dn Ds D1 T1. 4 G1. 3–5 M4 न चाश्चर्यं, D3 तवाश्चर्यं, D6 T2 च नाश्चर्यं (for न चाश्चर्या) — ^{d}) T2 [ए]व (for [इ]यं) D3 कृतिर् (for धृतिर्)

53 ^{a}) K4 T4 ते धन्या ये (for एते धन्या) — ^{b}) Ś1 पर्वता ये समाश्रया — G2 om 53^{cd} — ^{c}) Ś1 तेषु, D4 (marg as in text) पश्य (for एषु) T4 M1–3 सर्वाणि, M4 मुह्यन्ते (for दृश्यन्ते) D6 G3 आश्चर्याणि च दृश्यन्ते — ^{d}) K3, 4 Ñ2 3 B1 Dn Ds D1 5 T1 2 G1 3–5 M4 हेतव (for से°)

54 T4 om 54–63 — ^{a}) K Ñ V B1 Dn Ds D1 2. 4 6 G2 M4 पर्याय-, D8 पार्थिव-, T2 पृथिवि-; Bom Poona eds G(ed) धरणी- (for पृथिव्या) — ^{b}) K4 पर्वतानब्रुवं वच·, Ñ1 क्षितिं क्षितिपथे स्थितः. — ^{c}) G (ed) धृत्या (for धन्या). Ś1 ऽश्ममया, T1 2 G1 3 4 M4 भूतानां, G5 M1–3 लोकानां (for दृश्यन्ते)

55 T4 om 55 (cf v l 54) Ñ2 om 55^{ab} — ^{a}) K2 D1–3 [अ]थ (for [अ]ग्र-) — K4 om 55^{c}–56^{b} — ^{d}) Ś1 युधि (for भुवि) K3 Dn Ds G5 भास्वरा. (for शाश्वताः) Ñ1 भवन्त. शाश्वता भुवि

56 T4 om 56 (cf. v. l 54) K4 om 56^{ab} (cf v l 55). — ^{a}) K1–3 Ñ V B D G1 2 ते मम (for मम तु) — ^{c}) K2 साम·, D2 भाव- (for सान्त्व-) — ^{d}) K Ñ2 3 V B3 Dn D1 2 4–6 -शोभिनः (for °ताः) D3 वचांसि नगशोभिनः — After 56, K3 reads 58^{bcd}

57 T4 om 57 (cf v l 54) — ^{b}) G2 भारत (for सन्ति नः) — After 57^{ab}, T1 2 G1 3–5 M4 G(ed) ins :

1121* अस्माकमीश्वरः शूली गिरिशो वृषभध्वजः ।
नाश्चर्यो वापि धन्यो वा तस्मात्परतरो भुवि ॥
विहाय तं महादेवं नास्मान्स्तोतुमिहार्हसि ॥
इति तेषां वचः श्रुत्वा कैलासमहमागतः ।
दृष्ट्वा तं पार्वतीशानमब्रुव वचनं तदा ॥
देवदेव महादेव नीलकण्ठ वृषध्वज ।
आश्चर्योऽसि भवानेको धन्यस्त्वं जगतीपते ।
त्वत्त. परतरो नास्ति देवो जगति कश्चन ॥
यदिदं दृश्यते देव भुवनं सचराचरम् ।
तस्याधारस्त्वमेवासि सर्वस्य त्रिपुरान्तक ॥
अथ मामब्रवीद्देवो विरूपाक्षस्त्रिलोचन· ।
नाहं धन्यो न चाश्चर्यो नैवं मां वक्तुमर्हसि ।
मत्त परतरो ज्ञेयो जगत्स्रष्टा द्विजोत्तम ॥

[(L 1) G6 गिरीशो (for गिरिशो)]

— ^{d}) Ś1 D4 सर्वाश्चर्यं, K1 2 V1 B1 Dn2 D1 3 4 G2 3 M4 सर्वाश्चर्यं, Ñ1 D5 सदाश्चर्यः (for स चा°).

58 T4 om 58 (cf v l 54) K3 om 58^{a} — ^{a}) T2 G4 M4 प्रजापतिं (for पितामहं) — K3 reads 58^{bcd} after 56 — ^{c}) K4 तस्य पर्यायं पर्याप्तो — Ñ2 om 58^{d}–59^{a}. — ^{d}) D3 लक्षणाम् (for पर्याप्तम्) K4 अहं तच्चैव लक्षये.

59 T4 om 59 (cf v l 54) Ñ2 om 59^{a} (cf v l 58). K3 4 D1 om (hapl) 59 — ^{a}) D6 चतुर्मुखं, Bom. Poona eds G(ed) पितामहं (for स्वयंभुवं) — ^{b}) D6 लोकनाथं (for °योनिं) — G1 om 59^{c}–61^{b} — ^{c}) Bom. Poona eds G(ed) स्तोतुं पश्चाद् (for पारंपर्याद्) K1 2 Ñ2 3 V B Dn Ds D2–4 6 उपयात ; T1 2 G3–5 M4 उपागम्य (for उपगतः) — ^{d}) Ś1 G2 प्रणामादानतानन·, D5 प्रणतोऽवनतानन

60 T4 om 60 (cf v l 54) G1 om 60 (cf. v. l. 59) — ^{b}) K1–3 Ñ2 V B Dn Ds D2–4 6 G2 M4 श्रावये (Dn °यं) पद्मयोनये ; K4 Ñ1 D1 5 T2 G4 5 °ये पद्मयोनिजम् (T2 G4 °निनम्) — ^{c}) N G2–4 M4 आश्चर्यं (for °र्यो). — ^{d}) T1 G3 ऽसि (for च) M1 2 गुरो (for गुरु.). K2 धन्यश्च त्वं जगत्पते

सदेवदानवा मर्त्या लोके भूतेन्द्रियात्मकाः ।
भवन्ति सर्वदेवेश दृश्यं सर्वमिदं वपुः ॥ ६२
तेन खल्वसि देवानां देवदेवः सनातनः ।
तेषामेवासि यत्स्रष्टा लोकानामपि संभवः ॥ ६३
ततो मामाह भगवान्ब्रह्मा लोकपितामहः ।
धन्याश्चर्याश्रितैर्वाक्यैः किं मां नारद भाषसे ॥ ६४
आश्चर्यं परमं वेदा धन्या वेदाश्च नारद ।
ये लोकान्धारयन्ति स्म वेदास्तत्त्वार्थदर्शिनः ॥ ६५
ऋक्सामयजुषां सत्यमथर्वणि च यन्मतम् ।
तन्मयं विद्धि मां विप्र धृतोऽहं तैर्मया च ते ॥ ६६
पारमेष्ठ्येन वाक्येन चोदितोऽहं स्वयंभुवा ।
वेदोपस्थानिकां चक्रे मतिं संक्रान्तविस्तराम् ॥ ६७
सोऽहं स्वयंभुवचनाद्वेदान्वै समुपस्थितः ।
उवाच चैनांश्चतुरो मन्त्रप्रवचनार्चितान् ॥ ६८
धन्या भवन्तः पुण्याश्च नित्यमाश्चर्यविश्रुताः ।
आधाराश्चैव विप्राणामेवमाह प्रजापतिः ॥ ६९
स्वयंभुवोऽपीह परं भवत्सु प्रश्न आहितः ।
युष्मत्परतरं नास्ति श्रुत्या वा तपसापि वा ॥ ७०
प्रत्यूचुस्ते ततो वाक्यं वेदा मामभितः स्थिताः ।
आश्चर्याश्चैव धन्याश्च यज्ञाश्चात्मपरायणाः ॥ ७१

---

61 T4 om 61 (cf v 1 54) G1 om 61^{ab} (cf v. 1 59)

62 T4 om 62 (cf v. 1 54) — ^{a}) K1 D4 यद्देव- (for सदेव) — ^{b}) B1 Ds2 G1–3 5 लोक- (for लोके) Ñ1 लोके भूतेन्द्रियात्मजाः — ^{c}) Ś1 -लोकेषु , T1 2 G1 3–5 M1 2 4 -भूतेश (for -देवेश) — ^{d}) K2 दृष्ट , K3. 4 Ñ2 B1 Dn Ds D4 5 G3 दृष्ट्वा (for दृश्यं) K2 D5 G5 जगत् , B1 च यत् (for वपुः) K1 दृष्ट्वा सर्वमयं वपु , Ñ3 V B2 3 D1–3 G2 दृश्यादृश्यमिदं जगत् (V2 3 B2 3 च यत्)

63 T4 om 63 (cf v 1 54) — ^{b}) K4 देवदेवं सनातनम् — V3 om 63^{cd} — ^{c}) K4 Ñ B1 Dn Ds श्रेष्ठो (for स्रष्टा) D3 देवानामपि यत्स्रष्टा — ^{d}) K Ñ2 3 V1 2 B Dn Ds D3 4 G2 भावनः (for संभवः) D6 योगानामपि भावन. .

64 ^{a}) K1 4 Ñ V B D T2 G1. 2 4 5 M4 प्राह (for आह). K3 ततो मां भगवान्प्राह — ^{c}) K1 D4 धन्याश्चर्ययुतैर्वाक्यै , T1 °र्याश्रितं वाक्यं

65 ^{a}) D2 आश्चर्याः (for °र्यं) B1 (also as in text) लोके (for वेदा) T2 आश्चर्या. परमा वेदा — ^{b}) T2 देवाश् (for वेदाश्) K1 भारत (for नारद). — ^{c}) Ś1 लोकं (for लोकान्) T1. 2 4 G1 3 5 M ये स्म लोकान्धारयन्ति — ^{d}) M4 देवतास्तत्त्वदर्शिन.

66 ^{a}) K2 D1 सम्यग् (for सत्यम्) — ^{b}) K2 अथर्वणां (for °र्वणि) Ś1 परम् (for मतम्)

67 ^{a}) Ds2 विधिना , M3 देवेन (for वाक्येन) — ^{b}) Ś1 मोचितो , K1 3 Dn Ds3 D4 (marg) 5 T4 G2 5 नोदितो , K2 विजितो , D4 मोहितो (for चोदितो) — ^{c}) Ś1 -स्थानगां , Ñ1 -स्थापना ; M1 3 -स्थानतौ (for -स्थानिकां) — ^{d}) K1. 3. 4 Ñ1. 2 V B Dn Ds D1 2 4 5 T1. 4 G2 संस्थान- (for संक्रान्त-) D3 प्रतियात सुनिर्भयः , D6 मतिं संस्थाय विस्तरम् , Bom Poona eds G(ed) मतिसंस्थानविस्तरात्

68 ^{a}) K1 3 Ds1 D4 स्वयं (for सोऽहं) Some Mss स्वयंभू- (for °भु-) D1 स्वयंभूवचनं सोऽहं — ^{c}) K1 Ñ2 3 V B Dn D4 6 G2 वेदाश् (for चैनाश्). Ds2 अवोचं तांश्च चतुरो , D3 अवोचं चतुरो वेदान् ; T1. 2 4 G1 3–5 M अवोचमेतांश्चतुरो — M4 om 68^{c}–70^{b} — ^{d}) Ś1 मन्त्रप्रवचनेरितम् , K3 4 Dn1 Ds2 D1 2 5 T1 4 G3 5 M1–3 °नान्वितान् , T2 G1 4 °प्रवरचर्चितान्

69 M4 om 69 (cf v 1 68) — ^{b}) K Ñ2 V2. 3 B2 3 D T2 4 G1 2 4. 5 -भूषिता (for विश्रुताः) Ñ3 V1 B1 2 (marg) बह्वाश्चर्यविभूषिता , G3 नित्यमाश्चर्यमाश्रिताः. — ^{c}) K1. 2 V1 3 Ds D4 आधारश् (for °राश्) M1–3 भूतानाम् (for विप्राणाम्)

70 M4 om 70^{ab} (cf v 1 68) — ^{a}) D6 T2 [इ]ह परो , G2 भवनाद् , M1–3 [इ]ह वरो (for [इ]ह परं). — ^{b}) M1–3 आगत (for आहित.) K Ñ V B D (except D6) भवत्सु प्रश्नमागतम् (Ñ1 °तः).

71 ^{ab}) Ś1 प्रहृष्टास् (for प्रत्यूचुस्) T2 G1. 4 च (for ते) Ds2 तदा (for ततो) M1 transp वाक्यं and वेदा. M4 अभिसं- (for अभित) K4 वेदा मां समुपस्थिताः ; D6 वेदानामभितः स्थितम् (for ^{b}) — ^{c}) K2 आश्चर्यश्चैव धन्यश्च. — ^{d}) V B D1 2 5 6 G2 4 5 M4 यज्ञाश्चास्मत्परायणा ; D3 यज्ञाः सत्यप° , T1 4 G3 M1–3 यज्ञास्त्वस्मत्प° , T2 G1 यज्ञाश्चास्मत्परायणम्

72 ^{a}) K2 V1 2 यज्ञार्थं (for °र्थे) T1 2 4 G1 3–5 M विप्र (for सृष्टाः) — ^{b}) K3 4 Ñ2 3 V B Dn Ds D5 6 T4 G2 धात्रा ; G5 M स्थिता (for सृष्टा) K1 2 D2–4 धात्रा येनास्म नारद , D1 धात्रा येन स्म भारता ; T1. 2 G1. 3. 4

यज्ञार्थे तु वयं सृष्टाः सृष्टा येन स नारद ।
तदस्माकं परा यज्ञा न वयं स्ववशे स्थिताः ।
स्वयंभुवोऽपीह परा वेदानां च परा गतिः ॥ ७२
ततोऽहमब्रुवं यज्ञान्गृहस्थाग्निपुरस्कृतान् ॥ ७३
भो यज्ञाः परमं तेजो युष्मासु खलु लक्ष्यते ।
ब्रह्मणाभिहितं वाक्यं यन्मे वेदैरिहेरितम् ॥ ७४
आश्चर्यमेतल्लोकेषु भवद्भ्यो नाधिगम्यते ।
धन्याः खलु भवन्तो ये द्विजातीनां स्ववंशिनः ॥ ७५
तेन खल्वग्नयस्तृप्तिं युष्माभिर्यान्ति तर्पिताः ।
भागैश्च त्रिदशाः सर्वे मन्त्रैश्चैव महर्षयः ॥ ७६
अग्निष्टोमादयो यज्ञा मम वाक्यादनन्तरम् ।
प्रत्यूचुर्मां परं वाक्यं सर्वे यूपध्वजाः श्रिताः ॥ ७७
आश्चर्यशब्दो नास्मासु धन्यशब्दोऽपि वा मुने ।
आश्चर्यं परमं विष्णुः स ह्यस्माकं परा गतिः ॥ ७८
यदाज्यं वयमश्नीमो हुतमग्निषु पावनम् ।
तत्सर्वं पुण्डरीकाक्षो लोकमूर्तिः प्रयच्छति ॥ ७९
सोऽहं विष्णोर्गतिं प्रेप्सुरिह संपतितो भुवि ।
दृष्टश्चायं मया विष्णुर्भवद्भिरभिसंवृतः ॥ ८०
यन्मयाभिहितो ह्येष त्वमाश्चर्यं जनार्दन ।
धन्यश्चासीति भवतां मध्यस्थो ह्यत्र पार्थिवाः ॥ ८१
प्रत्युक्तोऽहमनेनाद्य वाक्यस्यास्य यदुत्तरम् ।
दक्षिणाभिः सहेत्येवं पर्याप्तं वचनं मम ॥ ८२ C 9476 B 2 110 83 P 2.110 83

स्थिता येन हि नारद — ^{c}) Ś1 परं यज्ञा; K2 परं ज्ञानं, Ñ1 2 T4 परो यज्ञो (for परा यज्ञा) — ^{d}) V1 स्वबले (for स्ववशे) — K2 om 72^{ef} — ^{e}) K1 3 4 Ñ3 V1 2 B2 Dn D8 D1–5 परं वेदा, Ñ2 B1 3 D6 G1 2 4 5 M4 परा वेदा, G3 M1–3 इह वरा (for इह परा) — ^{f}) B2 3 परं क्रतु; D6 T4 पर· क्रतु (for परा गति·) K1 3 4 Ñ2 V B1 Dn D8 D1, 3–5 G2 वेदानां तु परं (D3 °र) क्रतुः, D2 तेषां यज्ञा· परं गता; T2 G1 4 5 M4 वेदानां परम (G5 °मं) क्रतु, Bom Poona eds G(ed) वेदानां क्रतव· परा.·

73 ^{a}) Ñ1 यज्ञं (for यज्ञान्) — ^{b}) K3 गृहस्थानां, K4 °स्थान्सु-, D1 5 °भि-, T1 बृहद्वाग्नि (for गृहस्थाग्नि)

74 ^{a}) Ñ2 भो भो यज्ञा· परं तेजो — ^{b}) D3 युष्माकं (for °सु) K4 D2 4 दृश्यते, G2 यक्ष्यते, G5 M3 व° (for ल°). — ^{d}) K Ñ V B D T2 4 G1 2 4 5 M4 यच्च वेदैरुदीरि(K2 4 °दाहृ)तम्

75 ^{a}) T1 2 G1, 3–5 M4 एषु, T4 अन्यल् (for एतल्) K Ñ V B Dn D8 D1 3–6 आश्चर्यमन्यल्लोकेऽस्मिन्; D2 °र्यं मर्त्यलोकेऽस्मिन्; G2 °र्यमन्यलोकेभ्यो — ^{d}) K1 3 स्वशंसिन·, V सुवंशिनः, D4 T1 2 G1 4 स्ववंशिनाम्, D5 6 °शजा, T4 °शदा·, G2 स्वययजाः, G3 स्वयं वशे, G5 M सुवंशिनाम् (for स्ववंशिन). D8 द्विजादीनां हुताशिनः.

76 ^{a}) K3 4 D5 तेऽपि (for तेन) D4 [ऋ]षयस् (for [अ]ग्नयस्). — ^{b}) D2 3 भवद्भ्यो, T2 G4 युष्माकं (for °भिर्). — V3 om (hapl.) 76^{c}–77^{a} — ^{d}) Ś1 द्विजातयः (for महर्षयः)

77 V3 om 77 (cf v l 76) — ^{c}) N (except Ś1, V3 om.) T4 G2 5 ततो (for परं) — ^{d}) D3 सह- (for सर्वे) T4 M4 सर्वे यूपध्वजाश्रिताः

78 ^{a}) D3 नाश्चर्यं नारदास्मासु — ^{b}) Ñ2 गिरा, D2, 3 ऽस्ति वा (for ऽपि वा) Ś1 धृत·, T1 2 G M पुन (for मुने) — ^{c}) T4 अपरं (for परम) — ^{d}) T2 G4 परं विभु· (for परा गति.)

79 ^{a}) D2 हव्यं, D3 वस्तु (for आज्यं) Ñ1 च यद्; D6 वरम् (for वयम्) Ś1 अश्नामो (for अश्नीमो) — ^{b}) Ś1 G3 पावकम् (for °नम्) — ^{c}) D8 तत्सर्वं पुण्डरीकाख्यो· — ^{d}) G5 प्रतीच्छति (for प्रय°) — After 79, Dn ins

1122* सोऽपि धन्यो महाबाहुर्दक्षिणासहित· क्रतु· ।
यद्रूपं पुण्डरीकाक्षो दक्षिणाप्रियया सह ॥

80 ^{a}) V1 B1 3 Dn3 D2 3 विष्णु- (for विष्णोर्). — ^{c}) K3 D2 पृष्टश् (for दृष्टश्) Ś1 T2 G1 4 5 M4 महा- (for मया) K4 Ñ V B Dn D8 D1–3 5, 6 T4 G2 ·कृष्णो (for विष्णुर्) — ^{d}) K Ñ1 2 V B D G2 M1 इह; T1 अपि (for अभि-) M4 महद्भिः संशितव्रतैः

81 ^{a}) T4 [अ]भिहित (for °तो) T1 2 G2 M1, 3 यन्मयाभिहितं ह्येतत्. — ^{b}) Ś1 अस्माकं, T1 2 G3 4 आश्चर्यो (for °र्यं) K2 3 D1–4 6 T4 जनार्दन (for °र्दन) M4 वाक्यं श्रुत्वा जनार्दन — ^{c}) D3 मध्यस्थो (for भवतां) Ś1 धन्यश्चासीह भवता — ^{d}) D3 मध्यस्थो यत्र पार्थिवः, T1 4 G3 M1–3 प्रत्यक्षं यत्र पार्थिवा·

82 ^{a}) K1 V1 B1 D4 [अ]त्र, T1 2 G1 4 5 M [अ]पि (for [अ]द्य) — D1 reads 82^{c}–83^{b} after 84 After 82^{c}, D4 (marg) reads 83^{d} repeating it in its proper place. T1 G3 om (hapl) 82^{d}–83^{c}. — ^{d}) K2 T4 M1–3 च वचो, Ñ1 तद्वचो (for वचनं).

यज्ञानां हि गतिर्विष्णुः सर्वेषां सहदक्षिणः ।
दक्षिणाभिः सहेत्येवं प्रश्नो मम समास्रवान् ॥ ८३
कूर्मेणाभिहितं पूर्वं पारंपर्यादिहागतम् ।
सदक्षिणेऽस्मिन्पुरुषे तद्वाक्यं पर्ययागतम् ॥ ८४
यन्मां भवन्तः पृच्छन्ति वाक्यस्यास्य विनिर्णयम् ।
तदेतत्सर्वमाख्यातं साधयामि यथागतम् ॥ ८५
नारदे तु गते स्वर्गं सर्वे ते पृथिवीक्षितः ।
विस्मिताः स्वानि राष्ट्राणि जग्मुः सबलवाहनाः ॥ ८६
जनार्दनोऽपि सहितो यदुभिः पावकोपमैः ।
स्वमेव भवनं वीरो विवेश यदुपुंगवः ॥ ८७

इति श्रीहरिवंशे शततमोऽध्यायः ॥ १०० ॥

---

83 For the sequence in D_1, cf v l 82 T_1 G_3 om 83^{abc} (cf. v l 82) — ^{a}) $Ś_1$ यज्ञस्य हि, K_2 स यज्ञानां (for यज्ञानां हि) — ^{b}) K_1 V B D_{1-6} T_2 $G_{1\ 4,\ 5}$ M_4 च स , K_2 $Ñ_2$ हि स- (for सह-) — D_5 om 83^c–84^d — ^{c}) K_3 सदा (for सह) — D_4 (marg) reads 83^d for the first time after 82^c — ^{d}) $Ś_1$ समापित:, D_3 यथार्थवत्, T_4 M_{1-3} समागत (for °स्रवान्) T_1 प्रश्नो मां समुपागतः; G_3 प्रश्नो नान्यमुपागत.

84 D_5 om 84 (cf v l 83) — ^{a}) $Ś_1$ दक्षेण, B_1 ब्रह्मणा (for कूर्मेण) $Ñ_1$ वाक्यं, D_3 सर्वं (for पूर्वं) — ^{b}) $Ś_1$ G_4 इहागतः; G_3 उपागतम् (for इहा°) — ^{c}) $T_{1\ 2}$ $G_{1\ 3-5}$ M_4 गोविन्दे (for पुरुषे) — ^{d}) K Ñ V B D (D_5 om) T_4 G_2 तद्वाक्यं प्रतिपादितम्; $T_{1\ 2}$ $G_{1\ 3-5}$ M_4 °क्यमवाधिगतम् — After 84, D_1 reads 82^c–83^b

85 ^{a}) M_1 यस्माद् (for यन्मां) — ^{b}) $D_{2\ 3}$ विनिश्चयम्, D_5 च निर्णयम् (for विनि°) — ^{d}) $K_{1\ 2\ 4}$ $Ñ_{2\ 3}$ V B Dn_2 Ds $D_{1-4\ 6}$ साधु यामि (for साधयामि) — After 85, $T_{1\ 2}$ $G_{1,\ 3-5}$ M ins:

1123* नारायणपरा वेदा नारायणपरा मखा ।
नारायणपरं ज्ञानं नारायणपर तप· ॥
न च नारायणादन्यत्त्रिषु लोकेषु विद्यते ।
नारायणात्मकमिद जगत्स्थावरजङ्गमम् ॥
इय हि वेदार्थगति सनातनी
नृपा यदि श्रोष्यथ मद्वच परम् ।
इदं तु सत्यं सकलं नृपोत्तमा
इत्येवमुक्त्वा स दिवं जगाम ह ॥

[M_{1-3} om lines 1–4 — (L 4) M_4 सर्व (for इद). —(L 8) T_2 $G_{1\ 4\ 5}$ M_3 om ह]

86 G_4 om 86^{ab} — ^{b}) T_1 सर्वेश , T_2 M_{1-3} सर्वे च (for सर्वे ते) D_3 Bom Poona eds G(ed) सर्वे ते पृथिवीभुजः (D_3 °श्वराः) — $T_{1\ 2\ 4}$ $G_{1,\ 3,\ 5}$ M ins after 86^{ab} G_4 cont after 1123*

1124* विष्णु जिष्णुं हृषीकेशं गोविन्द गरुडध्वजम् ।
परात्परतरं ब्रह्म नारायणमनामयम् ॥
सर्ववेदान्तवेद्यं च नमस्कृत्य गुरुं हरिम् ।
धन्योऽयं नारदो यस्माद्दृष्ट साक्षाद्धरिः स्वयम् ॥
धन्या वयं जगन्नाथं नारदेन विबोधिताः ।
सर्वे प्रीता जगन्नाथं तुष्टुवुः पुरुषोत्तमम् ॥
को नाम विष्णुरित्येवमन्ये मूढा नराधमाः ।
धन्याः सर्वे वासुदेव इति तत्त्वार्थतत्परम् ॥
इति तत्त्वेन विज्ञाय नृपा नारायणं परम् ।
ततः प्रदक्षिण कृत्वा नमस्कृत्य पुनः पुनः ।

[T_4 M_{1-3} om lines 1^b–3^a — (L 3) M_3 विभु (for गुरु) — (L 4) T_2 $G_{4\ 5}$ ऽह (for ऽय) M_{1-3} सदा (for स्वयम्) — (L 5) M_4 सर्वे (for धन्या). — T_4 M_2 om (hapl) lines 5^b–8^a T_2 $G_{4\ 5}$ विबोधितम् (for °ताः) —(L 6) $M_{1\ 3}$ केचिद्भीता (for सर्वे प्रीता) —(L 8) $M_{1,\ 3}$ अन्ये सर्व जगन्नाथ (for ^{a}) T_1 G_3 $M_{1\ 3}$ -तत्परा (for °रम्). — T_4 M_{1-3} om lines 9–10. — (L. 9) $G_{1,\ 5}$ विज्ञेय (for विज्ञाय)]

— ^{c}) G_3 स्वस्व- (for स्वानि).

87 ^{a}) $Ś_1$ सहितैर् (for °तो). — ^{b}) V_2 यादवैः (for यदुभिः). K_2 यादवैस्तैर्महीक्षितै ; V_3 यदुभिः पावकोत्तमैः; $D_{2\ 4}$ °भि पावकोपम — ^{d}) Bom. Poona eds. G(ed.) -नन्दनः (for -पुंगवः)

Colophon — *Mention of the Epic* Ds_2 — *Mention of Khila* $Ś_1$ $K_{1,\ 2\ 4}$ $Ñ_3$ V $B_{1\ 3}$ Dn_2 Ds_1 $D_{1,\ 3\ 5}$. — *Adhy name* K Ñ V B Dn Ds $D_{1,\ 2,\ 4-6}$ धन्योपाख्यानम्, D_3 धन्याश्चर्योपाख्यानम्; T_1 G_3 आर्याख्याने परमार्थदर्शनम्; T_2 $G_{1\ 4}$ M_4 आश्चर्योपाख्यानम्, T_4 M_{1-3} आश्चर्यकथनम् — *Adhy no* (figures, words or both) K_3 D_4 164, $Ñ_3$ $V_{1\ 2}$ 168, V_3 Dn Ds_2 166; D_1 160, D_3 114, T_1 $G_{3\ 4}$ 178, T_2 G_1 180, T_4 G_2 174, G_5 169, M_{1-3} 143, M_4 179 — *Śloka no*. Dn_1 D_3 88, Ds_2 90, D_4 89

१०१

जनमेजय उवाच ।
पुनरेव महाबाहो कृष्णस्य जगतीपतेः ।
माहात्म्यं श्रोतुमिच्छामि परमं द्विजसत्तम ॥ १
न हि मे तृप्तिरस्तीह शृण्वतस्तस्य धीमतः ।
कर्मणामनुसंधानं पुराणस्य महात्मनः ॥ २
वैशंपायन उवाच ।
नान्तः शक्यं प्रभावस्य वक्तुं वर्षशतैरपि ।
गोविन्दस्य महाराज श्रूयतामिदमुत्तमम् ॥ ३
शरतल्पे शयानेन भीष्मेण परिचोदितः ।
गाण्डीवधन्वा बीभत्सुर्माहात्म्यं केशवस्य यत् ॥ ४
राज्ञां मध्ये महाराज ज्येष्ठं भ्रातरमब्रवीत् ।
युधिष्ठिरं जितामित्रमिति तच्छृणु कौरव ॥ ५
अर्जुन उवाच ।
पुराहं द्वारकां यातः संबन्धीनवलोककः ।
न्यवसं पूजितस्तत्र भोजवृष्ण्यन्धकोत्तमैः ॥ ६
ततः कदाचिद्धर्मात्मा दीक्षितो मधुसूदनः ।
एकाहेन महाबाहुः शास्त्रदृष्टेन कर्मणा ॥ ७
ततो दीक्षितमासीनमभिगम्य द्विजोत्तमः ।
कृष्णं विज्ञापयामास परित्राहीति चाब्रवीत् ॥ ८
ब्राह्मण उवाच ।
रक्षाधिकारो भवतः परिरक्षस्व मां विभो ।
चतुर्थांशं हि धर्मस्य रक्षिता लभते फलम् ॥ ९
वासुदेव उवाच ।
न भेतव्यं द्विजश्रेष्ठ रक्षामि त्वां कुतोऽनघ ।　C 9691 B 2. 111. 10 P 2 111. 10

101

☞ This adhy is missing in T_3 (cf v 1 99 21).

1 K_3 श्रीभगवानुवाच (for जनमेजय उ॰) — After the ref, S (T_3 missing) ins ·

1125* कृतार्थाः सर्वथा विप्र नारायणसमाश्रयात् ।
जाता हि वयमद्यैव तत्कथाश्रवणाद्द्विज ॥

[(L 1) $T_{2\ 4}$ $G_{1,4\ 5}$ M_4 -समाश्रया (for ॰श्रयात्). — After line 1, T_1 ins

1125A* इत्युक्त स स्मित कृत्वा प्रणम्य मुनिपुंगवम् ।

— (L 2) T_1 $G_{2\ 3}$ M_{1-3} यत्कथा- (for तत्कथा-)]
— ^{a}) K Ñ V B Dn D_{1-6} T_4 $G_{2\ 4}$ भूय (for पुनर्). $M_{1,2}$ महाबाहोः (for ॰बाहो) D_3 भूय एव महाबाहो — ^{b}) T_4 G_4 जगतां (for ॰ती-) — M_4 om (hapl) 1^{c}–2^{a} — ^{d}) D_3 परमं च द्विजर्षभ

2 M_4 om 2 (cf v 1 1) — ^{b}) $T_{1\ 2}$ $G_{1\ 3-5}$ श्रवणे (for शृण्वतस्). — ^{c}) $K_{1\ 2}$ V_1 $B_{2\ 3}$ $D_{4\ 6}$ T_4 -संतानं; $T_{1\ 2}$ $G_{1\ 3\ 4}$ -संधाने (for ॰न). D_3 कर्मणा मनसा वाचा; G_2 ॰णामस्य संधाने — ^{d}) $T_{1\ 2,4}$ $G_{1\ 3-5}$ M_{1-3} जगत्पतेः (for महात्मनः)

3 ^{a}) $K_{3,4}$ $Ñ_{1\ 2}$ V B Dn $D_{2,6}$ नान्तः शक्यः, T_1 नाहं शक्तः; $T_{2\ 4}$ $G_{1-3\ 5}$ नान्तं शक्यं; M_4 नान्तं वक्तु (for नान्तः शक्यं) $K_{1\ 2}$ $D_{1\ 4\ 5}$ नान्त शक्य प्रभावानां. — ^{b}) M_4 शक्यं (for वक्तुं) — Before 3^{cd}, M_4 ins वैशंपायनः. — ^{c}) $Ñ_3$ (marg) $V_{1\ 2}$ महाभाग; M_4 ॰बाहो (for ॰राज). — ^{d}) K_{2-4} $Ñ_{2\ 3}$ V B D G_2 M_3 अद्भुतम् (for उत्तमम्).

4 ^{a}) $K_{3\ 4}$ D_3 $D_{1\ 3\ 5}$ -तल्प- (for -तल्पे) — ^{b}) D_3 प्रति- (for परि-) $K_{1\ 2}$ D_4 -नोदित.; D_{S1} G_3 -चोदितम् (for ॰त)

5 ^{a}) $Ś_1$ महाबाहुर् (for ॰राज). $T_{1,2,4}$ $G_{1,3-5}$ M मध्ये राज्ञां महाबाहो (T_4 M_{1-3} ॰भाग) — ^{d}) $T_{1,2,4}$ $G_{1,3-5}$ M इति कौरव तच्छृणु

6 ^{a}) G_2 हि (for [अ]हं) — ^{b}) $Ñ_2$ अवलोकन (for ॰कः) K_4 शार्ङ्गधन्वावलोकक. — ^{c}) K_1 अवश्यं; K_2 अथ सं-; K_3 निवसन्, D_4 अहं सं- (for न्यवसं)

7 ^{c}) V_3 M_{1-3} महाराज, $T_{1,2,4}$ $G_{1,3-5}$ M_4 ॰तेजा, (for ॰बाहु.)

8 ^{a}) D_3 अप्येनम् (for आसीनम्) — ^{b}) M_4 द्विजस्तदा (for द्विजोत्तमः). — ^{d}) $Ś_1$ V_3 T_2 G_5 त्राहि त्राहि; G_3 त्राहि माम् (for परित्राहि)

9 $M_{1\ 3}$ om the ref After the ref, G_2 reads 11^{ab}, repeating it in its proper place G_2 om (hapl.) 9^{ab} — ^{b}) T_1 G_3 -त्रायस्व (for -रक्षस्व) G_1 प्रभो (for विभो) — ^{c}) D_4 चतुर्थं स (for ॰र्थांशं). G_1 धर्मात्मा (for

ब्रूहि तत्त्वेन भद्रं ते यद्यपि स्यात्सुदुष्करम् ॥ १०

ब्राह्मण उवाच ।

जातो जातो महाबाहो पुत्रो मे ह्रियते विभो ।
त्रयो हृताश्चतुर्थं त्वं कृष्ण रक्षितुमर्हसि ॥ ११
ब्राह्मण्याः सूतिकालोऽद्य तत्र रक्षा विधीयताम् ।
यथा ध्रियेदपत्यं मे तथा कुरु जनार्दन ॥ १२

अर्जुन उवाच ।

ततो मामाह गोविन्दो दीक्षितोऽस्मि क्रताविति ।
रक्षा च ब्राह्मणे कार्या सर्वावस्थागतैरपि ॥ १३
श्रुत्वाहमेवं कृष्णस्य ततोऽवोचं नरोत्तम ।
मां नियोजय गोविन्द रक्षिष्यामि द्विजं भयात् ॥ १४
इत्युक्तः स स्मितं कृत्वा मामुवाच जनार्दनः ।
शक्ष्यसीत्येवमुक्तस्तु व्रीडितोऽस्मि नराधिप ॥ १५
ततो मां व्रीडितं ज्ञात्वा पुनराह जनार्दनः ।
गम्यतां कौरवश्रेष्ठ शक्यते यदि रक्षितुम् ॥ १६
त्वत्पुरोगाश्च गच्छन्तु वृष्ण्यन्धकमहारथाः ।
ऋते रामं महाबाहुं प्रद्युम्नं च महाबलम् ॥ १७
ततोऽहं वृष्णिसैन्येन महता परिवारितः ।
तमग्रतो द्विजं कृत्वा प्रयातः सह सेनया ॥ १८

इति श्रीहरिवंशे एकोत्तरशततमोऽध्यायः ॥ १०१ ॥

धर्मस्य) — d) G2 लभते रक्षिता फलम्

10 Ś1 K2 भगवान् (for वासुदेव) — a) T1 2 4 G1 3–5 M रक्षामि त्वां (for न भेतव्य) D6 सुर- (for द्विज-). — b) K Ñ2 3 V B Dn Ds D1 2 4–6 G2 M4 भयम् (for ऽनघ) D3 यद्यत्स्यादतिदुष्करम् ; T1 2. 4 G1. 3–5 M1–3 न भेतव्यं कुतो भयम्

11 M4 om the ref G2 reads 11^{ab} for the first time after 9^{ab} — a) T1 2 4 G1. 3–5 M जगन्नाथ (for महाबाहो) — b) T1 म्रियते (for ह्रि°) Ś1 प्रभो, K1 3 4 Ñ V B D G2 (both times) ऽनघ (for विभो) K2 पुत्रो मे म्रियतेऽनघ — c) Ds2 हताश् (for हृ°) K2 त्रयो गताश्चतुर्थं तु

12 a) D3 ब्राह्मण्या· प्रसूतिकालोऽस्ति (hypermetric). — G2 om 12^{b} — b) M4 कर्तुं (for तत्र) — After 12^{ab}, G3 reads 15, repeating it in its proper place K3 G3 om 12^{cd} — c) K3 4 यथा ह्रियेदपत्य न, T1 2. 4 G1 4 5 M न ह्रियेत यथापत्यं — d) D3 तत्त्वं (for तथा)

13 Some Mss om the ref — a) T1 2 G1 3–5 M तम् (for माम्) — b) K Ñ V B D6 T1 4 G2 M4 ऽहं (for ऽस्मि) Ś1 K2 V3 B3 D6 M1 3 इह (for इति) — c) V3 मे (for च). — d) Dn G4 सर्वावस्थां (for °स्था-)

14 b) T1 G3 वचो (for ततो) G5 नराधिप (for नरोत्तम) K Ñ2 V2 3 B1 (marg) 2 3 Dn Ds D1 2 4–6 T4 G2 M4 वचोऽवोच नराधिप (M4 नृपोत्तम); Ñ1 3 V1 B1 ततो वचनमब्रुवम्, D3 प्रभोर्वाक्यं नराधिप — d) Ñ1 B1 रक्षिष्येऽहं (for °ष्यामि),

15 G3 reads 15 for the first time after 12^{ab}. — a) V1 प्रत्युक्त , D3 इत्युक्त्वा (for °क्त) — c) K1 G3 (both times) M3 शक्यासि , K4 B3 Ds D4 T1 रक्षसि , V3 शक्यम् (for शक्ष्यसि) D3 शक्यं ते ह्येवमुक्ते तु . — d) M3 जनाधिप (for नरा°).

16 a) Ś1 K2 V2 दृष्ट्वा , K3 4 Ñ1 D1. 5 T1 मत्वा ; D3 कृत्वा (for ज्ञात्वा) — d) K1 D3 T1 G3 M1–3 शक्यं हि (K1 D3 ते), V1 शक्तोऽसि ; V3 B1 शक्नोषि , D6 शक्यसे (for °ते). K2 रक्षितुं यदि शक्यसे

17 a) Ñ1 D2 (*sup lin* as in text). 4 T1 G3 रक्षन्तु (for गच्छन्तु) — c) D2 3 महाबाहो (for °बाहुं). — d) K3 Dn Ds T2 G1 3–5 M महारथम्, K3 4 °रथा ; T4 नराधिपम् (for महाबलम्)

18 a) K3 तदा (for ततो) — K3 4 om 18^{c}–102. 2^{d}. — d) Ś1 K1 Ñ2 3 V1 Dn D2–4 G2 -सैनिकः , K2 Ñ1 V2 3 B Ds D6 सैनिकै (for सेनया)

COLOPHON om in K3 4 Ñ1 T3 missing — *Mention of the Epic* Ds2 — *Mention of Khila* K1 2 V B Dn Ds D1. — *Adhy name* N (K3 4 Ñ1 om) T1 2 G1 4 M4 वासुदेवमाहात्म्यम् , G3 वासुदेवमाहात्म्ये ब्राह्मणपुत्रहरणम् , M1–3 पुत्रानयनम् — *Adhy no* (figures, words or both) Ñ3 V2 169 , V3 Dn Ds2 167 , D1 161 ; D3 G2 175 , D4 165 , T1 G3 4 179 , T2 G1 181 , T4 148 ; G5 M4 180 , M1–3 144 — *Śloka no.* Dn Ds2 D3 4 18.

१०२

अर्जुन उवाच ।
सुमुहूर्तेन तु वयं तं ग्रामं प्राप्य भारत ।
विश्रान्तवाहनाः सर्वे वासायोपगतास्तदा ॥ १
ततो ग्रामस्य मध्येऽहं निविष्टः कुरुनन्दनः ।
समन्ताद्वृष्णिसैन्येन परिक्षिप्य जनव्रजम् ॥ २
ततः शकुनयो दीप्ता मृगाश्च क्रूरभाषिणः ।
दीप्तायां दिशि वाशन्तो भयमावेदयन्ति मे ॥ ३
संध्यारागो जपावर्णो भानुमांश्चैव निष्प्रभः ।
पपात महती चोल्का पृथिवी चाप्यकम्पत ॥ ४
तान्समीक्ष्य महोत्पातान्दारुणाँल्लोमहर्षणान् ।
योगमाज्ञापयं तत्र जनस्योत्सुकचेतसः ॥ ५
युयुधानपुरोगाश्च वृष्ण्यन्धकमहारथाः ।
सर्वे युक्तरथाः सज्जाः स्वयं चाहं तथाभवम् ॥ ६
गतेऽर्धरात्रसमये ब्राह्मणो भयविक्लवः ।
उपागम्य भयादस्मानिदं वचनमब्रवीत् ॥ ७
कालोऽयं समनुप्राप्तो ब्राह्मण्याः प्रसवस्य मे ।
यत्ता भवन्तस्तिष्ठन्तु न भवेद्वञ्चना यथा ॥ ८
मुहूर्तादिव चाश्रौषं कृपणं रुदितस्वनम् ।
तस्य विप्रस्य भवने ह्रियते ह्रियते इति ॥ ९
अथाकाशे पुनर्वाचमश्रौषं बालकस्य वै ।
हाहेति ह्रियमाणस्य न च पश्यामि राक्षसम् ॥ १०
ततोऽस्माभिस्तदा तात शरवर्षैः समन्ततः ।
विष्टम्भिता दिशः सर्वा हृत एव स बालकः ॥ ११
ब्राह्मणोऽऽर्तस्वरं कृत्वा हृते तस्मिन्कुमारके । C 9711 B 2 112 12 P 2 112 12

102

☞ This adhy is missing in T3 (cf v l 99 21)

1 K3 4 om 1–2 (cf v l 101 18) — a) K1 2 Ñ2. 3 V1 3 B Dn Ds D2 4 6 T2 4 G1 2 4 5 M4 मुहूर्तेन वयं ग्रा(D2 च तद्ग्रा)म , Ñ1 D1 5 तस्मिन्मुहूर्ते तु वयं , V2 D3 मुहूर्ते तु (D3 °र्तेन) वयं प्राप्य — b) Ñ1 D1 5 तद् (for त) Ś1 ते ग्रामं प्रत्युपस्थिता , K1 2 Ñ2 3 V1 3 B Dn Ds D2 6 T1 2 4 G1 2 4 5 M4 तं ग्रा(K2 D2 T4 सग्रा)प्य भरतर्षभ , V2 D3 4 त ग्राम (D3 ग्रामं तं, D4 तं प्राप्ता) भरतर्षभ — d) K1. 2 Ñ2 3 V2. 3 B2 3 Dn2 Ds D2–4 6 T2 G1 2 4. 5 M4 निवासायोपसंस्थिता. (K1 °तस्थिरे), Dn1 निवासायागतास्तदा

2 K3 4 om 2 (cf v l. 1) Ñ1 damaged for 2ab — b) Dn प्रविष्टः (for नि°) — c) D3 3 वृष्णिसैन्येन महता — d) K1 2 Ñ V B D1 4–6 T1 2 G M4 महता परिवारित , D2 3 समन्तात्परिवारित

3 a) V1 B1 दान्ता (for दीप्ता) — b) D4 -पक्षिण· (for -भाषिण·) — c) K1 V2 भाषन्तो (for वाशन्तो) G2 दीप्ताश्च ककुभः सर्वा — d) Ś1 ये (for मे).

4 d) K4 T1 2 G1. 3–5 M1–3 ऽप्यकम्पत (for [अ]प्य°)

5 a) V1 तन्मे वीक्ष्य , D1 तत्समीक्ष्य (for तान्स°). D3 समैक्ष महतोत्पातान् —K2 om 5b–6a — c) D3 योगमाज्ञाय यावन्तस्, D6 °पयांचक्रे — d) Ś1 -मानसः , Ñ1 -दर्शिनः (for चेतस) D3 ते जना युद्धचेतस

6 K2 om 6a (cf v l 5) — b) M4 -पुरोगमा (for महारथा) — c) D6 सद्यः (for सज्जा.) K3 सज्जाश्चासंस्तदा सर्वे

7 a) M3 ततो (for गते) K4 गते हि चार्धरात्रे तु — b) Ś1 विक्लवम् , D5 -विह्वल. (for -विक्लवः) — c) Ñ2 अवगम्य , D2 3 उप° , T1 2 G3 4 M अभि° (for उपा°)

8 Before 8, M1–3 ins ब्राह्मण — c) Ñ1 3 V1 B1 सज्जा , G3 युक्ता (for यत्ता) — d) K1 वेदना , Ñ2. 3 V1 B2 G1–3 M1 2 4 वञ्चनं (for °ना)

9 c) S1 Ñ1 3 B1 सदने (for भवने) — d) Ś1 त्विति , K1 – 4 Ñ1 2 V2 3 B1. 2 D T1 G2 [इ]ति च , K2 सुतः (for इति)

10 a) Ñ1 3 V1 B1 आकाशे च (for अथाकाशे) G2 वाक्यम् (for वाचम्) D3 अश्रौष वाक्यमाकाशे — c) K2 V3 B1 2 D6 हुंहेति , Ñ2 त्राहीति , Ñ3 V1 2 Dn Ds D2 T1 G3 ऊंहेति , D1. 5 हंहेति (for हाहेति) — d) D2. 3 बालकम् (for राक्षसम्).

11 a) Ñ2 V2. 3 तत्र (for तात)

12 a) K2 ऽथ , K4 ऽऽर्ति- ; M4 ऽपि (for ऽऽर्त-). T1. 2

वाचः स परुषास्तीव्राः श्रावयामास मां तदा ॥ १२
वृष्णयो हतसंकल्पास्तथाहं नष्टचेतनः ।
मामेव हि विशेषेण ब्राह्मणः पर्यभाषत ॥ १३
रक्षिष्यामीति चोक्तं ते न च रक्षसि मे सुतम् ।
शृणु वाक्यमिदं शेषं यत्त्वमर्हसि दुर्मते ॥ १४
वृथा त्वं स्पर्धसे नित्यं कृष्णेनामितबुद्धिना ।
यदि स्यादिह गोविन्दो नैतदत्याहितं भवेत् ॥ १५
यथा चतुर्थं धर्मस्य रक्षिता लभते फलम् ।
पापस्यापि तथा मूढ भागं प्राप्नोत्यरक्षिता ॥ १६
रक्षिष्यामीति चोक्तं ते न च शक्नोषि रक्षितुम् ।
मोघं गाण्डीवमेतत्ते मोघं वीर्यं यशश्च ते ॥ १७
अकिंचिदुक्त्वा तं विप्रं ततोऽहं प्रस्थितस्तदा ।
सह वृष्ण्यन्धकसुतैर्यत्र कृष्णो महाद्युतिः ॥ १८
ततो द्वारवतीं गत्वा दृष्ट्वा मधुनिघातिनम् ।
व्रीडितः शोकसंतप्तो गोविन्देनोपलक्षितः ॥ १९
स तु मां व्रीडितं दृष्ट्वा समाश्वस्य च माधवः ।

G1 3–5 ब्राह्मणो विस्वरं श्रुत्वा —^{c}) Dn D3 D1–3 5 6 T1 2 4 G1 3 5 M तीक्ष्णा. (for तीव्रा). —^{d}) D2 सदा, M1–3 तत (for तदा)

13 ^{a}) T4 गत- (for हत) —^{b}) Ś1 तं च, D4 M2 ततो; T2 तदा (for तथा). K2 क्लिष्ट- (for नष्ट-) —^{d}) N (except Ś1) T2. 4 G1 2 4 5 M4 ब्राह्मण प्रत्यभाषत

14 ^{a}) K9 [उ]क्त्वा मां (for [उ]क्तं ते) —^{b}) K Ñ2 3 V B2 3 D G2 न च रक्षि(B3 तत्कृ)तवानसि — M4 om 14^{cd} —^{c}) K3 4 V2 3 B1 Dn D1 3. 5 (*inf lin* as in text) श्रेयो (for शेषं)

15 ^{a}) K2 यथा त्वं मन्यसे नित्यं —^{b}) K4 वृष्णिना (for कृष्णेन) T1. 2 4 G1 3–5 M -तेजसा (for बुद्धिना). —^{c}) D2 अत्र (for इह) —^{d}) D2 3 औत्पातिकं, T1 2 G3–5 M आत्ययिकं (for अत्याहितं)

16 ^{c}) K4 मूढो (for मूढ) —^{d}) D3 फलं (for भागं). G5 प्राप्स्यति (for प्राप्नोति)

17 ^{a}) Ś1 रक्षितास्मि, V3 T2 4 G3 M4 करिष्यामि (for रक्षि°) K1 D4 [उ]क्तेन, D3 [उ]क्त्वा त्वं (for [उ]क्तं ते) —^{b}) K3 Ñ3 (marg) V1 2 B3 Dn D1 2 T4 M4 शक्तोऽसि (for शक्नोषि). — After 17, S (except G2, T3 missing) ins

11-6* अर्जुनोऽस्मीति या बुद्धिः सा वृथा सत्यमित्युत ।

18 ^{a}) D4 T1 2 4 G M2–4 न किंचिद् (for अकिं°) D3 किंचिन्नोवाच तं विप्र —^{c}) T2 G1 3–5 M1–3 वृतो (for सह) K2 D2 -बलैर् (for -सुतैर्) —^{d}) D4 महामुनि, T1 G3 °मति (for °द्युतिः)

19 ^{a}) Ñ2 D3 ऽहं द्वारकां (for द्वारवतीं) —^{b}) K2 गत्वा, D2 कृष्णं (for दृष्ट्वा) D4 6 च मधु- (for मधुनि-). Ś1 Ñ3 V1 B1 D3 दृष्ट्वा मधुनिषू(V1 B1 °सू)दनम् —^{c}) G1 व्रीडितं शोकसंतप्तं —^{d}) V1 B1 T1 G3 5 M4 [अ]भि- (for [उ]प-).

20 After 20^{a}, K1 (marg *sec m.*) D1. 2 6 Bom. Poona eds G(ed) ins

1127* विनिन्दन्कृष्णसंनिधौ ।
मौढ्यं पश्यत मे योऽहं श्रद्दधे क्लीबकत्थनम् ॥
न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः ।
यस्य शक्ताः परित्रातुं कोऽन्यस्तदवितेश्वरः ॥
धिगर्जुनं वृथावादं धिगात्मश्लाघिनो धनुः ।
दैवोपसृष्टो यो मौर्ख्यादागच्छति च दुर्मतिः ॥
एवं शपति विप्रर्षौ विद्यामास्थाय वैष्णवीम् ।
ययौ संयमिनीं वीरो यत्रास्ते भगवान्यमः ॥
विप्रापत्यमचक्षाणस्तत ऐन्द्रीमगात्पुरीम् ।
आग्नेयीं नैर्ऋतीं सौम्यां वायव्यां वारुणीं तथा ॥
रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ॥
ततोऽलब्ध्वा द्विजसुतमनिस्तीर्णप्रतिश्रवः ।
अग्निं विविक्षुः कृष्णेन प्रद्युम्नेन निषेधितः ॥
दर्शये द्विजसूनुं ते मावज्ञात्मानमात्मना ।
कीर्तिं त एते विपुलां स्थापयिष्यन्ति मानवाः ॥
इति संभाष्य मां स्नेहात्

[= (var) Bhāgavata P. 10. 89. 40^{b}–47^{a} —(L. 4) D6 (*sup lin*) Bom. Poona eds. G(ed) यत्र (for यस्य) D2 Bom Poona eds. G(ed.) कोऽन्यस्तद(D2 °म)-वनेश्वरः (for ^{b}) —(L. 5) Bom Poona eds G(ed.) -नादं (for -वादं). —(L 7) D1 पश्यति, D2 वदति (for शपति). —(L 8) K1 D2 ययौ संयमनीमा(D2 °नीं चा)शु (for ^{a}). —(L 9) D2 अदृष्ट्वैव (for अचक्षाणस्). —(L. 10) Bom Poona ed G(ed) उदीचीं (for वायव्यां) —(L. 11) K1 धिष्ण्यानन्यान् (for °न्यन्यानि) —(L 12) D2. 6 -प्रतिश्रुत (for °श्रवः) D1 अनिस्तीर्य प्रतिश्रुत (for ^{b}). —(L 13) K1 D1 2 प्रत्युक्तः प्रतिषेधितः (for ^{b}) —(L. 14) D2 -पुत्र (for -सूनु) —(L 15) D1 2 5 एते तैः कीर्तिविपु(D2 °मतु)ला (for ^{a}). K1 D1. 6 मानुषाः (for मानवाः).]

—^{b}) D2 स (for च) K3 4 बान्धवः (for माधवः). —^{c})

सान्त्वयित्वा च तं विप्रमिदं वचनमब्रवीत् ॥ २०
सुग्रीवं चैव शैब्यं च मेघपुष्पबलाहकौ ।
योजयाश्वानिति तदा दारुकं प्रत्यभाषत ॥ २१
आरोप्य ब्राह्मणं कृष्णस्त्ववरोप्य च दारुकम् ।
मामुवाच ततः शौरिः सारथ्यं क्रियतामिति ॥ २२
ततः समास्थाय रथं कृष्णोऽहं ब्राह्मणः स च ।
प्रयाताः स्म दिशं सौम्यामुदीचीं कौरवर्षभ ॥ २३

इति श्रीहरिवंशे त्र्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

अर्जुन उवाच ।
ततः पर्वतजालानि सरितश्च सरांसि च ।
अपश्यं समतिक्रम्य सागरं मकरालयम् ॥ १
ततोऽर्घ्यमुदधिः साक्षादुपनिन्ये जनार्दने ।
प्राञ्जलिः समुपस्थाय किं करोमीति चाब्रवीत् ॥ २
प्रतिगृह्य तु तां पूजां तमुवाच जनार्दनः ।
रथपन्थानमिच्छामि दत्तं नदनदीपते ॥ ३
अथाब्रवीत्समुद्रस्तं प्राञ्जलिर्गरुडध्वजम् ।
प्रसीद भगवन्नैवमन्योऽप्येवं गमिष्यति ॥ ४
त्वयैव स्थापितः पूर्वमगाधोऽस्मि जनार्दन ।
त्वया प्रवर्तिते गाधे यास्यामि गमनीयताम् ॥ ५
अन्येऽप्येवं गमिष्यन्ति राजानो दर्पमोहिताः । C 9728 B 2. 113 6 P 2 113. 6

V8 स तं, D3 [अ]थ मां; D4 स मां (for च तं).

21 — ^{a}) K2 4 D1–4 T4 G2 4 5 M सैन्यं च, K3 सैन्यं वा, D5 सैन्याख्यं (for शैब्यं च) — ^{b}) D6 मेघपुष्पं बलाहकम् — ^{c}) M4 क्षिप्रं (for तदा) T1 योजयेति च स तदा.

22 ^{a}) V3 दारुकं (for ब्राह्मणं) K1 D4 विष्णुस् (for कृष्णस्) — ^{b}) Ś1 तमारोप्य, T1 G3 M1–3 ह्यवरो° (for त्वव°) G2 ययौ यत्र रणाजिरम् — G2 om 22^{c}–23^{d} — ^{c}) D2 कृष्णः (for शौरि.)

23 G2 om 23 (cf v 1 22). — ^{a}) T1 संप्रस्थाय (for समा°) — ^{b}) Ś1 T1 तदा, K2 च स (by transp), K4 च ह; V2 D3 M4 तथा. — ^{c}) D2 तत (for दिश). — ^{d}) K2 V1 प्रतीचीं, V3 उदीच्यां (for °ची) Ś1 T2 G1 4 M4 उदीचीं भरतर्षभ

COLOPHON T3 missing — *Mention of the Epic* · Ds2 — *Mention of Khila* K1. 2 Ñ3 V B Dn2 Ds1 D1 — *Adhy name* K1. 2 4 Ñ V B Dn Ds D1–5 वासुदेवमाहात्म्यम्, K3 श्रीकृष्णदेवमाहात्म्यम्, D6 कृष्ण माहात्म्यम्, T1 G3 ब्राह्मणपुत्रानयनोद्योग·, M1–3 पुत्रानयनम् — *Adhy. no* (figures, words or both) K3 165, Ñ3 V1 2 170, V3 Dn Ds2 168; D1 161, D3 G2 176; D4 166, T1 G3 4 180, T2 G1 182; T4 149, G5 M4 181, M1–3 145. — *Śloka no.* · K1 49, Dn Ds2 D3 4 23

103

☞ This adhy is missing in T3 (cf v 1 99 21).

1 K2 om the ref — ^{b}) N (except Ś1) T2 4 G2 वनानि (for सरांसि) — ^{c}) D1 4 (marg) 5 अमितं (for अपश्यं) — ^{d}) Ś1 सागरं सरितां पतिम्, K3 4 D1 °रं कमलालयम्, Ñ1 V1 B1 °रं सलिलाकरम्, Ds T2 °रं वरुणालयम्

2 ^{b}) K1 Ñ1 2 V3 B Dn D6 T4 G2 [उ]पनीय, V2 [उ]पानीय (for उपनिन्ये) K2 T1 G1 4 M4 जनार्दनम् (for °ने) K3 4 Ds D1–5 T2 G3 उप(D2 °पा)नीय जनार्दनम्. — Ś1 om (hapl) 2^{c}–5^{b} D3 om (hapl) 2^{c}–3^{b}, D5 reads the same on marg — ^{c}) K3 D5 T2 4 G4 स प्राञ्जलि समुत्थाय; G2 प्राञ्जलि स समुत्थाय

3 Ś1 om 3, D3 om 3^{ab} (for both, cf v 1 2). — ^{a}) K3 Dn Ds परि- (for प्रति-) K1 4 Ñ V B D1. 4 5 T2 4 G2 3 स तां, G4 कृतां (for तु तां) — K2 om. (hapl) 3^{c}–5^{b}. — ^{d}) N (Ś1 K2 om) T2 4 G1. 2 4. 5 M4 त्वया दत्तं (for दत्तं नद-)

4 Ś1 om 4 (cf. v 1 2) K2 om 4 (cf. v. 1 3). — ^{a}) G5 ततो (for अथ) — ^{b}) D3 प्राञ्जलिर्मधुसूदनम् — ^{c}) K4 मेऽद्य, Ñ1 D2 ऽदेव, B1 Dn D3 6 T2 4 G2 नैवम्, G4 5 मह्यम् (for मैवम्) T1 G1 3 M प्रसीदतु भवान्मह्यम् — ^{d}) T2 भविष्यति (for गमि°) Ñ2 नान्योऽप्येवं

एवं निश्चित्य गोविन्द यत्क्षमं तत्समाचर ॥ ६

वासुदेव उवाच ।

ब्राह्मणार्थे मदर्थे च कुरु सागर मद्वचः ।
माम्रृते न पुमान्कश्चिदन्यस्त्वां धर्षयिष्यति ॥ ७
अथाब्रवीत्समुद्रस्तु पुनरेव जनार्दनम् ।
अभिशापभयाद्भीतो बाढमेवं भविष्यति ॥ ८
शोषयाम्येष मार्गं ते येन त्वं तात यास्यसि ।
रथेन सहसूतेन सध्वजेन च केशव ॥ ९

वासुदेव उवाच ।

मया दत्तवरः पूर्वं न शोषं त्वमिहार्हसि ।
मानुषास्ते न जानीयुर्विविधान्रत्नसंचयान् ॥ १०
जलं स्तम्भय साधो त्वं ततो यास्याम्यहं रथी ।
न हि कश्चित्प्रमाणं ते रत्नानां वेत्स्यते नरः ॥ ११
सागरेण तथेत्युक्ते प्रस्थिताः स्म जलेन वै ।
स्तम्भितेन यथा भूमौ मणिवर्णेन भास्वता ॥ १२
ततोऽर्णवं समुत्तीर्य कुरूनप्युत्तरान्वयम् ।
क्षणेन समतिक्रान्ता गन्धमादनमेव च ॥ १३
ततस्तु पर्वताः सप्त केशवं समुपस्थिताः ।
जयन्तो वैजयन्तश्च नीलो रजतपर्वतः ॥ १४
महामेरुः सकैलास इन्द्रकूटश्च नामतः ।

भविष्यति

5 Ś1 om 5^{ab} (cf v l. 2) K2 om 5^{ab} (cf v l 3) — ^{c}) K3 4 Ñ1 2 V B D (except D4) T3. 4 G2 4 मार्गे (for गाधे) — ^{d}) K1 D2 यास्यामि वचनीयताम्

6 ^{b}) K3 -गर्विता (for -मोहिताः) D2 3 राजानो बल दर्पिता. — ^{c}) N (except Ś1) G2 संचिन्त्य (for निश्चित्य) — ^{d}) K3 कर्म , Ñ2 V3 क्षेमं , D4 कृत्यं (for क्षमं) D3 युक्तमेतत्समाचर

7 K3 4 D1 om. (hapl) 7–9, D5 reads the same on marg Ś1 T1 4 G M भगवान् , D6 कृष्ण (for वासुदेव) After the ref , K2 D2 3 read 10^{ab}, repeating it in its proper place — ^{a}) V2 ब्राह्मणार्थं (for °र्थे) Ś1 G6 मदर्थेन , K1 Ñ1 V1 D6 T4 G3 ऽस्मदर्थे च (for मदर्थे च) Ñ2 Dn Ds D3 5 ब्राह्मणार्थं मद(D3 °मा)र्थं च. — ^{b}) D2 3 जलं स्तम्भय सागर — ^{c}) Ś1 मा स्म ते , K1 Ñ2. 3 V B2 3 Dn Ds D4–6 T2 G2 मद्दते (for माम्रृते) — ^{d}) D3 अन्यस्त्वा लङ्घयिष्यति , T1 4 G1 3–5 M अन्योऽप्येवं गमिष्यति.

8 K3 4 D1 om 8 (cf v l 7) — ^{a}) D6 यतो ; G2 ततो (for अथ) K2 त (for तु) — ^{c}) Ñ1 -शापाद् (for -शाप) — ^{d}) K1 Ñ2 3 V B2 3 Dn Ds D2–4 भवत्विति (for भविष्यति) K2 बाढमेतन्नवेदिति ; T1 4 G1 3 M1–3 °मित्येव सागर , G4 5 M4 °मित्येव चाब्रवीत्.

9 K3 4 D1 om 9 (cf. v l 7) — ^{a}) B1 D5 तं (for ते) B3 शोषयिष्यामि मार्गं ते — ^{b}) K1 2 Ñ2 3 V B D (D1 om) T2 4 G1 2 4 6 M4 कृष्ण (for तात). — K2 reads 9^{cd} after 11 — ^{c}) D3 रथेन च सहाश्वेन. — ^{d}) K3 Dn T1 G3 M2 सद्विजेन (for सध्व°). M1–3 जनार्दन (for च केशव)

10 Ś1 T1 4 G M भगवान् , D6 कृष्ण (for वासुदेव) K2 D2 3 read 10^{ab} for the first time after the ref of 7. — ^{a}) K1 2 (both times) Ñ V B Dn Ds D1. 2 3 (last two both times) T1 G1 5 दत्तो (for दत्त) G2 मयोक्तवचनं कुर्वन् , G3 मया तु तत्तप पूर्वं — ^{b}) K2 (both times) D2 (second time) गन्तुम् , D3 (first time) T1 G3–5 यातुम् (for त्वमिह) Ñ1 3 V1 B1 [ए]ष्यसि (for [अ]र्हसि). K1 3 4 V2 3 B2 3 Dn Ds D1 2 (first time) 4–6 T2 G2 न शोषं यास्यसीति ह , D3 (second time) न त्वं शोषं गमिष्यसि , G1 M4 न शोषयितुमर्हसि. — ^{c}) D2 मानुष्यास् (for °षास्). Ś1 M1 4 वि ; M3. 3 ऽभि- (for न). — ^{d}) G3 नृप (for रत्न-)

11 Before 11, K2 ins कृष्ण उवाच. — ^{a}) Ś1 K1. 2 साधु (for साधो) — After 11, K2 reads 9^{cd}.

12 ^{a}) K1 V1 D3 4 T1 G3 5 M4 [उ]क्ता , Dn Ds [उ]क्तं ; T2 [उ]क्त्वा (for [उ]क्ते) — ^{b}) T1 G3 रथेन , G2 जवेन (for जलेन) — ^{c}) M1 (*sup lin* as in text), 2 (*inf. lin.*) स्थापितेन (for स्तम्भि°). Ś1 यथा भूम्यां ; Ñ1 जलभूमौ , Ñ2 V1 D5 T1 G1. 3. 5 M2 4 पथा भूमौ , B1 तथा भूमौ (for यथा भूमौ) — Dn1 om. 12^{d}–15^{c}. — ^{d}) V3 -रत्नेन (for वर्णेन). Ñ1 T1 2 4 G1 3–5 M भास्वत ; G2 वर्त्मना (for भास्वता).

13 Dn1 om 13 (cf v l 12) — ^{a}) D2 3 समुत्तीर्णाः (for °र्यं) — ^{b}) K2 4 स्वयम् ; K3 अथ , T1 G3 कुरून् ; T4 तदा (for वयम्) Ñ1 3 V1 B1 प्रयाता ह्यु(B1 °ताप्यु)त्तरान्कुरून् — ^{c}) Ñ2 प्राप्ता (for क्रान्ता) — ^{d}) K2 D2 3 पर्वतं गन्धमादनम् , T1 G1 3–5 M गन्धमादनपर्वतम्.

14 Dn1 om 14 (cf v l 12). — ^{b}) Ś1 समव- ; Ñ1 V1 प्रत्युप- (for समुप-) — ^{d}) Ñ3 V1 B1 एव च (for

वर्णरूपाणि बिभ्रन्तो विविधान्यद्भुतानि च ॥ १५
उपस्थाय च गोविन्दं किं कुर्मेत्यब्रवंस्तदा ।
तांश्चापि प्रतिजग्राह विधिवन्मधुसूदनः । १६
तानुवाच हृषीकेशः प्रणामावनतान्स्थितान् ।
विवरं गच्छतो मेऽद्य रथमार्गः प्रदीयताम् ॥ १७
ते कृष्णस्य वचः श्रुत्वा प्रतिगृह्य च पर्वताः ।
प्रददुः कामतो मार्गं गच्छतो भरतर्षभ ॥ १८
तत्रैवान्तर्हितास्ते च तदाश्चर्यतरं मम ।
असक्तं च रथो याति मेघजालेष्विवांशुमान् ॥ १९
ततः कदाचिद्दुःखेन रथमूहुस्तुरंगमाः ।
पङ्कभूतं हि तिमिरं स्पर्शाद्विज्ञायतेऽनघ ॥ २०
अथ पर्वतभूतं तत्तिमिरं समपद्यत ।
तदासाद्य हया राजन्निष्प्रयत्नास्ततः स्थिताः ॥ २१
ततश्चक्रेण गोविन्दः पाटयित्वा तु तत्तमः ।
आकाशं दर्शयामास रथपन्थानमुत्तमम् ॥ २२
निष्क्रम्य तमसस्तस्मादाकाशे दर्शिते तदा ।
भविष्यामीति संज्ञा मे भयं च विगतं मम ॥ २३
ततस्तेजः प्रज्वलितमपश्यं वदतां वर ।
सर्वलोकं समाविश्य स्थितं पुरुषविग्रहम् ॥ २४
तं प्रविष्टो हृषीकेशो दीप्तं तेजोनिधिं तदा ।
रथ एव स्थितश्चाहं स च ब्राह्मणसत्तमः ॥ २५
स मुहूर्तात्ततः कृष्णो निश्चक्राम तदा प्रभुः ।
चतुरो बालकान्गृह्य ब्राह्मणस्यात्मजांस्तदा ॥ २६
प्रददौ ब्राह्मणायाथ पुत्रान्सर्वाञ्जनार्दनः । C 9749 B 2.113 28 P 2 113, 28

·पर्वतः)

15 Dn1 om. 15^abc (cf v l 12) M4 om (hapl) 15^ab —^a) D3 मेघश्च (for ·मेरु· स) Ñ2 मेरुमण्डल·कैलास —^b) T1 G1 3 इन्द्रकेतुश्च (for °कूटश्च) —^c) K1 2 4 Ñ V B Dn3 Ds D1–5 T2 4 G2 बिभ्राणा वर्ण(K4 °णार्णव)रूपाणि, K2 चित्राण्यर्णवरू° —^d) K2 विचित्राणि (for विविधानि).

16 ^a) D2 रूपमास्थाय गोविन्दं —^b) K2 [अ]ब्रुवंस् (for [अ]ब्रवंस्). G1 4 M4 वचः (for तदा) Ñ3 V1 B1 किं कुर्म इति चाब्रुवन्·

17 ^a) V1 B1 तत कृष्ण (for हृषीकेश·) —^b) M1–3 प्रभुम्रावनतान्नगान् —^c) M1–3 स्याद् (for ऽद्य) Ś1 विवरं गच्छतामद्य —^d) T1 दृढ (for रथ-).

18 ^a) K1 D4 तु कृष्ण- (for कृष्णस्य) Ś1 कृष्णस्य वचन श्रुत्वा, T1 G1 3–5 ते कृष्णवचनं श्रुत्वा —^b) M2 3 परि- (for प्रति-) —^d) T4 M1 2 गच्छत· केशवस्य ह

19 ^a) K3 4 Dn Ds D1 5 G3 सर्वे, T1 4 चैव (for ते च) —^b) K3 Ñ3 (marg) V2 3 B2 महत् (for मम) Ś1 Ñ1 B1 G5 तदाश्चर्यतमं मम; K2 तदाश्चर्यं मतं मम —^c) Ś1 असङ्गं, K2 D2 6 T1. 2 G M °क्तश्, D3 अधोऽधश्च (for असक्तं) —After 19, D1 2 5 ins

1128* सप्त द्वीपान्ससिन्धूंश्च सप्त सप्त गिरीनथ ।
लोकालोकं तथातीत्य विवेश सुमहत्तमः ॥

[= Bhāgavata P., 10 89 48 — (L 1) D2 सप्त सिन्धून, Poona ed. ससिन्धु च (for °न्धूंश्च)]

20 ^c) D3 एकीभूतं, T1 G1 3 5 पङ्की° (for पङ्क°). —^d) T2 G3 नृप (for ऽनघ)

21 ^b) Ś1 तिमिरं समजायत, K1 °रं प्रत्यपद्यत —After 21^ab, K2 D2 ins

1129* अश्वा नाशक्नुवन्गन्तुं ततोऽहं सभ्रमान्वित ॥

—^c) K1 2 4 Ñ V B D T2 G1–4 M4 महाराज (for हया राजन्) K3 तदा सर्वे महाराज —^d) Ś1 स्थिता न च, K Ñ2 V B Dn2 Ds D1–6 G2 हया. स्थिता, T1 तु ते स्थिताः, G3 ततस्ततः (for तत स्थिता·)

22 ^a) G5 महता (for गोविन्द). —^b) K1 3 4 Ñ1 V2 3 B2 3 D T2 G2 तमस्तदा, T1 ततस्तमः (for तु तत्तमः) K2 पातयित्वा तमस्तत· —^d) Ś1 K2 एव च (for उत्तमम्)·

23 D4 om 23 —^c) D3 भ्रमिष्यामि (for भवि°). K2 विज्ञाय (for सज्ञा मे) Ñ1 भविष्यतीति सज्ञा ते

24 ^a) T2 G4 तत. प्रज्वलितं तस्य (G4 तेजो) —^b) K1 3. 4 Ñ V2 3 B D1 2. 5 6 T4 G2 4 अपश्यं तत्तदाम्बरे, K2 °श्यं सर्वतोमुखम्, V1 Dn2 D3 4 °श्यं तं (D3 तु) तदाम्बरे; Ds2 तमपश्यं तदाम्बरे —^c) T1 4 G3 5 M1–3 लोकान् (for -लोकं) K2 समाहृत्य; D2 °वृत्य (for °विश्य) —^d) D3 स्थितः पुरुषविग्रह·

25 ^a) Ś1 Ñ2 D6 तत्प्रविष्टो, K1 T1 G3 तं प्रविष्टं (for तं प्रविष्टो) —^b) B1 D6 तेजोनिधिस् (for °निधिं) D2 दीप्ततेजोनिधिस्तदा

26 M4 om 26–27. —^a) D2 3 मुहूर्तात्तु (for स

त्रयः पूर्वं हृता ये च सद्योजातश्च बालकः ॥ २७
प्रहृष्टो ब्राह्मणस्तात पुत्रान्दृष्ट्वा पुनः प्रभो ।
अहं च परमप्रीतो विस्मितश्चाभवं नृप ॥ २८
ततो वयं पुनः सर्वे ब्राह्मणस्य च ते सुताः ।
यथागता निवृत्ताः स्म तथैव भरतर्षभ ॥ २९
ततः स्म द्वारकां प्राप्ताः क्षणेन नृपसत्तम ।
असंप्राप्तेऽर्धदिवसे विस्मितोऽहं ततः पुनः ॥ ३०
सपुत्रं भोजयित्वा तं द्विजं कृष्णो महायशाः ।
धनेन तर्पयित्वा च गृहं प्रास्थापयत्तदा ॥ ३१

इति श्रीहरिवंशे त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

अर्जुन उवाच ।
ततः कृष्णो भोजयित्वा शतानि सुबहूनि च ।
विप्राणामृषिकल्पानां कृतकृत्योऽभवत्तदा ॥ १
ततः सह मया भुक्त्वा वृष्णिभोजैश्च सर्वशः ।
विचित्राश्च कथा दिव्याः कथयामास भारत ॥ २
ततः कथान्ते तत्राहमभिगम्य जनार्दनम् ।
अपृच्छं तद्यथावृत्तं कृष्णं यद्दृष्टवानहम् ॥ ३
कथं समुद्रः स्तब्धोदः कृतस्ते कमलेक्षण ।

मुहूर्तात्). — b) Ñ2 D2 ततः ; D3 महा- (for तदा) V2 विभु. (for प्रभु) — Ś1 om (hapl) 26^{c}–27^{d}

27 Ś1 M4 om 27 (cf v l 26) — a) G2 तान् (for प्र-). Ñ1 B1 ब्राह्मणस्य (for °णाय) — c) K2 हृताश्चैव, T1 2 4 G3 4 M2 गृहीता ये (for हृता ये च)

28 a) K Ñ2 3 V B Ds2 D1–6 T2 G1 2 4 5 M4 तत्र ; Dn Ds1 सोऽथ (for तात). — b) Ś1 K1 तत , V2 पुरः (for पुनः) — c) B3 अयं (for अहं) — d) Ś1 वन्दितश् (for विस्मि°) D4 G2 तदा (for नृप)

29 a) K2 तदा (for पुनः) — b) Ñ1 V1 B1 बालका ; D2 तत्सुता (for ते सुताः). — c) K2 V1 3 T2, 4 G3 5 M यथागतं (for °ता).

30 a) K2 द्वारवतीं (for स्म द्वारकां). G5 प्राप्य (for प्राप्ता). — b) Ñ1 नर (for नृप-). Ñ3 V1 B1 क्षणेन भरतर्षभ — c) G3 -समये (for -दिवसे) Ñ2 असंप्राप्तार्धदिवसे — d) V1 2 पुनः (for ततः) Dn प्रभुः (for पुनः). Ś1 भूयोऽहं विस्मितोऽभवम्

31 a) M4 पूजयित्वा (for भोज°) — c) Bom Poona eds G(ed) वर्षयित्वा (for तर्प°). T1 G4 M4 तं (for च).

Colophon. T3 missing — *Mention of the Epic*. Ds2 — *Mention of Khila*. K1 V B Dn2 Ds1 D1, 3. — *Sub parvan* D3 पारिजात — *Adhy name* K1, 2, 4 Ñ1 3 V B Dn Ds D1–5 वासुदेवमाहात्म्यम्, K3 श्रीकृष्णदेवमाहात्म्यम् ; D6 श्रीकृष्णमाहात्म्यम्, T1 G3 वासुदेवमाहात्म्ये ब्राह्मणपुत्रानयनम्, T2, 4 G1 4 ब्राह्मणपुत्रानयनम् ; M1–3 पुत्रानयनम् — *Adhy no.* (figures, words or both) Ñ3 V1, 2 171 ; V3 Ds2 169, D1 162, D4 167 ; T1 G3, 4 181, T2 G1 183, T4 150, G2 177, G5 M4 182, M1–3 146 — *Śloka no* K1 D3 4 30 ; Dn 31 ; Ds2 32

104

☞ This adhy is missing in T3 (cf. v. l. 99. 21).

1 Ñ2 om. the ref. — d) Ds1 कृतकल्पो (for °कृत्यो). — After 1, T1 2 4 G1, 3–5 M ins. :

1130* अर्चयित्वा सहस्रांशुं भास्करं भुवनेश्वरम् ।

2 a) K2 तदा (for मया) — b) Bom. ed. G(ed.) सर्वदा (for °श). T1, 2 G1, 3–5 M वृष्णिभिश्चैव सर्वशः. — After 2^{ab}, S (except G2, T3 missing) ins. :

1131* सात्यकिं पुरतः कृत्वा भोजयामास वृष्णिपान् ॥
ततः सभां प्रविष्टा स्म सह वृष्णिपुरःसरैः ।

[(L 2) T2 G1 4, 5 M4 प्रविष्टात्मा (for °ष्टा स्म).]

— c) Ś1 Ñ3 विचित्रार्था., Ñ1 चित्रार्थाश्च (for विचित्राश्च). — d) Ś1 माधव, T1 2 G1 3–5 M4 केशव, M1–3 संसदि (for भारत)

3 b) D6 अभिवाद्य (for °गम्य) — c) Ñ2 तं तदा ; V3 तत्तथा-, D6 तं तथा (for तद्यथा) K4 अपृच्छ तं यथातथ्यं ; D1 आपृच्छ्य तं यथातथ्यं — d) K4 Ñ1, 3 V B Dn Ds

पर्वतानां च विवरं कृतं ते कथमच्युत ॥ ४
तमस्तच्च कथं घोरं घनं चक्रेण पाटितम् ।
यच्च तत्परमं तेजः प्रविष्टोऽसि कुतश्च तत् ॥ ५
किमर्थं तेन ते बालास्तदा चापहृताः प्रभो ।
यच्च ते दीर्घमध्वानं संक्षिप्तं तत्कथं पुनः ॥ ६
कथं चाल्पेन कालेन कृतं नस्तद्गतागतम् ।
एतत्सर्वं यथावृत्तमाचक्ष्व मम केशव ॥ ७

वासुदेव उवाच ।

मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना ।
विप्रार्थमेष्यते कृष्णो नागच्छेदन्यथेति ह ॥ ८
ब्रह्मतेजोमयं दिव्यमाश्चर्यं दृष्टवानसि ।
अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥ ९
प्रकृतिः सा मम परा व्यक्ताव्यक्ता च भारत ।
तां प्रविश्य भवन्तीह मुक्ता भरतसत्तम ॥ १०
सा सांख्यानां गतिः पार्थ योगिनां च तपस्विनाम् ।
तत्पदं परमं ब्रह्म सर्वं विभजते जगत् ॥ ११
मामेव तद्घनं तेजो ज्ञातुमर्हसि भारत ।
समुद्रः स्तब्धतोयोऽहमहं स्तम्भयिता जलम् ॥ १२
अहं ते पर्वताः सप्त ये दृष्टा विविधास्त्वया ।
अहं तमो घनीभूतमहमेव च पाटकः ॥ १३ C 9767 B 2 114 14 P 2. 114. 14

4–6 T_2 G_4 कृत्स्नं (for कृष्णं)

4 B_2 om. 4-5. — ^{a}) K_2 सुस्तम्भ. (for स्तब्धोद) — $Ś_1$ om (hapl) 4^{bc} — ^{b}) D_1 दत्तस् (for कृतस्) — ^{d}) $K_{3\ 4}$ $Ñ_1$ Dn Ds $D_{1\ 4\ 5}$ T_4 तत् (for ते) T_1 M_2 कृतम् (for कथम्) D_3 T_2 G M_4 कथं ते कृतमच्युत.

5 B_2 om 5 (cf v l 4). — ^{a}) D_3 तत्तमश् (by transp) K_2 विषमं ; K_3 Dn Ds $D_{1,5}$ च कृतं, T_1 $_4$ G_3 $_5$ च महा-, T_2 $G_{1,4}$ च तमो (for च कथं) $Ś_1$ तमस्तच्च घनीभूतं, V_1 B_1 तम· स्तब्धं कथं घोरं, M_4 तमश्च मनसो घोरं — ^{b}) $Ś_1$ K_2 T_2 $G_{1\ 4}$ M_4 कथं, K_1 तच्च, $Ñ_2$ परं, G_3 विघ्नं (for घनं) — ^{c}) $Ñ_2$ $V_{2\ 3}$ $B_{1\ 2}$ D_2 G_2 M_4 यत् (for तत्) — ^{d}) $K_{3,4}$ $Ñ_{1\ 2}$ V $B_{1\ 3}$ D G_2 कथ (for कुतश्)

6 After 6^a, M_1 reads 8^b repeating it in its proper place B_3 T_1 om (hapl) 6^b–8^a — ^{c}) K_1 पर्वते (for यच्च ते). — ^{d}) $Ñ_1$ प्रभो (for पुन). — For 6^{cd}, $T_{2,4}$ $G_{1,3-5}$ M subst

1132* योऽयं दीर्घो महामार्गः संक्षिप्त केन हेतुना ।

कृष्णः स्खलन्निव मुहुः क्षितौ समभिवर्तत ॥ ३
जृम्भते च तदा कृष्णः पुनश्च स्खलते भृशम् ।
रोमाञ्चोत्थितगात्रस्तु निद्रया चाभिभूयते ॥ ४
ज्वराभिमृष्टमात्मानं विज्ञाय पुरुषोत्तमः ।

111

☞ This adhy is missing in T3 (cf v 1 99 21) and also in G2 (cf v 1 110 21)

1 ^{a}) K Ñ2 3 (marg) V B3 Dn2 D1. 3 4 6 T4 G4 मृतम् (for मृत) Ñ1 मृतमित्येव विज्ञाय — ^{b}) T1 G1 3 4 M -निबर्हण·, G5 -निषूदनम् (for °नः) — ^{c}) Ś1 Ñ1. 2 V1 Dn D3 -बलाभ्यां तु, K3 4 °भ्मातं; V2 °त्तत्र; V3 B1 2 D5 6 G5 °त्त तु, B3 °तूर्णं, D1 °भ्यां च, T1 2 4 G1 3 4 M °त्त वै (for °भ्यां त). — ^{d}) Ñ2 च (for [अ]थ). — After 1, G5 ins 1133*

2 ^{a}) G(ed) मुक्तगात्रस् (for °मात्रस्). V1 B1 मु-; K3. 4 Ñ B2 Dn Ds D1-3 T4 स (for तु) — ^{b}) K2 कृष्णं देशं; B3 कृष्णमात्रं; D4 कृष्ण देवं (for कृष्णदेहं). K Ñ2. 3 V B2 3 D (except D6) T4 ह (for स·) — Ś1 om 2^{cd}. — ^{c}) D2 प्रविष्टो (for अमुक्त्वा). — T1. 2 G1 3. 4 M subst. for 2^{cd} G5 ins after 1 G(ed) after 2

1333* प्रविश्य हृदयं तस्य बबाधे यदुसत्तमम् ।
[M1-3 बबाधे च यदूत्तमम् (for ^{b})]

3 ^{a}) D1 सह्याविष्टस्, G5 आविष्टस्तु (for स ह्याविष्टस्). Ñ1 [अ]नेन (for तेन). — ^{b}) T1 G1 3 4 M ज्वरेणामित-तेजसा. — ^{c}) K2 इव बहु; T1 गर्भगतं (for इव मुहुः). — ^{d}) K Ñ2. 3 V1 2 B Dn Ds D1 2. 4. 5. 6 (marg as in text) T4 क्षितौ गाढं व्यवर्तत, D3 मुहुः क्षिप्तो ह्यवर्तत

4 ^{a}) Ś1 partial lacuna Ś1 विष्णु (for कृष्ण). K Ñ2. 3 V B D T4 जृम्भते श्वस(D1 स्वप, D6 T4 स्खल)ते चैव — ^{b}) Ś1 पुनश्च श्वसति प्रभुः; K Ñ2 3 V B Dn Ds D1 2 4-6 T4 G5 M4 स्खल(B3 वलग-; D6 T4 श्वस)ते च पुनः पुन.; D3 T1 2 G1 3 4 M1-3 स्खल(T2 कल्प)ते च मुहुर्मुहुः — ^{c}) Ś1 V2 T1 स रोमाञ्चितनेत्र(V2 °गात्र-, T1 °देह)स्तु, K2 D3 4 रोमाञ्चोद्ग(D3 °ञ्चान्वि)तगात्रश्च. — ^{d}) T1 G3 M1 2 4 स्ताभि-, G1 चापि, G3. 5 [अ]प्यभि- (for चाभि-) K1 निद्रया चाभ्यभूयत. — N (except Ś1 K3 Ñ1) T4 G4 ins. after 4; G5 after 5^{ab}:

1334* तत स्थैर्यं समालम्ब्य कृष्ण परपुरंजयः ।
विकुर्वंति महायोगी जृम्भमाण. पुन पुन ॥

[G4 om line 1 — (L 1) K1 D4 तत्र (for तत) G5 वैर्यं (for स्थैर्यं) — (L 2) K1 2 D4 विकुर्वन्स, Ñ2 3 V B D2 6 G4 5 विकरोति, Dn विकुर्वन्त; Ds °र्वतो; D1 °र्वन्ति; D3 °र्वन्वै (for °र्वंति) T4 तदा (for महा-) K2 जृम्भमाणं (for °ण).]

5 ^{a}) K Ñ2 3 V B Dn Ds D1 2 4-6 T1 2 4 G1 3-5 -भूतम् (for -मृष्टम्) D3 ज्वालाभिभूतमात्मानं — After 5^{ab}, G5 ins 1334* — After 5, Ś1 ins.

1335* स वैष्णवज्वरो गृह्य तं च वै ज्वरमोजसा ।
कृष्णाय न (?) संप्रयच्छंस्तं जग्राह पुनर्हरिः ।

While Ñ2 3 V B1 3 Dn Ds D1 5 G(ed.) ins after 5:

1336* घोरं वैष्णवमत्युग्रं सर्वप्राणिभयकरम् ।
सृष्टवानथ तेजस्वी बलवान्भीमविक्रम· ॥

[B1 3 om line 2 — (L 2) V2 स सृष्टवास्तु तेजस्वी; D1 सप्रहृष्टतनु सोऽथ (for ^{a}). Dn त बलाद्, D1 स ज्वरो (for बलवान्). D6 त ज्वरं भीमविक्रमम् (for ^{b})]

Ñ2. 3 V B1 3 Dn Ds D1 5 G(ed) cont. · K Ñ1 B2 D2-4. 6 T4 G4. 5 ins after 5 Ś1 cont. after 1335*:

1337* ज्वर· कृष्णविसृष्टस्तु गृहीत्वा तं ज्वरं बलात् ।
कृष्णाय हृष्टः प्रायच्छत्तं जग्राह ततो हरि· ॥
ततस्तं परमक्रुद्धो वासुदेवो महाबल· ।
स्वगात्रात्स्वज्वरेणैव निष्क्रामयत वीर्यवान् ॥
आविध्य भूतले चैनं शतधा कर्तुमुद्यत· ।
व्याघोषयज्ज्वरस्तत्र भोः परित्रातुमर्हसि ॥

[Ś1 om. lines 1-4 — (L 1) D3 तदा, D1 महान् (for बलात्) — Ñ1 om lines 2-6. G6 om. line 2. — (L 2) V1 कृष्ण, V3 सृष्ट· (for हृष्ट). — (L. 3) T4 ज्वरं (for ततस्). — G4 5 om. line 4 — (L. 4) Poona ed. निष्कासयत (for निष्काम°). — After line 4, D2 ins.:

1337A* माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ।

सोऽसृजज्ज्वरमन्यं तु पूर्वज्वरविनाशनम् ॥ ५
व्यावेष्यमाने तु तदा ज्वरे तेनामितौजसा ।
अशरीरा ततो वाणी तमुवाचान्तरिक्षगा ॥ ६
कृष्ण कृष्ण महाबाहो यदूनां नन्दिवर्धन ।

C 10544
B 2 123 12
P 2 123 12

माहेश्वर समाक्रन्दन्वैष्णवेन बलार्दित ॥

—(L 5) D_2 [ए]व (for [ए]न) G_5 ग्नतश (for °धा) —(L 6) $Ś_1$ K_2 Dn_2 $D_{1\,5}$ G_5 व्याघोषत (for °यज्) G_5 तं तु (for तत्र) $G_{4\,5}$ सौम्य मा (for भो परि) D_8 भो परित्रायतामिति (for ᵇ)]

$G_{4.5}$ cont $T_{1.2}$ $G_{1.3}$ M G(ed) ins after 5

1338* कृष्णज्वरो ज्वर पूर्वं गृहीत्वा स्वेन तेजसा ।
ननाद सुमहानादं वैष्णव स महाबल ।
चतुर्भुजश्चतुर्वक्त्र सर्वप्रहरणोद्यत· ॥
तयोस्तु तुमुल युद्ध ज्वरयोर्बाहुशालिनो· ॥
ततो देवा सगन्धर्वा दिविस्था युद्धलालसाः ।
ददृशुश्च महद्युद्धं भूतानि च समन्तत ।
ततो माहेश्वरो युद्धे ताडयामास वैष्णवम् ।
बाहुना ताडितस्तेन ननाद बहुविस्तरम् ॥
स गतो वैष्णव राजन्रौद्रं भस्मायुधं रणे ।
द्वाभ्यामथ च बाहुभ्या गृहीत्वाताडयद्बली ॥
इतराभ्या समाहत्य बाहुभ्या वैष्णवो ज्वर. ।
ननाद सुमहानादं सर्वलोकस्य पश्यतः ॥
ततो रौद्रो ज्वरो राजन्मुष्टिनाथ जघान तम् ।
ददंश दन्तैर्बहुधा ज्वरं केशवमाहवे ॥
बाहुभ्यामेव तौ राजन्युयुधाते महागदौ ।
अन्योन्यं ताडयन्तौ च मुष्टिभिर्ज्वरसत्तमौ ॥
चक्रतुश्च महानादं ज्वरौ तौ लोकविश्रुतौ ।
वैष्णवोऽथ ज्वरो राजन्ग्रहीतुं रौद्रसज्ञितम् ॥
यतते बहुधा तत्र मुष्टिनाथ जघान तम् ।
आहत्य बाहुना भूयो निष्पिपेष पुनः पुन. ॥
निष्पिष्टहृदयस्तूर्णं शूलिनो ज्वरसत्तम. ।
ननाद बहुधा नाद भूमौ विपरिवर्तते ॥
गृहीत्वा तु बलाद्रौद्रमाकृष्य च पुन पुनः ।
कृष्णाय हृष्टः प्रायच्छत्किं करिष्याम्यतः परम् ॥
हनिष्ये देवदेवेश भक्षयिष्येऽथ वा पुन· ।
इत्युक्त्वा सुमहानाद चकार रणमूर्धनि ॥
उत्थाय च हृषीकेशो ज्वर माहेश्वर रणे ।
हन्तुमैच्छत्तदा लोको निर्ज्वरोऽस्त्विति केशवः ॥

[G_5 om line 1 —(L 4) T_1 G_3 ततस् (for तयोस्). —(L 6) $G_{4\,5}$ M_4 महायुद्धं (for मह्‌_द्ध) —(L 9) M_8 ज्वरो वै (for स गतो) T_2 $G_{1\,4\,5}$ M_4 स गदो वैष्णवो युद्धे (T_2 राजा, M_4 राजन्) (for ᵃ) T_1 G_3 $M_{1\,2}$ रदन् (for रौद्र). — G_3 om (hapl) lines 12ᵇ–17ᵃ —(L. 13) $G_{1.4.5}$ [अ]भि- (for [अ]थ) —(L 15) T_1 M_2 तौ ततो (for एव तौ) —(L 18) G_5 महाराज (for ज्वरो राजन्) —(L 19) $G_{1\,5}$ [अ]भि- (for [अ]थ) —(L 20) T_1 G_3 $M_{2\,3}$ भूमौ (for भूयो) —(L 22) $M_{1\,2\,4}$ विविध (for बहुधा) M -वर्तयन् (for °ते) —(L 24) G(ed) त जग्राह ततो हरि (for ᵇ) —(L 26) G_4 इत्युक्त्वा सिंहनाद च (for ᵃ)]

6 ᵃ) $Ñ_1$ D_8 आविध्यमाने (for व्या°) K $Ñ_{2\,3}$ V B Dn $D_{1–6}$ T_4 $G_{4\,5}$ आविध्यमाने तस्मिस्तु —ᵇ) $Ś_1$ ज्वरेणाप्रतिमौजसा, K Ñ V B D T_4 $G_{4\,5}$ M_4 कृष्णेनामिततेजसा. —ᶜ) $Ś_1$ G_1 $M_{1\,2\,4}$ तदा (for ततो) —ᵈ) $Ś_1$ संबभूव; T_1 तमाह च (for तमुवाच) K $Ñ_{2\,3}$ $V_{1\,2}$ B_2 Dn D_5 $D_{1–5}$ T_4 अन्तरिक्षादभाषत (V_2 °जायत)

7 ᵃ) $T_{1\,2}$ $G_{1\,3–5}$ M कृष्ण देवेश भूतेश. —ᵇ) $Ñ_1$ $T_{1\,2}$ G_3 $M_{3\,4}$ वंश-, T_4 $G_{1\,4\,5}$ $M_{1\,2}$ कीर्ति- (for नन्दि-) —ᶜ) $K_{1.2}$ D_4 एतं त्वं, $K_{3\,4}$ $Ñ_2$ V_1 B_2 Ds_2 $D_{1\,3}$ एतं तु; $Ñ_1$ अत्र वै, V_2 Dn $D_{5\,6}$ एन तु (Dn त्वं), Ds_1 T_4 एवं तु, D_2 T_2 $G_{3–5}$ M एनं वै, T_1 एकं वै (for एतं वै) —ᵉ) D_1 इत्येव वचने मुक्ते —ᶠ) V_3 $B_{1\,3}$ D_6 G_1 ज्वरम् (for स्वयम्) $T_{1\,2}$ G_3 $M_{1\,3\,4}$ मुमोचाथ हरिर्ज्वरम् — After 7, K $Ñ_{2\,3}$ V B D T_4 $G_{4\,5}$ M_4 G(ed) ins :

1339* भूतभव्यभविष्यस्य जगत परमो गुरु ॥
एवमुक्तो हृषीकेश ज्वरो वाक्यमथाब्रवीत् ।
कृष्णस्य पादयोर्मूर्ध्ना शरणं सोऽगमज्ज्वर. ॥
शृणुष्व मम गोविन्द विज्ञाप्यं यदुनन्दन ।
यो मे मनोरथो देव त त्वं कुरु महाभुज ॥

[After line 1, $G_{4\,5}$ M_4 G(ed) ins 1340* G_4 M_4 om lines 2–5 G_5 om lines 2-3. $Ñ_2$ $V_{1\,3}$ $B_{1\,2}$ Dn D_8 D_6 transp lines 2 and 3 —(L 2) K_3 D_3 एवमुक्त्वा (D_3 °क्ते), $Ñ_{2\,3}$ V_3 $B_{1\,2}$ Dn D_8 D_6 प्रणम्य च (for एवमुक्तो) — After line 2, D_8 ins 1340* $Ñ_2$ D_5 om line 3 G(ed) repeats lines 3 after line 23 of 1340* —(L 3) V_3 B D_8 $D_{2.6}$ गतो (for ऽगमज्) — Before line 4, $Ñ_2$ ins ज्वर उवाच —(L 4) T_5 G_3 शृणु त्व (for शृणुष्व) G_5 विज्ञाप्य मधुसूदन (for ᵇ) —(L. 5) D_5 कुरुष्व (for त्व कुरु)]

On the other hand, $T_{1\,2}$ $G_{1.3}$ $M_{1–3}$ ins after 7: D_8 after line 2 of 1339* $G_{4.5}$ M_4 G(ed) after line 1 of 1339*.

1340* तमुवाच ज्वरो भूय साक्षाद्विष्णुरिव स्वयम् ।
प्रणम्य शिरसा देवं कृताञ्जलिपुट स्थित. ॥
ज्वर ।
नम· कृष्णाय हरये विष्णवे प्रभविष्णवे ।
आदिदेवाय देवाय पुराणाय गदाभृते ॥
नम सहस्रशिरसे सहस्रचरणाय च ।
सहस्राक्ष नमो नित्यं लोकानामभयंकर ।
उद्गीथाय नमो देव यज्ञाधिपतये नमः ॥

मा वधीर्ज्वरमेतं वै रक्षणीयस्त्वयानघ ।
इत्येवमुक्ते वचने तं मुमोच हरिः स्वयम् ॥ ७
तमुवाच ज्वरो भूयस्त्वहमेको ज्वरो भुवि ।
तव प्रसादान्नान्यः स्याज्ज्वरः समितिशोभन ॥ ८
भगवानुवाच ।
एक एव ज्वरो लोके भवानस्तु यथासुखम् ।

नमस्ते चक्रिणे नित्यमसिहस्ताय ते नमः ॥
अनन्ताय विरूपाय नमस्ते मधुसूदन ।
नमस्ते देवदेवेश तुभ्यं देव कपर्दिने ॥
नमस्ते राक्षसघ्नाय नमो राघवरूपिणे ।
ज्ञानज्ञेयाय देवाय नम आद्याय विष्णवे ॥
नमस्ते नरसिंहाय दैत्यराजविदारिणे ।
नमस्तुभ्यं वराहाय दंष्ट्रोद्धृतवसुंधर ॥
त्रिविक्रम नमस्तुभ्यं बलियज्ञविनाशन ।
वासुदेवाय देवाय नम कंसविनाशन ॥
नम. सर्वात्मने देव सर्वकर्त्रे नमो नम ॥
प्रसीद देवदेवेश भीतानामभयंकर ॥
नमामि देवदेवेश वरेण्यमभयप्रदम् ।
विष्णो त्वां सकलेशेश त्वां गदाधरमव्ययम् ॥
नमस्ते देवदेवेश भीतोऽहं भवनाशन ।
इति स्तुत्वा जगन्नाथं नृत्यन्निव तदा ज्वर ।
पपात पादयोर्विष्णोर्नि.श्वसन्भीतभीतवत् ॥
प्रसीद विष्णो देवेश पीडितोऽस्मि जनार्दन ।

[D6 om. line 1. — (L. 2) T1 तदा (for स्थित) — T2 G1 रौद्रज्वरः (for ज्वर) — (L 4) D6 सदात्मने (for गदाभृते) G1 नम आद्याय विष्णवे (for ^{b}) — (L 5) T2 -किरणाय (for -च°) — (L. 6) G4 भयान् (for नमो). — (L. 7) D6 उज्जीवय (for उद्गीथाय) G(ed) नमो यज्ञस्वरूपिणे (for ^{b}) — G3 om line 8 — (L 8) G(ed) शङ्खिने (for नमस्ते) G4 5 तुभ्यम् (for नित्यम्). — D6 (marg) M4 read line 11 after line 15 M2, 3 transp lines 11 and 12 — (L 12) G1 पुराणाय गदाभृते (for ^{b}) — (L 14) G(ed) नमोस्त्वादि- (for नमस्तुभ्य). G(ed) क्रोडाधृत- (for दष्ट्रोद्धृत-) — (L 15) T1 G3 M1–3 -विनाशिने (for °शन). — (L. 16) M4 -विनाशिने (for °शन) — D6 om. lines 17–19 — (L 17) G(ed) तुभ्य नारायणाय वै (for ^{b}). — (L 18) G(ed) नमस्ते (for प्रसीद) — M3 om lines 19–23 — (L. 19) T2 G4 5 -द्देवेश (for °शं) — (L. 21) D6 M2, 4 प्रपद्ये (for नमस्ते) G(ed.) शरण त्वा प्रपन्नोऽस्मि (for ^{a}) T1 G3 M1 भीताना (for भीतोऽह) M4 -भावन (for -नाशन). — (L 23) D6 ज्वरो वाक्यमथाब्रवीत् (for ^{b}). — After line 23, G(ed) repeats line 3 of 1339*. Before line 24, T1 M4 ins ज्वर . D6 om line 24. — (L 24) M3 नमामि देवलोकेश (for ^{a})].

8 ^{b}) Ñ1 ऽपि (for तु). — For 8^{ab}, K Ñ2, 3 V B D T1, 2, 4 G1, 3–5 M subst. :

1341* अहमेको ज्वरस्तात नान्यो लोके ज्वरो भवेत् ।

[G4 damaged. V2 एव (for एको) T1, 2 G1 3 5 M3 4 देव , M1 2 लोके (for तात) K1 लोकेश्वरो (for लोके ज्वरो). T1 2 G1 3 5 M भविता प्राणिना हरे (for ^{b})]

— ^{c}) T1 2 G1 3 4 M त्वत्प्रसादेन (for तव प्रसादान्). V3 B1 D6 G5 गोविन्द , T4 देवेश (for नान्य स्याज्) K Ñ2, 3 V1 2 B2, 3 D1 5 त्वत्प्रसादाद्धि देवेश — ^{d}) T 2 G1 3, 4 M2 4 मर्दन (for -शोभन) K Ñ2 3 V B D T4 वरमेतं (K1 °कं) वृणोम्यहम् , G5 नान्यो लोके ज्वरो भवेत् — After 8, K Ñ2 3 V B D T4 G5 ins

1342* देव उवाच ।
एवं भवतु भद्रं ते यथा त्व ज्वर काङ्क्षसे ।
वरार्थिनां वरो देयो भवांश्च शरण गत. ॥

[Some Mss श्रीकृष्ण , some भगवान् ; some वासुदेव (for देव) — G5 om line 2 — (L 2) D3 5 वरार्थिने (D5 °नो) (for °र्थिना) K4 वरदोऽस्मि (for वरो देयो) K1 4 Ñ2 V1 T4 भवाश्च शरणागत (for ^{b})]

9 Some Mss om the ref T1 G3 श्रीकृष्णः (for भगवान्) After the ref , T1 2 G1 3 4 M G(ed) ins :

1343* ततस्तुष्टो हृषीकेश स्तोत्रेणानेन केशवः ।
प्रीतिमांश्चाभवत्कृष्णो रौद्रज्वरमुवाच ह ॥

— ^{b}) K Ñ2, 3 V1, 2 B Dn Ds D1–4 यथा पुरा , D5 ज्वरस्तथा (for यथासुखम्). — After 9^{ab}, T1, 2 G1, 3–5 M ins

1344* अन्तकाले मनुष्याणां भूयाद्रोगाय मामक ।

[T2 G1 5 M4 भूया (for भूयाद्) M3 भूयाद्रै मामको ज्वर (for ^{b})]

— ^{c}) K3 योगमाया- K4 सोऽयं मया , T4 एवं मया (for योऽयं मया) Ś1 V3 D6 T1 2 G3 M1–3 योऽयं ज्वरो मया सृष्टो. — ^{d}) T1 2 G1, 3–5 M इहैव प्रविलीयताम् — After 9, N (except Ś1 Ñ1) T4 G5 G(ed.) ins. ·

1345* वैशंपायन उवाच ।
एवमुक्ते तु वचने ज्वरं प्रति महायशाः ।
कृष्ण. प्रहरतां श्रेष्ठः पुनर्वाक्यमुवाच ह ॥
शृणुष्व ज्वर संदेशं यथा लोके चरिष्यसि ।
सर्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे ॥
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसे ।
चतुष्पादान्भजैकेन द्वितीयेन च स्थावरान् ॥
तृतीयो यश्च ते भागो मानुषेषूपपत्स्यते ।
त्रिधाभूत वपुः कृत्वा पक्षिषु त्वं भव ज्वर ॥
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् ।

योऽयं मया ज्वरः सृष्टो मय्यैवैष प्रलीयताम् ॥ ९

C 10550
B 2 123. 18
P 2. 123 18

एकान्तरश्चतुर्भाग खोरकश्च चतुर्थक ॥
मानुषेष्वथ भेदेन वस त्वं प्रविभज्य वै ।
जातिष्वथावशेषासु निवैस त्वं शृणुष्व मे ॥
वृक्षेषु कीटरूपेण तथा संकोचपत्रक ।
पाण्डुपत्रश्च विख्यात फलेष्वातुर्यमेव च ॥
अपा तु नीलिका विद्याच्छिखोन्भेदश्च बर्हिणाम् ।
पद्मिनीषु हिमो भूत्वा पृथिव्यामपि चोषर ॥
गैरिक पर्वतेष्वेव मत्प्रसादाद्भविष्यसि ।
गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि ॥
एवं विविधरूपेण भविष्यसि महीतले ॥
दर्शनात्स्पर्शनाच्चापि प्राणिनां वधमेष्यसि ।
ऋते देवमनुष्येभ्यो नान्यस्त्वां विसहिष्यति ॥

वैशंपायन उवाच ।

कृष्णस्य वचन श्रुत्वा ज्वरो हृष्टमना ह्यभूत् ।
प्रोवाच वचनं किंचित्प्रणमित्वा कृताञ्जलिः ॥
सर्वजातिप्रभुत्वेन कृतो धन्योऽस्मि माधव ।
भूयश्च ते वचः कर्तुमिच्छामि पुरुषर्षभ ।
तदाज्ञापय गोविन्द किं करोमि महाभुज ॥

[G_5 om the ref — (L 2) K_2 अथाब्रवीत् (for उवाच ह) V_3 B_3 D_8 D_6 वाक्यमाह ज्वर प्रति (D_6 प्रजाहितम्) (for ^{b}) — After line 2, D_8 ins

1345A* देव उवाच ।

एव भवतु भद्र ते यथा त्वं ज्वर काङ्क्षसे ।

— (L 3) $K_{1\,2}$ D_4 लोक्, G_5 केन (for लोके) $\tilde{N}_3$ $V_{1\,2}$ D_8 भविष्यसि, T_4 निवत्स्यसि (for चरिष्यसि) — (L 4) D_2 वै न्यस्य (for विन्यस्तस्) — (L 5) G_5 भापसे (for काङ्क्षसे) — (L 6) G_5 विभज्यैव चतुर्भाग (for ^{a}) G_5 भजैकेन (for द्वितीयेन). — (L 7) G(ed) प्र- (for [उ]प-) — (L 8) D_8 रूपं (for -भूत) $D_{2\,6}$ भज (for भव) G_5 त्रिषु त्व भव च ज्वर (for ^{b}) — (L 9) D_8 ऽय (for यस्) K_1 $\tilde{N}_{2\,3}$ V_2 D_1 ध्रुव (for ध्रुवम्) $K_{3\,4}$ Dn D_5 भविष्यति स ते ध्रुव (for ^{b}) — (L 10) K_4 $\tilde{N}_2$ V $B_{2\,3}$ T_4 एकान्ततश् (for °रश्) K_3 तृतीयस्तु (for चतुर्भाग) Dn D_6 एकाहिको द्व्याहिकश्च, D_3 एकान्तनश्च ते भाग, G_5 एकश्चतुर्भागगत (for ^{a}). Dn D_6 त्र्याहिकश्च, D_1 ऊषरश्च, D_2 घोरकश्च (for खोरकश्च). K_3 Bomb Poona eds G(ed) स वै (K_3 सैव) चातुर्थिको ज्वर (for ^{b}) — (L 11) G_5 om from भेदेन up to थाव (in line 12) K_1 स्वेदेन, K_4 $\tilde{N}_2$ $V_{1\,2}$ D_8 खेदेन, V_3 B D_6 T_4 खेदाय, $D_{2\,3}$ पादेन (for भेदेन) D_1 मानुषेष्वेकस्त्व देहे (for ^{a}) Dn_1 om lines 11^b–12^b K_4 सत्वर प्रभविष्यसि (for ^{b}) — $K_{1\,2}$ D_4 om line 12 — (L 12) D_2 (*sup. lin.* as above) $_5$ वस त्वं च (for निवस त्वं) K_8 Dn_2 तथा शृणु (for शृणुष्व मे) — (L 13) $K_{1\,2}$ $D_{3\,4}$ वृक्षे कोटररूपेण (for ^{a}). T_4 G_5 -यन्त्रक (for -पत्रक) — (L 14) $\tilde{N}_2$ -पत्रैश् (for -पत्रश्) — $K_{3\,4}$ B_1 D_{1-3} T_4 G_5 om line 15 K_2 $\tilde{N}_{2\,3}$ $V_{1\,2}$ B_3 Dn D_{S1} D_6 transp lines 15 and 16 — (L 15) Bomb Poona eds G(ed) शिखोद्भेदेन (for °दश्च) D_5 बर्हिण (for °णाम्) — K_1 V_3 om line 16 — (L 16) Bomb Poona eds G(ed) पद्मिन्यादौ (for °नीषु) — (L 17) K_2 $D_{1\,4}$ मत्प्रभावाद् (for °सादाद्) — After line 17, V_2 reads line 20 V_3 $D_{1\,4}$ om (hapl) line 18 — (L 18) K_4 गोष्ठे (for गोषु) G_5 ज्वरैकश् (for खोर°) — For line 18, K_3 subst

1345B* खुरमान्द्यादि पशुषु तथापस्मारकोऽभवत् ।

— (L 19) D_8 T_4 -विधेन, Bomb Poona eds G(ed) त्व बहु- (for विविध-) V_1 रूपस्त्व, B_1 -रूप ते (for -रूपेण). — After line 19, $K_{1\,4}$ D_4 ins :

1345C* जातिष्वथावशेषासु निवस त्व शृणुष्व मे ।

— G_5 om lines 21–26 K D_{2-4} om lines 20–21 D_1 T_4 om. line 21 $\tilde{N}_2$ transp lines 21 and 22 — (L 21) $V_{2\,3}$ B Dn D_8 D_6 -मनुष्याश्च, D_5 G(ed) °ष्यास्त्वा (for °ष्येभ्यो) — K $\tilde{N}_{2\,3}$ V_1 $D_{1\,4\,5}$ om the ref — (L 22) D_2 ज्वर कृष्णमथाब्रवीत्, D_6 (marg) ज्वरो वचनमब्रवीत् (for ^{b}) — K_3 $\tilde{N}_3$ V Dn_1 D_{1-6} om line 23 — (L 23) B_2 प्रोवाच किंचिद्वचन (for ^{a}) B D_8 प्रणतात्मा (for °मित्वा) — (L 24) B_3 T_4 भूत- (for जाति-) $K_{1\,2}$ D_4 हृष्टो (for कृतो) — (L. 25) D_3 ते वचन (for च ते वच.) V_2 पुरुषोत्तम (for °षर्षभ)]

K $\tilde{N}_{2\,3}$ V B D G_5 cont $T_{1\,2}$ G_1 M ins after 9.

1346* अहमसुरकुलप्रमाथिना
त्रिपुरहरेण हरेण निर्मित. ।
रणशिरसि विनिर्जितस्त्वया
प्रभुरसि मेऽद्य तवास्मि किंकर ॥
वैशंपायन उवाच ।
ज्वरस्य वचनं श्रुत्वा वासुदेवोऽब्रवीद्वच ।
अभिसंधिं शृणुष्वाद्य यत्त्वा वक्ष्यामि निश्चयात् ॥

[(L 1) M_3 -प्रमर्दिना (for प्रमाथिना). T_2 $G_{1\,4\,5}$ $M_{1,3}$ अहमसुर(T_2 °मर)परप्रमर्दिना. — (L 2) D_6 om हरेण $K_{1\,2,4}$ D_4 निर्मित पुराहम् (for हरेण निर्मित) — (L 3) $K_{1\,2}$ $\tilde{N}_{2\,3}$ V_1 $D_{2\,4}$ त्वयाह (for त्वया). — (L. 4) T_2 M_4 देव (for मेऽद्य) G_4 M_4 [अ]द्य (for [अ]स्मि) K_1 प्रभुरसि तदास्मि किं करोमि — After line 4, T_2 G_1 M_4 ins. 1348* $\tilde{N}_{2,3}$ V B_1 D_8 T_1 read lines 5–6 (with ref.)

ज्वर उवाच ।
धन्योऽस्म्यनुगृहीतोऽस्मि यत्त्वया मत्प्रियं कृतम् ।
आज्ञापय प्रियं किं ते चक्रायुध करोम्यहम् ॥ १०
भगवानुवाच ।
महामृधे तव मम च द्वयोरिमं
पराक्रमं भुजबलकेवलाश्रयोः ।
प्रणम्य मामेकमनाः पठेत्तु यः
स वै भवेज्ज्वर विगतज्वरो नरः ॥ ११
एवमुक्तस्तु कृष्णेन ज्वरः साक्षान्महात्मना ।
प्रणम्य शिरसा कृष्णमपक्रान्तस्ततो रणात् ॥ १२

इति श्रीहरिवंशे एकादशोत्तरशततमोऽध्यायः ॥ १११ ॥

---

after 10 Ñ1 B2 D6 G1 3 4 M1–3 om lines 5–6 G5 om line 5 K2–4 V1 3 Dn D1–5 T1 4 om the ref G5 श्रीभगवान् (for वैशंपायन) Ds1 repeats line 5 after 10 —(L 6) K1 2 D4 (marg as above) अविश्रब्ध , D3 अभिप्राय (for °साधं)]

T1, 2 G1 3 5 M G(ed) cont

1347* युवां ज्वरौ च भवतां पीडायां मरणे तथा ।
पीडायां च भवान्स्वामी मरणे मामकस्तथा ॥
इहैव लीयता तावज्ज्वरो मामक एव हि ।

[(L 1) M1–3 ज्वरपते (for च भवता) T1 G3 M1–3 मारणे (for म°). —(L 3) M1 3 स्थीयता (for ली°) T2 G1 5 M4 तात (for तावज्)]

10 K Ñ1 B Dn D1 4 6 M4 om the ref D2 3 T4 G4 om 10 — [b]) Ś1 [अ]पि प्रियं , T1 G3 M2 तु प्रियं (for मत्प्रियं) K1, 2 D1 4 यत्प्रियं मे त्वया कृतम् — After 10, Ñ2, 3 V B1 Ds T1 read lines 5–6 of 1346*. T1 G3 5 M1–3 ins after 10 . T2 G1 M4 after line 4 of 1346* .

1348* स्तुवन्मां भक्तियुक्तेन स्तोत्रेणानेन मानवः ।
ज्वरदेवावयो सम्यक्चिन्तयन्युद्धमद्भुतम् ।
न तस्य ज्वरसंजाता पीडा भुवि भविष्यति ॥

[(L. 1) T1 G3 M1–3 -युक्तो य (for -युक्तेन). T1 G3 माधव (for मानव). —(L 2) T1 G3 M1–3 ज्वरयोर्युवयो सम्यक् (T1 सर्वान्) (for [a]) M1–3 उत्तमम् (for अद्भुतम्) T1 चिन्तयन्याति मामकम् (for [b]) — M2 om line 3]

11 K3 V2 D6 T4 कृष्ण , Ñ2 D5 वासुदेव ; T2 G1 3–5 M om (for भगवान्) — [a]) K1 Ñ2, 3 V B Dn D8 D1 3 5 M4 महाहवे (for °मृधे) Ñ1 इव , K4 D6 इदं (for इमं) K3 D1 G5 महाहवे तव मम युद्धयोरिमं (G5 °ध्यतोर्द्वयो) — Ś1 om 11[bcd]. — [b]) K4 om , D3 तुमुल- (for पराक्रम) — [c]) K3 4 मां नियतमना , D1 चैकमना , T2 G4 मामचलमनाः ; G1 मामचलः (for मामेकमना) D3 T1 G1, 5 M4 पठेत (for °त्तु°). — After 11, Ś1 K1, 3 Ds1 (marg.) D4, 5 (marg.) ins. :

1349* त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचन ।
स मे प्रीतः सुख दद्यात्सर्वामयपतिर्ज्वरः ॥
आद्यन्तवन्त कवय पुराणाः
सूक्ष्मा बृहन्तोऽप्यनुशासितारः ।
सर्वाञ्ज्वरान्घ्नन्तु ममानिरुद्ध-
प्रद्युम्नसंकर्षणवासुदेवाः ॥

[K1 om lines 1–2. K2 D4 transp lines 1–2 and 3–6. — (L 1) Ś1 त्रिशिरो (for °रा) Bom Poona eds G(ed) नव- (for रक्त-). — (L 4) Ds1 भवन्तो (for बृहन्तो). Ś1 K1 Ds1 D4 हि (for ऽपि) — (L 5) Ś1 सर्व- (for सर्वाञ्)]

12 K3 om 12 Before 12, some Mss ins. ज्वरः ; some वैशंपायन , some कृष्ण. . — [b]) Ñ1 2 V3 Dn Ds D6 महाबलः , D1, 2 5 °मना. (for °त्मना) Ś1 ज्वरोवाचैवमस्त्विति — After 12[ab], K1 2 4 Ñ2 3 V B D T4 G5 M4 G(ed) ins .

1350* प्रोवाच यदुशार्दूलमेवमेतद्भविष्यति ॥
वरं लब्ध्वा ज्वरो हृष्टः कृष्णाच्च समयं पुनः ।

[(L, 2) Ñ3 V1 D1, 3 कृत्वा (for कृष्णाच्च)]

While T1, 2 G1, 3 4 M1–3 ins after 12[ab] :

1351* एवमस्त्विति गोविन्द बभाषे केशवं तदा ।

— D6 reads 12[c] on marg — [c]) D2 सहसा (for शिरसा). T1, 2 G1 3–5 M विष्णुम् (for कृष्णम्). — After 12[c], T1, 2 G1, 3–5 M ins

1352* भक्तानामभयंकरम् ।
वासुदेवं महात्मानं

— [d]) K4 ज्वरोऽगच्छत् ; B1 (marg as in text) अपयातस् ; D5 अपाक्रामत् , M4 अपक्रामंस् (for °क्रान्तस्) Ñ1 तदा रणात् ; D1 रणात्ततः (by transp).

COLOPHON om. in Ś1 Ñ1 T3 G2 missing — *Mention of the Epic* : Ds2 D5. — *Mention of Khila* : K1, 4 Ñ3 V B Dn2 Ds D1, 3. — *Sub-parvan* : D3 पारिजात. — *Adhy. name* : K1 ज्वरपराक्रमः ; K2 B1 D4 ज्वरापक्रमः

११२

वैशंपायन उवाच ।
ततस्ते सहिताः सर्वे त्रयस्त्रय इवाग्नयः ।
वैनतेयं समारुह्य युध्यमाना रणे स्थिताः ॥ १
ततः सर्वाण्यनीकानि बाणवर्षैर्महाबलाः ।
अर्दयन्वैनतेयस्था नदन्तोऽतिबला रणे ॥ २
चक्रलाङ्गलपातैश्च बाणवर्षैश्च पीडितम् ।
संचुकोप महानीकं दानवानां महात्मनाम् ॥ ३
कक्षेऽग्निरिव संवृद्धः शुष्केन्धनसमीरितः ।
कृष्णबाणाग्निरुद्धूतो विवृद्धिमुपगच्छति ॥ ४
स दानवसहस्राणि तस्मिन्समरमूर्धनि ।
युगान्ताग्निरिवार्चिष्मान्दहमानो व्यराजत ॥ ५
तां दीर्यमाणां महतीं नानाप्रहरणोद्यताम् ।
सेनां बाणः समासाद्य वारयन्वाक्यमब्रवीत् ॥ ६
लाघवं समुपागम्य किमेवं भयविक्लवाः ।
दैत्यवंशसमुत्पन्नाः पलायध्वं महामृधे ॥ ७
कवचासिगदाप्रासान्खड्गचर्मपरश्वधान् । C 10579 B 2 124 8 P 2 124 8

(B1 °मणम्), K3 4 ज्वराभिभव , Ñ2 3 V B3 D8 D2 बाण-युद्धे ज्वरापक्रम (V2 ज्वरपराजयः), B2 बाणयुद्धे कृष्णवध.; Dn ज्वरयुद्धे ज्वरानुग्रह· , D1 ज्वरयोर्युद्धं ज्वरवरप्रदानम्, D3 M2 बाणयुद्धम् , D6 ज्वरानुग्रह , D8 बाणयुद्धे ज्वरपराक्रम· , T1 G3 माहेश्वरस्तुति , T2 G1 माहेश्वरज्वरस्तुति· — *Adhy no* K3 173 , Ñ3 V1 180 , V2 182 , V3 Ds2 179 , D1 171 , D3 196 , D4 178 , T1 G3 258 , T4 229 , G1 260 , G4 262 , G5 260 , M1–3 222 ; M4 221 — *Śloka no* K1 54 , Ds2 37 , D3 35 , D4 36

112

☞ This adhy is missing in T3 (cf v 1 99 21) and also in G2 (cf v 1 110 21)

1 Ś1 Ñ1 D5 T4 om the ref —ᵃ) K Ñ2 3 V1 B1 D8 D1–5 T4 तु (for ते) K Ñ2 3 V B T1 त्वरिता. (for सहिताः) —ᶜ) N (except Ś1 Ñ1) T4 अथारुह्य (for समा°) —ᵈ) M1–3 व्यवस्थिता· (for रणे स्थिता·) K Ñ3 V1 2 B D1–5 T4 युध्यन्ते रणमूर्धनि

2 ᵇ) N (except Ś1) T4 G5 अवा(D3 समा)किरन् (for महाबला·) —ᶜ) D8 अथ ते (for अर्दयन्) Ñ3 V2 3 B2 D8 D2 6 अर्दयन्तो गरुत्मस्था , T2 °यंन्वैनतेयस्थं —ᵈ) K4 नमन्तो , T2 वहन्तो , T4 नदंन्तो , G3 M1–3 दहन्तो (for नदन्तो) K2 3 Ñ2 B1 Ds1 D4 G4 -बलाद्रणे , Ñ1 बलाद्विषः , V2 -महारणे ; G1 -बले रणे (for -बला रणे) K1 T1 M4 दह(K1 दंशि)तोऽतिबलान्र(T1 °द्र)णे

3 ᵃ) Ś1 -घातैश्; T1 2 G1 3–5 M -खड्गैश् (for -पातैश्) —ᵇ) Ñ2 D5 (also as in text) T4 च पीडयन् ; D1 त्वपीडितम् ; G1 प्रपी° (for च पी°) —ᶜ) B1. 3 संचुकोच (for °कोप). Ś1 महावीर्यं ; V3 D6 तदानीकं (for महा°) T1 2 G1 3 5 M संचुक्षोभ तदानीकं , T4 G4 संचुक्षोभ बलं सर्वं —ᵈ) K Ñ2 3 V1 2 B D (except D6) T4 दुरासदम् , T1 2 G1. 3–5 M महारणे (for °त्मनाम्)

4 ᵃ) Ś1 कक्षाग्निर् (for कक्षेऽग्निर्) Ś1 K4 D1 T2 G1 4. 5 M4 सक्रुद्ध (for संवृद्ध) —ᵇ) Ś1 शुष्कानिल-; T1 G1 3–5 समीरण- (for शुष्केन्धन-) T4 -समागत. (for -समीरितः) —ᶜ) K2 उद्वृत्तो , K3 4 V2 3 Dn2 D4 5 T1 G3 M1–3 उद्धूतो (for उद्भूतो) Ñ1 V1 D8 D1–3 G1. 4 कृष्णबाणाग्निर्धूतो , B1 2 D6 T4 M4 °निलोद्धूतो , T2 °ग्निनिर्दग्धो —ᵈ) N (except Ś1) T4 G5 विवृद्धिं परमां गत ; T2 धूर्तो वृद्धिमगच्छत

5 ᵃ) N (except Ś1 Ñ1 B3) T1 4 G5 दानवानां (for स दानव-) —ᵇ) M1–3 हत्वा (for तस्मिन्) T1 2 G1 3–5 M4 सङ्ग्राम- (for समर-) —ᵈ) K2 Ñ2 3 V1 2 D4. 5 दह्यमानो , V3 D6 T4 G5 दहन्वै स (for °मानो) T1 2 G3 4 M1–3 व्यरोचत (for व्यराजत) Ś1 ददाहान्तकसंनिभ , Ñ1 G1 दहन्वै स (G1 °ह्यमानो) व्यरोचत — After 5, T1 2 G1 3–5 M ins

1353* तत्राशीतिसहस्राणि नागानां निहतानि च ।
लक्षं च रथवृन्दं तु हत केशवसायकै ॥
अश्वाना शतसाहस्रमयुत पत्तिनां तथा ।
निःशेषिताथ सा सेना पलायनपराभवत् ॥

[(L. 3) G4 5 M4 -साहस्रैर् (for °स्रम्) T2 G1 3 अर्बुद , M3 नियुत (for अयुत). M1 2 हतम् (for तथा)]

6 ᵃ) Ś1 कीर्यमाणां , T1 शीर्य° , G1 दीप्य° (for दीर्य°). —ᵇ) N (except Ś1) नानाप्रहरणार्दिताम् —ᶜ) T1. 2 G1. 3–5 M समुद्वीक्ष्य (for समासाद्य)

7 G5 om 7 —ᵃ) V2 लाघवं समुपास्थाय —ᵇ) N (except Ś1 Ñ1 V3 D3 6) T4 किमर्थं (for किमेवं) Ś1 D1 -विह्वला (for -विक्लवाः) G1 किमेवं भयमेव च. —ᶜ) K1. 2

उत्सृज्योत्सृज्य गच्छन्ति किं भवन्तोऽन्तरिक्षगाः ८
स्वजातिं चैव त्रासं च हरसंसर्गमेव च ।
मानयद्भिर्न गन्तव्यमेषो ह्यहमवस्थितः ॥ ९
एवमुच्चारितां वाचं शृण्वन्तस्तामचिन्त्य वै ।
अपक्रामन्त ते सर्वे दानवा भयपीडिताः ॥ १०
प्रमाथगणशेषं तु तदनीकपुरःसरम् ।
भग्नावशेषं युद्धाय मनश्चक्रे पुनस्तदा ॥ ११
कुम्भाण्डो नाम बाणस्य सखामात्यश्च वीर्यवान् ।
बलं भग्नं समालोक्य वचनं चेदमब्रवीत् ॥ १२
एष बाणः स्थितो युद्धे शंकरोऽयं गुहस्तथा ।
किमर्थं युद्धमुत्सृज्य भवन्तो भयमोहिताः ॥ १३
नन्दीश्वरसमायुक्तं रथमास्थाय वीर्यवान् ।

Ñ2 3 V1 3 B D (except Dn) T4 दैत्यवंशे (for °वंश-). — d) T2 G1 पलायथ (for °यध्व) K Ñ2 3 V B D T4 महाहवात् (K2 D5 °हवे, Ñ2 °बलाः) (for °मृधे).

8 a) Ś1 कवचानि (for °सि-). K Ñ V B Dn Ds D3-6 T1 2, 4 G1 3-5 -प्रास-, D1 2 -पाश- (for -प्रासान्). — b) V2 शङ्कु- (for खड्ग-) — c) D3 समुत्सृज्य विगच्छन्ति.

9 a) K2 Ñ3 V1 B1 (marg) 3 Ds D1 4 6 T4 भावं (for त्रासं) G5 स्वजातिं च स्वभावं च. — c) D3 T1 G1 3 5 मानवद्भिर् (for °यद्भिर्) — d) D3 T2 G1, 3 4 ऽस्मि (for हि)

10 a) K Ñ2 V1 2 Dn Ds D1-4 T4 वाक्यं (for वाचं) — b) Ñ1 अचिन्तयन् (for °न्त्य वै) K Ñ2, 3 V1 B2 Dn Ds D1 3 4 शृण्वन्तस्तदचिन्तयन् — d) N (except Ś1) T4 -मोहिता (for -पीडिता)

11 b) K Ñ2 3 V B D G5 तदनीकमतिष्ठत, Ñ1 °मशेषतः, T4 स्वैरनीकैरतिष्ठत — D1 transp 11cd and 12ab. — d) N (except D1) T4 M4 पुनश्चक्रे मनस्तदा

12 D1 transp. 11cd and 12ab. — b) Ś1 D1 महामात्यश्, Ñ1 सखा मान्यश् (for सखामात्यश्). — D1 om. 12c–13d — c) T1 2 G1 4, 6 भग्नं बलं (by transp) K Ñ2 3 V1 2 B D (except D5, D1 om) T4 G3 भग्नं स्वबलमालोक्य. — d) Ś1 K Ñ2, 3 V1, 2 B Dn Ds D2-4 T1 2 4 इदं वचनमब्रवीत्

13 D1 om 13 (cf. v. l. 12) — b) G6 ऽथ (for ऽयं). — c) K Ñ2 3 V1 2 B Dn Ds D2-4 T4 G3 बलम्; Ñ1 सर्वम्, V3 D5 6 सत्त्वम्, G4 5 भयम् (for युद्धम्). — d) K Ñ2 3 V1 2 D (D1 om) T1 4 G3 यान्ति (for भय-) Ś1 भवन्तं युद्धमोहिताः; V3 °न्तो यान्ति मूर्छिताः. — After 13, Ñ2 B Dn Ds D5 ins.

1354* प्राणांस्त्यक्त्वा च युध्यध्वं सर्वे दानवपुंगवाः ।

[B2 Dn Ds D5 पलायन्ते (B2 °ध्वं) (for च युध्यध्वं). D5 सत्तमाः (for -पुंगवाः).]

B1 2 cont.

1355* एवं संस्तूयमानास्ते कुम्भाण्डेन महात्मना ।
नैव तस्तम्भिरे दैत्याः पलायन्त समन्ततः ॥

B1 2 cont Ñ2 B3 Dn Ds D5 cont after 1354*. K V D2-6 T4 G(ed.) ins after 13

1356* एवं कुम्भाण्डवाक्यं ते शृण्वन्तो भयविह्वलाः ।
चक्राग्निभयवित्रस्ताः सर्वे यान्ति दिशो दश ॥
भग्नं बलं ततो दृष्ट्वा कृष्णेनामिततेजसा ।
सरक्तनयनः स्थाणुर्युद्धाय पर्यवर्तत ॥
बाणसंरक्षणं कर्तुं रथमास्थाय सुप्रभम् । [5]
देवः कुमारश्च तथा रथेनाग्निनिभेन वै ॥

[B1 om line 1 — (L 1) V2 -वचन (for -वाक्यं ते) K1 3 D2 -विक्लवा, Cal ed -मोहिता (for -विह्वला.) V1 3 B2, 3 D5 6 शृण्वन्तोऽपि भयार्दिता (for b). — (L 2) Bom Poona eds G(ed) एकान्ते (for चक्राग्नि-). V3 B3 D5 6 -सविग्ना, B2 D2 3 -सत्रस्ता (for -वि°) — (L 3) V3 D5, 6 बाणानीकं हतं दृष्ट्वा (for a). D3 कृष्णेनाक्लिष्टकर्मणा (for b) — (L 4) V2 क्रुद्धो (for स्थाणुर्) K1 2 D4 युद्धार्थं (for °य). K4 V2 T4 युद्धाय परिवर्तते (for b). — (L 5) K4 सस्थाय (for आ°) — (L. 6) Bom. Poona eds G(ed) -समेन (for -निभेन).]

While after 13, T1, 2 G1 3-5 M ins an addl. colophon [*Adhy. name* T2 G1 कृष्णेन बाणसेनाविनाश : G3 बाणसेनाविमोचनम्, M4 बाणयुद्धम् — *Adhy no.*: T1 G3 259; T2 G1 5 261; G4 263; M1-3 223, M4 222] and cont.:

1357* वैशंपायन ।
ततः क्रुद्धो हरः साक्षाद्गदी खड्गी परश्वधी ।
शूली निषङ्गी कवची बाणी कार्मुकवाञ्शिवः ॥

14 a) D1 युक्तं रथं समास्थाय. — b) T1, 2 G1 3-5 M शंकर (for वीर्यवान्) D1 संप्रतस्थेऽतिवीर्यवान्. — c) K1, 2 D4 क्रुद्धः (for रुद्र.). — d) K1 3 4 Ñ3 V1, 2 B Dn Ds D2, 3 5 6 T4 प्राधावत, Ñ1 2 V3 D1 प्रधावत (for प्रधावति). K2 प्राधावच्च ततो हरम्, D3 प्राद्रवच्च यतो हरिः. — After 14, T1 2 G1, 3-5 M ins.

1358* तस्यानुयाता वेताळाः पिशाचाश्चान्त्रमालिनः ।
पिबन्तः शोणितं भूयः कराला निर्णतोदराः ॥
[(L 1) T1 -भूता (for -याता).]

15 G6 reads 15 after line 15 of 1359*. — a)

संदष्टौष्ठपुटो रुद्रः प्रधावति यतो हरिः ॥ १४
पिबन्निव तदाकाशं सिंहयुक्तो महास्वनः ।
रथो भाति घनोन्मुक्तः पौर्णमास्यां यथा शशी ॥ १५

वैनतेयस्थमस्यन्तमायान्तमग्रणीर्हरः ।
हरिं विव्याध कुपितो नाराचानां शतेन सः ॥ १६
स शरैरर्दितस्तेन हरेणामित्रघातिना । C 10600 B 2. 124. 28 P 2 124. 28

$K_{3\ 4}$ Dn D_{1-3} यथाकाश , $T_{1\ 2}$ $G_{1\ 3-5}$ M महा° (for तदा°) — [b]) V_2 T_4 महाबल , $T_{1\ 2}$ G_3 M_5 ऽथ शूलिन (for महास्वनः) — [c]) $\tilde{N}_1$ श्चेति (for भाति) $Ś_1$ सरोयुक्त (sic), D_2 घनैर्मुक्त. , $T_{1\ 2}$ $G_{1\ 3-5}$ समायुक्त , M_{1-3} मनोवेगी , M_4 मनोयुक्त (for घनोन्मुक्त) — [d]) $K_{3\ 4}$ $\tilde{N}_2$ D_1 पूर्णमास्यां (for पौर्ण°) $Ś_1$ D_5 $T_{1\ 2}$ $G_{1\ 3-5}$ शशी यथा (by transp). — After 15, N (except $Ś_1$ $\tilde{N}_1$) T_4 G_5 ins

1359* ततो गणसहस्रैस्तु नानारूपैर्भयावहैः ।
नदद्भिर्विविधान्नादान्रथो देवस्य सोऽभ्ययात् ॥
केचित्सिंहमुखास्तत्र तथा व्याघ्रमुखाश्च ह ।
नागाश्वोष्ट्रमुखास्तत्र प्रावेपन्नभिपीडिताः ।
व्यालयज्ञोपवीताश्च केचित्तत्र महाबलाः ॥
खरोष्ट्रगजवक्त्राश्च अश्वग्रीवाश्च संस्थिताः ॥
छागमार्जारवक्त्राश्च मेषवक्त्रास्तथा परे ।
चीरिणः शिखिनश्चान्ये जटिलोर्ध्वशिरोरुहाः ॥
भग्नाः परिपतन्ति स्म शङ्खदुदुभिनिस्वनैः ।
केचित्सौम्यमुखास्तत्र दिव्यैः शस्त्रैरलंकृताः ॥
नानापुष्पकृतापीडा नानाप्रहरणायुधाः ।
वामना विकटाश्चैव सिंहव्याघ्रपरिच्छदाः ।
रुधिरार्द्रमहादंष्ट्रा महामांसबलिप्रियाः ॥
देवं संपरिवार्याथ महाशत्रुप्रमर्दनम् ।
लीलायमानास्तिष्ठन्ति सग्रामाभिमुखोन्मुखाः ॥
ततो दिव्यं रथं दृष्ट्वा रुद्रस्याक्लिष्टकर्मणः ।
कृष्णो गरुडमास्थाय ययौ रुद्राय संयुगे ॥

[G_4 om lines 1-9 — (L 1) D_3 वृतो (for ततो) V_2 D_3 भयानकैः (for °वहैः) — (L 2) $\tilde{N}_3$ $V_{1\ 2}$ $D_{1\ 3}$ नदन्तो (for नदद्भिर्) $K_{3\ 4}$ V_1 Dn T_4 शोभयन् (for सोऽभ्ययात्). $\tilde{N}_2$ V_2 D_1 रथं देवस्य शोभयन् , D_3 मृधे देवस्य ते गणाः (for [b]) — (L 3) V_3 B_1 $D_{3\ 5\ 6}$ केचिद् (for तथा) K_4 Ds च ये ; V_3 तथा , Bom Poona eds G(ed) परे (for च ह) — (L 4) D_2 अश्ववक्त्राश्च नागास्या (for [a]) $\tilde{N}_2$ V_3 Ds D_5 प्रवेपन्तो , D_2 प्रापतन् (for प्रावेपन्) K_1 D_6 प्रावेपन्त निपीडिता , K_4 वेपयन्नतिपी° , V_2 प्रावेपन्त च पी° , B_1 प्रधावन्नतिपी° , B_3 प्रावेपन्नथ पी° , D_1 युध्येरन्नति° ; D_3 जटिलोर्ध्वशिरोरुहा (for [b]) — After line 4, D_3 reads line 9 — (L 5) D_3 आस्फोटयन्ति बाहूंश्च (for [a]) K_3 om (hapl) lines 5^b–6^a B_1 महारथा (for °बला) — (L 6) K_1 -खर- , $\tilde{N}_2$ $V_{1,3}$ $D_{5\ 6}$ -खग- , Dn -शिखि- , D_3 -श्वान- (for -गज-). D_2 खरोष्ट्रश्वानवर्णाश्च (for [a]) T_4 तथा परे (for च संस्थिताः) — (L. 7) V_3 $D_{2\ 5\ 6}$ छागगोमायुमार्जार- (for [a]) D_3 -ग्रीवास् (for -वक्त्रास्) — (L 8) $K_{3,4}$ B_2 Dn_2 Ds D_5 जटाल्ोर्ध्व- (for जटि°) D_3 भस्मोद्धूलितविग्रहा (for [b]). — (L 9) $K_{1\ 3\ 4}$ B_1 Dn लग्ना , $V_{1\ 3}$ $B_{2\ 3}$ Ds $D_{1-3\ 6}$ T_4 नग्ना (for भग्ना) D_3 -निस्वना (for °नैः) — D_3 om. lines 10–11 — (L 10) V_3 B_3 $D_{5\ 6}$ G_5 अस्त्रैर् (for श°) — (L 11) K_4 नानाप्रहरणाङ्किता (for [b]) — (L 13) $\tilde{N}_2$ V_2 D_1 रुधिरार्द्रा (for °र्द्र-) $K_{1\ 2\ 4}$ V_1 D_{2-4} T_4 रुधिरार्द्रैर्महादंष्ट्रैर् , Dn °द्रैर्महावक्त्रैर् (for [a]) $K_{1\ 2}$ $D_{1\ 4}$ केचित्केचिद् ; $K_{3\ 4}$ Dn D_3 महादंष्ट्रा (for महामास-) — (L 14) $K_{1\ 3}$ $\tilde{N}_2$ V_1 Dn $D_{2\ 4}$ देवेश (for देव स-) — (L 15) D_1 सयुगाभिमुखोन्मुखा (for [b]) — After line 15, G_5 reads st. 15 — (L 17) $D_{3\ 6}$ T_4 G_5 युद्धाय (for रुद्राय). $K_{1\ 2}$ D_4 सगरे (for सयुगे)]

16 [a]) V_3 Bom Poona eds G(ed) आस्यन्तम् ; D_2 आसक्तम् (for अस्यन्तम्) — [b]) D_1 मायिनाम् (for आयान्तम्) $K_{1\ 3\ 4}$ $\tilde{N}_{2\ 3}$ $V_{1\ 3}$ B Dn Ds $D_{2,5\ 6}$ T_4 त्वग्रणीर् (for अ°) K_2 आयान्तमग्रणीं हरि , $T_{1\ 2}$ $G_{1\ 3-5}$ मायां तत्राभ्यगाद्धरिम् , M_{1-3} मायां तं चाग्रहीद्धरः , M_4 आयान्तं त्वग्रहीद्धरिम् — After 16^{ab}, $T_{1\ 3}$ $G_{1\ 3-5}$ M G(ed.) ins

1360* तिष्ठ तिष्ठेति चोवाच क्रुद्धोऽहंकारगर्वितः ॥
भगवानपि गोविन्दः स्मयन्निव च संस्थितः ।
स्थितोऽस्मि तव सग्रामे यथेष्टं क्रियतामिति ॥

[(L 2) T_1 G_3 M_{1-3} स स्मयन्निव संस्थितः (for [b]) — (L 3) T_1 भव (for तव)]

— [c]) K_1 D_2 हरं , K_2 अरिं (for हरिं) $Ś_1$ समरे (for कुपितो) Bom Poona eds G(ed) विव्याध कुपितो बाणैर्. — [d]) $Ś_1$ D_5 च , T_4 ह (for सः)

17 [b]) D_3 रुद्रेण , T_1 शूलिना (for हरेण). K $\tilde{N}_{1,3}$ $V_{1,3}$ B Dn Ds $D_{1\ 4\ 6}$ T_4 कर्षिणा (for -घातिना). $\tilde{N}_2$ हरिणामित्रकर्षिणा , Bom Poona eds G(ed) हरेणाक्लिष्टकर्मणा — [c]) D_1 परि- (for हरिर्) $Ś_1$ परिजग्राह रुषितः , $K_{1\ 2}$ D_4 जग्राह कुपितो ह्यस्त्रं — [d]) $K_{1\ 2}$ D_1 हरिः (for ह्यस्त्रं) $Ś_1$ पर्जन्यास्त्रं सुदुर्जयम् , D_4 हरिः सायज्यमुत्तमम् (sic). — N (except $Ś_1$ $\tilde{N}_1$) T_4 G(ed) ins after 17 : T_2 $G_{1,4\ 5}$ after the first occurrence of 18

1361* प्रचचाल ततो भूमिर्विष्णुरुद्रप्रपीडिता ॥
नागाश्चोर्ध्वमुखास्तत्र विचेलुरभिपीडिताः ।
पर्वताः प्रस्रुतास्तत्र जलधाराभिराप्लुताः ॥
केचिन्मुमुचिरे तत्र शिखराणि समन्ततः ।
दिशश्च विदिशश्चैव भूमिराकाशमेव च ॥
प्रदीप्तानीव दृश्यन्ते स्थाणुकृष्णसमागमे ।

हरिर्जग्राह कुपितो ह्यस्त्रं पार्जन्यमुत्तमम् ॥ १७
ततः शतसहस्राणि शराणां नतपर्वणाम् ।
निष्पेतुः सर्वतो दिग्भ्यो यतो हरस्ततस्ततः ॥ १८
अथाग्नेयं महारौद्रमस्त्रमस्त्रविदां वरः ।
मुमोच रुषितो रुद्रस्तदद्भुतमिवाभवत् ॥ १९
ततो विशीर्णदेहास्ते चत्वारोऽपि समन्ततः ।
नादृश्यन्त शरैश्छन्ना दह्यमानाश्च वह्निना ॥ २०
सिंहनादं ततश्चक्रुः सर्व एवासुरोत्तमाः ।
हतोऽयमिति विज्ञाय आग्नेयान्तर्हिते हरौ ॥ २१
ततस्तद्विषहित्वाजौ ह्यस्त्रमस्त्रविदां वरः ।

समन्ततश्च निर्घाता पतन्ति धरणीतले ॥
शिवाश्चैवाशिवान्नादान्नदन्ते भीमदर्शनाः ।
वासवश्चानदद्घोरं रुधिरं चाप्यवर्षत ॥
उल्का च बाणसैन्यस्य मुखान्यावृत्य तिष्ठति ।
न ववौ मारुतश्चापि ज्योतींष्याकुलतामियु ।
प्रभाहीनाश्च ओषध्यो न चरन्त्यन्तरिक्षगाः ॥
एतस्मिन्नन्तरे ब्रह्मा सर्वैर्देवगणैर्वृतः ।
त्रिपुरान्तकमुद्यन्तं ज्ञात्वा रुद्रमुपागमत् ॥
गन्धर्वाप्सरसश्चैव यक्षा विद्याधरास्तथा ।
सिद्धचारणसंघाश्च पश्यन्तोऽथ दिवि स्थिता ॥
तत पार्जन्यमस्त्रं तत्क्षिप्तं रुद्राय विष्णुना ।
ययौ ज्वलन्नथ तदा यतो रुद्रो रथे स्थित ॥

[T2 om lines 1–12 G4 om lines 1–11 G1 om lines 2–12. —(L 2) G5 नराश् (for नागाश्) V3 प्रचेलुर्, D6 प्रचेरुर् (for विचेलुर) B2 अथ; D3 5 T4 G6 अति- (for आभि-). D1 निश्चेलुरतिपीडिता (for ^{b}) —(L 3) D5 प्रस्नुवुस्; Bom Poona eds G(ed) पतितास् (for प्रस्रुतास्) D3 अर्दिता (for आप्लुता) — T4 om line 4 —(L 4) K2 D4 शिबिराणि (for शिख°) —(L 5) K3 4 V2 B2 D2 3. 5 T4 प्र- (for वि-) —(L 7) G5 नि सृता (for निर्घाता). —(L. 8) K2 D4 [अ]शिव राव (for [अ]शिवान्नादान्) K2 D4 वदन्ते, D1 T4 G5 नदन्तो (for °न्ते) — D1 om. lines 9–10. —(L. 9) D3 तदा (for [अ]नदद्). V2 मेघाश्चापि नदन्घोर (for ^{a}) —(L 10) K1 2 4 D3. 4 मुखेन; K3 Dn पुच्छेन (for मुखानि). —(L. 11) D3. 4 (*sup. lin.*) प्र- (for न). K3 Ñ2 V1 2 D3 D2. 3. 5 T4 ययु.; V3 B1 3 D6 ययात् (for ययु) —(L 12) V2. 3 B D5. 6 तथौषध्यो (for च ओ°). —(L 13) Ñ2 V3 B3 D1 3 5 6 T2 G1. 4 5 सर्व- (for सर्वैर्). T2 G1 5 सह; T4 युतः; G4 सदा (for वृत). —(L 14) G5 उद्युक्त (for उद्यन्तं). T2 G1. 4 G(ed) त्रिपुरान्तकविष्णोश्च, T4 अन्तकान्तकमुद्यन्त (for ^{a}) T2 G1 4 युद्ध द्रष्टुं समभ्ययात् (for ^{b}). —(15) D3 गन्धर्वा राक्षसाश्चैव (for ^{a}) — T2 G1. 4 om. lines 16–18 —(L 16) D2 सिद्धाश् (for सिद्ध-). D1 दिवि स- (for ऽथ दिवि). —(L 18) K1 B1. 3 D3 D2 5 ज्वलदथ; D4 ज्वलन्दिवि (for °न्नथ) K3. 4 V2 B3 रुद्रो रथ-, V3 B1 D3 D6 रुद्ररथ- (for रुद्रो रथे) D1. 5 T4 यतो (T4 स च) रुद्रो व्यवस्थितः (for ^{b}).]

18 T2 G1 4 5 read 18 for the first time before 1361* T2 G1 4 (second time) om 18^{ab} —^{b}) Ś1 V3 D6 शराणां तिग्मतेजसाम्, Ñ1 सहस्राणां शतानि च, T1 2 G1 3 4 5 (both times) M प्रयुतान्यर्बुदानि च —^{c}) N (except Ś1) T2 (second time) 4 G1 (second time) 3 4 5 (last two second time) निपेतु (for निष्पेतु.). —^{d}) K1–3 Ñ2 V2 3 B D T4 यतो हररथस्थि(Ñ2 °थे स्थि-; V3 D3 D6 °थस्त)त, K4 यतो रुद्रो रथस्थित, V1 यतो हरबलस्थित; T2 G1 4 (all first time) यतो हरिहरौ तत, G5 (both times) M4 यतो हर इतस्ततः.

19 ^{a}) T2 G4 तथा, G1 तदा (for अथ) —^{b}) D3 ह्यस्त्रम् (for अ°) — S1 om (hapl) 19^{c}–22^{b} —^{c}) Ñ2 तत्र, B2 शंभुस् (for रुद्रस्) — After 19, K Ñ2 3 V B D S ins

1362* ततो विशीर्णदेहास्ते चत्वारोऽपि समन्ततः ।

20 Ś1 om 20 (cf v l 19) —^{a}) D2 विदीर्ण (for विशीर्ण-) V3 D6 हतविध्वस्तदेहास्ते, T1 2 G1 3–5 M बाणैर्विकीर्ण° —^{b}) V3 D6 महाबला (for समन्तत). —^{c}) D6 शरै रुद्धा, T1. 2 G1 3–5 M शरघातैर् (for शरैश्छन्ना). —^{d}) Ñ1 शराग्निना (for च वह्निना). — After 20, T1. 2 G1. 3–5 M ins :

1363* ततो भूतानि वित्रेसुर्देवाश्च भयविक्लवाः ।

21 Ś1 om 21 (cf v. l 19). M3 reads 21^{ab} twice. —^{b}) T1. 2 G1. 3–5 M1 2. 3 (first time). 4 दानवा युद्धकाङ्क्षिणः. —^{c}) V1 विज्ञात्वा (for °य). —^{d}) K Ñ2 V1 B1. 3 Dn Ds D1–4. 6 T4 आ(B1 ह्या)ग्नेयास्त्रेण ते (K1. 3. 4 Dn Ds1 T4 वै) तदा; V3 B2 D5 ह्या(D5 आ)ग्नेयास्त्रेण तेजसा (B2 [marg.] ते तदा), T1 2 G3 त्वाग्नेयान्तर्हिते हरौ.

22 Ś1 om 22^{ab} (cf. v 1. 19). —^{a}) V1. 2 ततस्तं प्रवि(V2 परि)षह्याजाव्, V3 B D6 °स्तत्तु विषह्याजाव्, T4 °स्तत्तु विषह्यास्त्रम् —^{b}) V B D2 5 6 T4 अस्त्रम् (for ह्य°) — For 22^{ab}, T1 2 G1 3–5 M subst. T4 ins. after 22^{ab}.

1364* तत क्रुद्धो हृषीकेशः प्रतिषिध्याग्निसंचयम् ।
[M1–3 प्रविपक्ष (for प्रतिषिध्य).]

— D1 om. 22^{c}–23^{b}. —^{c}) K2 शर्वः (for सोऽर्कः).

जग्राह वारुणं सोऽस्त्रं वासुदेवः प्रतापवान् ॥ २२
उद्यते वारुणास्त्रे तु वासुदेवेन धीमता ।
आग्नेयं प्रशमं यातमस्त्रं वारुणतेजसा ॥ २३
पैशाचं राक्षसं चैव रौद्रमाङ्गिरसं भवः ।
मुमोचास्त्राणि चत्वारि युगान्ताग्निनिभानि सः ॥ २४
वायव्यमथ सावित्रं वासवं मोहनं तथा ।
अस्त्राणां वारणार्थाय वासुदेवो मुमोच ह ॥ २५
अस्त्रैश्चतुर्भिश्चत्वारि वारयित्वा च केशवः ।
जग्राह वैष्णवं सोऽस्त्रं व्यादितास्यान्तकोपमम् ॥ २६
वैष्णवास्त्रे विमुक्ते तु सर्व एवासुरोत्तमाः ।

C 10619
B 2 124 48
P 2 124. 48

23 D1 om 23^{ab} (cf v l 22) — ^{a}) K4 प्रयुक्ते (for उद्यते) T1 2 G1 3 4 M च (for तु) G6 उद्यते वारुणे चास्त्रे — For 22^{ab}, K1 3 Ñ2 3 V B D T4 subst

1365* प्रयुक्ते वासुदेवेन वारुणास्त्रेऽतितेजसि ।

[V2 प्रमुक्ते, V3 D6 मुक्ते तु (for प्रयुक्ते). Ñ2 V3 B3 D6 महात्मना (for ऽतितेजसि)]

— ^{c}) D3 याति (for यातम्) Ñ1 आग्नेयं प्रहतं घोरम्, T1 °यं प्रशमं याति — ^{d}) D3 T1 ह्यस्त्रं (for अस्त्रं) V3 B2 D6 वारुणास्त्रस्य तेजसा — After 23, N (except Ś1 Ñ1) T4 ins

1366* तस्मिन्प्रतिहते ह्यस्त्रे वासुदेवेन संयुगे ।

24 ^{a}) N (except Ś1) M4 रौद्रं, T4 सर्वं (for चैव) — ^{b}) N (except Ś1) T4 M4 तथैव (for रौद्रम्) Ś1 तथा, K3 Dn महत् (for भव) — ^{d}) Ś1 च, K Ñ2 V1, 2 B D (except D3) T4 G1 4 5 वै (for स:) T2 युगान्ताग्निनिभाननः — After 24, K1 2 Ñ2 B2 D1 4 ins

1367* वासुदेवोऽपि चास्त्राणि दृष्ट्वा विप्रहितानि वै ।

[Ñ2 B2 दृष्ट्वा तानि (for चास्त्राणि) D1 4 परास्त्राणि (for ऽपि चास्त्राणि). Ñ2 B2 [अ]स्त्राणि (for दृष्ट्वा वि-) D1 4 दृष्ट्वा प्राणिहितानि वै (for ^{b})]

25 ^{a}) K4 V1 सावित्र्य (for °त्र) — ^{d}) K1 3 Ñ2 G1 व्यमुञ्चत, K2 4 V1 B Dn Ds D1–4 T4 ऽप्यमुञ्चत, V2 ऽप्ययुञ्जत (for मुमोच ह)

26 ^{b}) K Ñ2 V1 2 B Dn Ds D3 4 T4 [आ]शु (K3 V2 तु, K4 Dn स; B3 Ds च) माधव, Ñ1 V3 D2 5 6 महाबल:; G5 [आ]शु केशव (for च के°) — ^{c}) K Ñ2 V1, 2 B2, 3 Dn Ds D1–4 T4 मुमोच (for जग्राह). K1, 2 D4 T1 G3 च (for सो) — ^{d}) V2 T1, 2 G3–5 M व्यादितास्यमिवान्तकम्.

27 ^{a}) K1, 3 4 Ñ2 V1 B2, 3 Dn Ds D1 3–6 T4 M4 प्रयुक्ते; K2 B1 D2 प्रमुक्ते (for वि°). V2 वैष्णवास्त्रेण युक्ते तु. — ^{b}) T1 2 G1 3–5 M महासुरा: (for [अ]सुरोत्तमाः) — After 27^{ab}, N (except Ś1 Ñ1) T1 2 4 G1 3–5 ins.

1368* भूतयक्षगणाश्चैव बाणानीकं च सर्वश ।

[K3 4 -पक्षि (for -यक्ष-). V3 D6 तत्र; T1 2 G1 3–5 बाणो (for चैव) T1, 2 G1 3–5 वैष्णवास्त्रेण संवृता: (for ^{b})]

— ^{c}) T1 2 G1 3–5 M वेगाद् (for सर्वे) K Ñ2 V1 2 B Dn Ds D1 2 4 5 T4 दिश सर्वा प्राद्रवन्त, D3 सर्वा दिश प्राद्रवन्त — ^{d}) N (except Ś1 Ñ1 V3 B3 D6) भयमो- (D2 °यान्मो)हेन विक्लवा — After 27, N (except Ś1 Ñ1) T4 G4 ins

1369* वैशंपायन उवाच ।

प्रमाथगणभूयिष्ठे सैन्ये दीर्णे महासुर: ।
निर्जगाम ततो बाणो युद्धायाभिमुखस्त्वरन् ॥
भीमप्रहरणैर्घोरैर्दैत्येन्द्रै सुमहाबलै: ।
वृतो महारथैर्वीरैर्वज्रीव सुरसत्तमै: ॥
जप्यैश्च मन्त्रैश्च तथौषधीभि-
मर्हात्मनः स्वस्त्ययनं प्रचक्रु: ॥
स तत्र वस्त्राणि शुभाश्च गाव ।
फलानि पुष्पाणि तथैव निष्कान् ।
बले: सुतो ब्राह्मणसत्तमेभ्यो
ददौ धनान्याशु यथा धनेश ॥
सहस्रसूर्यो बहुकिंकिणीक
परार्ध्यजाम्बूनदहेमचित्र: ।
सहस्रचन्द्रायुततारकश्च
रथो महानग्निरिवावभाति ॥
तमास्थितो दानवसंगृहीतं
महाध्वज कार्मुकधृक्स बाणः ।
उद्वर्तयिष्यन्यदुपुंगवाना-
मतीव रौद्र स बिभर्ति रूपम् ॥
स वेगवान्वीररथौघसंकुलो
विनिर्ययौ तान्प्रति दैत्यसागरः ।
महार्णवोद्धूततरंगसंकुलो
यथार्णवो लोकविनाशनाय ॥
भीमानि संत्रासकरैर्वपुर्भि-
स्तान्यग्रतो भान्ति बलानि तस्य ।
महारथान्युच्छ्रितकार्मुकाणि
सपर्वतानीव वनानि राजन् ॥
विनि सृत सागरतोयवासा-
दत्यद्भुत चाहव द्रष्टुकामः ।

Colophon.

[Some Mss om the ref. G4 om lines 1–20. — (L. 1) D5 -सैन्ये तु (for -भूयिष्ठे), D5 विदीर्णे स, Bom. Poona

दिशः प्रदुद्रुवुः सर्वे भयमोहितलोचनाः ॥ २७
अन्धकारीकृते लोके प्रदीप्ते त्र्यम्बके तदा ।
न नन्दी नापि च रथो न रुद्रः प्रत्यदृश्यत ॥ २८
द्विगुणं दीप्तदेहस्तु रोषेण च बलेन च ।
त्रिपुरान्तकरं बाणं जग्राह च चतुर्मुखः ॥ २९
संदधत्कार्मुके चैव क्षेप्तुकामस्त्रिलोचनः ।

---

eds G(ed) दीर्णे सैन्ये (by transp) B3 महाभुज (for °सुर) — (L 2) T4 ययौ रथगतो बाणो (for ^{a}) — (L 3) D5 रौद्रैर् (for घोरैर्). K3 4 Dn T4 दैत्यैश्च (for दैत्येन्द्रै) D5 दैत्येन्द्र सुमहाबल (for ^{b}) — (L 4) D1 महाबलैर्, D3 °सुरैर् (for °रथैर्) K1 2 D4 घोरैर्, V3 D1 वीरो (for वीरैर्) K4 वज्रतोमरसत्तमै , D3 वज्रीव च सुरोत्तमै (for ^{b}) — (L 5) K1 V2 D5 जपैश्, K3 होमैश्, K3 (also) 4 Ñ2 V1 D2 3 जाप्यैश् (for जप्यैश्). Dn2 होमैश् (for मन्त्रैश्) V3 B2 D3. 6 महौपधीभिर् (for तथौ°) — (L 6) T4 महात्मभि (for °न) Ñ2 V1 प्रकुर्यु (for प्रचक्रु) — (L 7) T4 तेभ्योऽथ (for स तत्र) V2 D2 3 शुभानि (for °श्च) — D3 om. lines 9–14 — (L 9) V3 D6 दैत्याधिपो (for बले सुतो) K2 -समेतेभ्यो (for -सत्तमेभ्यो) K3 4 B3 Dn D1 2 बले सुतो ब्राह्मणेभ्य प्रयच्छन् — (L 10) K3 4 B3 Dn D1 2 विराजते तेन (for ददौ धनान्याशु) — (L 12) D5 -रत्न- (for -हेम-) V2 -पृष्ठ (for -चित्र) — (L 13) V3 B3 D6 -चन्द्रोऽयुत- (for -चन्द्रायुत-) — (L 14) D6 प्रभाति (for [अ]व°) — (L 15) D1 तत्र (for तम्) — (L 16) K1 2 V3 B3 Dn D1. 3 4, 6 T4 महाध्वज , V2 °भुज , B1 2 °रथ (for °ध्वज). B3 कार्मुकबाणपाणि (for °कधृक्स बाण). — (L 17) K2 B1 (marg as above) 2 D4 त्रिदशेन्द्रसेनाम् (for यदुपुंगवानाम्) — (L 18) Ñ2 रूपं (for रौद्र) — (L. 19) Bom Poona eds. G(ed) मन्युमान् (for वेगवान्) — (L 20) Dn दैत्यराज , T4 सागरेश्वर (for दैत्यसागर). — (L 21) Ñ2 V1 B2 D5 वातप्रवृद्धोर्मि- , B1 Dn T4 G4 वातप्रवृद्धस्तु (B1 [marg] -वृद्धोर्मि-), D3 D6 वातप्रति(D6 °वि)ध्वस्त- (for महार्णवोद्भूत-) K2 D4 महार्णवानीकरथौघसकुलो , K3 corrupt]— (L 22) K3 नाश- (for लोक-) — (L 23) Dn2 भीतानि (for भीमानि). K2 D4 कराणि संयुगे (for -करैर्वपुर्भिस्). — (L 25) Ñ2 Dn D2 3 6 -रथाभ्युच्छ्रि(Dn1 D3 °श्रि)त- (for °न्युच्छ्रित-). — (L 26) V1 बलानि (for वनानि) — B3 D6 om lines 27–28 — (L. 27) K2 B2 विनि सृत , K4 D2 विनिर्गत (for विनि सृत) T4 -सैन्यमध्याद् (for -तोयवासाद्). — (L. 28) K3 4 Ñ2 V2 Dn D5 G4 अत्यद्भुतश् (for °त) — Colophon om. in K D2 4 G4 — *Mention of the Epic*. Ds2 D5 — *Mention of Khila* V B Dn Ds1 D1 3. — *Adhy name* · Ñ2 V B Dn Ds D1 3 5 6 बाणयुद्धम्. — *Adhy no* : V1 181 , V2, 3 Ds2 180 , D1 172 , D3 197 , T4 230.]

28 Before 28, K1, 2, 4 Ñ2 V B D (except D5) T4 ins वैशंपायन उवाच — ^{b}) K4 T1 2 G1 3, 5 M तथा, Ñ1 तत (for तदा) D2 3 वैष्णवास्त्रेण तत्क्षणात् — ^{d}) K4 न रुद्र प्रतिदृश्यते , D4 (marg) महादेवे तदाभवत्

29 G4 om 29^{ab} — ^{a}) T1 2 G1 3–5 M -तेजास् (for -देहस्) — ^{b}) B1 पौरुषेण (for रोषेण च) Ś1 रोषेण परमेण स — After 29^{ab}, D6 T1 2 G1 3–5 M G(ed) ins

1370* अस्त्रं नारायणं नाम नारायणजिघांसया ।
जग्राह शूली भूतात्मा देवानामथ पश्यताम् ॥
मुमोच च यथाशक्ति रुद्रो ब्रह्मात्मसंभवः ।
विमुक्तं तेन तच्चास्त्रं जगाम च समीपतः ॥
शंकरस्य तदस्त्रं तु प्रहसन्केशवस्तदा ।
जग्राह लीलया विष्णुस्तूणौ तच्च न्यनिक्षिपत् ॥
कुपितो रुद्ररूपेण रुद्र संहारमूर्तिमान् ॥
तत शूल समादाय सर्वशत्रुविदारणम् ।
देवदानवगन्धर्वयक्षपन्नगरक्षसाम् ।
भयंकरं मुमोचाथ कृष्णमुद्दिश्य शंकर ॥
तच्च शूलं हरिर्दृष्ट्वा निजशक्त्या न्यवारयत् ॥
ततस्त्रिलोचन क्रुद्ध कालान्तकयमोपम ।
अस्त्रं पाशुपतं यत्तु लोके ख्यात स्ववीर्यवत् ।
जग्राहात्मसमं साक्षाद्धन्तुं केशवमोजसा ॥
विज्ञायाथ तदा विष्णुस्तदेवास्त्रं समाददे ॥
द्वे ह्यस्त्रे प्रशमं याते द्वाभ्यां संधारिते तदा ॥

[(L 2) D6 T1 2 G1 3 4 शूलात्मा (for भूतात्मा) D6 दिवि , G1 4 5 अपि (for अथ) — (L. 3) M रोषात्म- (for ब्रह्मात्म-) — (L 4) D6 शस्त्रं (for चास्त्रं). — (L 6) T2 G1 4 5 तूर्णं (for तूणौ) — (L 7) D6 T2 G1 रौद्र- (for रुद्र-) M2 -रूपोऽप (for -रूपेण) M1 3, 4 कुपि(M3 कम्पि)तो रौद्ररूपोऽथ (for ^{a}) — D6 om lines 8–14. M3 om lines 8–12 — (L 12) T2 युगान्तक (for काला°). — (L. 13) T1 G4 स्ववीर्यवान् (for °वत्). — (L 14) T2 अञ्जसा (for ओजसा) — (L 16) M ते अस्त्रे (for द्वे ह्यस्त्रे). G(ed.) संवारिते (for संधा°)]

— ^{c}) T1 2 G1 3–5 M घोरं (for बाण). D1 त्रिपुरान्तकरो बाणं — ^{d}) K1, 2 3 (also as in text) 4 Ñ1 2 V B Dn Ds D1–6 स (for च) T4 स वीर्यवान् (for चतुर्मुखः). D6 T1, 2 G1 3–5 M1–3 जग्राहास्त्रं हरस्तदा , M4 °ह स हरस्तदा. — After 29, T1 2 G1 3–5 M ins

1371* अग्निमारुतसोमानां विष्णोस्तेजः समुत्थितम् ।
अनेनाहं हनिष्यामि सबन्धुं ससुतं रणे ॥
इति मत्वा विरूपाक्षो दक्षयज्ञविनाशनः ।

विज्ञातो वासुदेवेन चित्तज्ञेन महात्मना ॥ ३०
जृम्भणं नाम सोऽप्यस्त्रं जग्राह पुरुषोत्तमः ।
हरं संजृम्भयामास क्षिप्रकारी महाबलः ॥ ३१
पाञ्चजन्यस्य घोषेण शार्ङ्गविस्फूर्जितेन च । C 10637 B 2 125 7 P 2 125 7

[(L 2) M1–3 सबल (for सबन्धु) T1 G3 सतत (for ससुत)]

30 ^{a}) K1 B2 D6 सदधे (for °धत्) Ñ1 2 Dn Ds2 D5 कार्मुकं (for °के) K3 D4 संदधे कार्मुकं चैव, T1 2 G1 3–5 M °धे कार्मुकी (T2 G1 4 5 M4 °के) चापि — ^{b}) T1 G3 भेत्तुकामस् (for क्षेप्तु°). — ^{c}) Ś1 विज्ञातं (for °तो) — ^{d}) K1 विग्रस्तेन (for चित्तज्ञेन) — After 30, T1 2 G1 3–5 M G(ed) ins

1372* बाणेनाहेन भूतेशो मां हन्तुं किल निश्चित ।
इति मत्वा तदा कृष्ण प्रतिकारं समारभत् ॥

[(L 1) M1–3 देवेशो (for भूतेशो) — (L 2) T1 G3 M1 3 तत (for तदा)]

31 D2 om 31 — After 31^{ab}, T1 2 G1 3–5 M ins

1373* तेनास्त्रेण तदा कृष्णो मन्त्रपूतेन केशव. ।

— ^{c}) K2–4 Dn2 D3 5 हरं स-, T1 G3 अनन्तं, T2 G1 5 M हरं तं (for हर सं-) D6 हरं संस्तम्भयामास — ^{d}) T1 2 G1 3–5 M जनार्दन (for महाबल.) — For 31, Ś1 subst

1374* विजृम्भणं नाम तत सोऽस्त्रं जग्राह केशव ।
विजृम्भयामास हरं तेनास्त्रेण महाबल. ॥

— K Ñ V B Dn Ds D1 3–6 T4 ins after 31 D2 after 30

1375* सशर सधनुश्चैव हरस्तेनाशु जृम्भित ।
संज्ञां न लेभे भगवान्विजेतासुररक्षसाम् ॥
सशरं सधनुष्कं च दृष्ट्वात्मानं विजृम्भितम् ।

[(L 1) D2 सधनु सशरश्चैव (for ^{a}) Ñ2 V3 B2 D3 D6 read lines 2-3 after 1376* — (L 2) Ñ1 V3 D6 न लेभे भगवान्सज्ञा (for ^{a}). — V2 3 D6 T4 read line 3 after 1376*. — (L 3) D1 सधनु सहरश्चैव (for ^{a}). Ñ1 D2 चैनं (for [आ]त्मान)]

— After the above, K1 D1–3 read lines 22–24 of the App I (No 37) repeating them in their proper place — K1 D1–3 ins after the first occurrence of line 24 of App I (No 37) Ñ2 V2 3 B D3 D6 T4 cont after 1375*

1376* बलोन्मत्तोऽथ बाणोऽसौ शर्वं चोदयतेऽसकृत् ।
सृष्टिमन्यां सृजस्वेति तदा दर्पविवृद्धये ॥
शक्तिमन्यां सृजस्वेव तदा दर्पविवृद्धये ।

[(L 1) K1 बलवन्त तदा बाण (for ^{a}). D3 शर्वं नोदयते यदा (for ^{b}) — B2 3 om. line 2. — (L 2) T4 ससर्ज त्वं (for सृष्टिमन्या) D2 सृजस्वेव (for °स्वेति) D1 -प्र- (for -वि-). — K1 D1–3, 6 T4 om. (hapl.) line 3.]

K1 Ñ2 V2 3 B D3 D1–3 6 T4 cont K2–4 Ñ1 V1 Dn D4 5 cont after 1375*

1377* ततो ननाद भूतात्मा स्निग्धगम्भीरनिस्वन ।
प्रध्मापयामास तदा कृष्ण शङ्ख महाबल ॥

[(L 1) V3 D6 T4 नदति (for ननाद) K2 D4 निस्वनम् (for °न) Bom Poona eds स्निग्धगम्भीरया गिरा (for ^{b}) — (L 2) V3 D6 शौरि (for कृष्ण)]

While T1 2 G1 3–5 M ins after 31 :

1378* जृम्भिते च हरे तस्मिञ्शङ्खं दध्मौ स केशव ।
शार्ङ्गं च कूजयामास सिंहनादं व्यनीनदत् ॥
पारवश्यं समायात शूली जृम्भणतेजसा ।

[(L 1) G4 5 प्रतापवान् (for स केशव) — (L 3) T1 M1–3 समायाते (for °त)]

32 ^{c}) T1 2 G1 3 5 हरं, T4 तत्र (for देवं) — After 32, T1 2 G1 3–5 M G(ed) ins

1379* दानवाश्च तथा यान्ति दिशोऽथ विदिशोऽपि च ।
बाणश्चापि तदा राजन्भीतभीत. समाश्वसत् ॥
ततो हाहाकृतं सैन्यं पश्यत: शूलिनस्तदा ।
किं कुर्मः क्व गमिष्याम इति दानवसत्तमा ।
स्थिताश्च विमुखा राजन्कर्तव्ये मूढचेतसः ॥ [5]
अथ रुद्रोऽपि सहसा जृम्भणास्त्रेण मोहित. ।
कृत्याकृत्यविमूढात्मा न किंचित्प्रत्यपद्यत ॥
ध्यात्वाथो मनसा तातं भक्तिग्राह्यमतीन्द्रियम् ।
परात्परतरं विष्णुं सर्वलोकेश्वरेश्वरम् ।
नारायणं प्रभुं कृष्णमनन्तं पुरुषोत्तमम् ॥ [10]
यदि धर्मो भवेज्जयायान्युक्तं मदपसर्पणम् ।
इति ध्यात्वा हर शीघ्रं तस्माद्देशादपाक्रमत ॥

Colophon

वैशंपायन उवाच ।
जृम्भिते तु हरे तस्मिन्क्रुद्ध शक्तिधरस्तदा ।

[(L 1) T1 G3 M1–3 G(ed) याता (for यान्ति) — (L. 2) M1–3 स नि श्वसन् (for समाश्वसत्) — (L 5) T1 G3 M1–3 तेजस, T2 -चेतने, G5 -तेजसम् (for -चेतस) — M1 2, 4 om. lines 6–12. M3 om lines 6–11 — (L 6) T1 सहितो (for सहसा) — (L 8) G(ed) भाव- (for भक्ति-) — (L 10) T2 G1 4 विष्णुम् (for कृष्णम्). — Colophon om. in M1 2 — *Adhy. name* T2 G1. 3 बाणयुद्धे जृम्भणास्त्रेण हरपराजय', M4 बाणयुद्धम् — *Adhy no.*. T1 G3. 5 260, T2 G1 262, G4 264; M3 224, M4 223.]

देवं विजृम्भितं दृष्ट्वा सर्वभूतानि तत्रसुः ॥ ३२
कुम्भाण्डसंगृहीताश्वे रथे तिष्ठन्गुहस्तदा ।
अभिदुद्राव कृष्णं च बलं प्रद्युम्नमेव च ॥ ३३
शरौघाचितगात्रास्ते त्रयस्त्रय इवाग्नयः ।
शोणितौघप्लुतैर्गात्रैः प्रत्ययुध्यन्गुहं तदा ॥ ३४
ततस्ते युद्धमार्गज्ञास्त्रयस्त्रिभिरनुत्तमैः ।
वायव्याग्नेयपार्जन्यैर्बिभिदुर्दीप्ततेजसः ॥ ३५
तस्य दीप्तशरौघस्य दीप्तचापधरस्य च ।
शरौघानस्त्रमायाभिर्ग्रसन्ति स्म महात्मनः ॥ ३६
अस्त्रं ब्रह्मशिरो नाम कालकल्पं दुरासदम् ।
संदष्टौष्ठपुटः संख्ये जग्राह स गुहस्तदा ॥ ३७
प्रयुक्ते ब्रह्मशिरसि सहस्रांशुसमप्रभे ।
उग्रे परमदुर्धर्षे लोकक्षयकरे तदा ॥ ३८
महाभूतेषु सर्वेषु प्रधावत्सु ततस्ततः ।
केशवः केशिमथनश्चक्रं जग्राह वीर्यवान् ॥ ३९
सर्वेषामस्त्रवीर्याणां वारणे घातने तथा ।

— While N (except Ś1 Ñ1) T4 ins after 32 a passage given in App I (No 37), after which N (except Ś1 Ñ1) T4 G(ed) ins

1380* जनमेजय उवाच ।
अपयाते ततो देवे कृष्णे चैव महात्मनि ।
पुनश्चासीत्कथं युद्धं परेषां लोमहर्षणम् ॥

[(L 1) D3 अथ (for अप-). G(ed.) न तु (for चैव) — (L 2) K4 प्रवर्तते , Ñ2 V B1 Dn चावर्तते (for चासीत्कथं) K1 ततश्चावर्तते युद्ध , K3 प्रावर्तत पुनर्युद्ध , D6 T4 G(ed) पुनश्चावर्तत मृध (for ^{a})]

33 Before 33, some Mss. ins. वैशंपायन उवाच — ^{a}) K2–4 Ñ3 V1 2 B1 2 D (except D2, 6) T4 M4 कुम्भाण्डसंगृहीते तु — K1 (marg) 2 Ñ2 3 V B2, 3 Dn Ds D4–6 ins after 33 . B1 after 34

1381* ततः शरशतैरुग्रैस्तान्विव्याध रणे गुहः ।

[K2 D4 अग्र्यैर् (for उग्रैर्) K1 गुहस्तदा (for रणे गुह)] Ñ2 3 V B Ds D5 6 cont

1382* अमर्षरोषसंक्रुद्ध: कुमारप्रवरो नदन् ॥

[D5 अमर्षावेशसंक्रुद्ध. (for ^{a}). D5 हसन् (for नदन्)] While T1, 2 G1 3–5 M ins. after 33 ·

1383* शराणां शतसाहस्रैर्विव्याध समरे गुह· ।
वासुदेवं सहस्रेण शतेन बलमेव च ।
प्रद्युम्नं बाणसाहस्रैर्जघान समरे गुहः ॥

[(L 3) G4 5 M4 बहु- (for बाण) G4 विव्याध (for जघान) ·]

